

आपदेवकृतः

मीमांसान्यायप्रकाशः

(पूर्वार्धम्)

अनन्तदेवकृतभाट्टालंकाराख्यटीकासहितः

RAMACHANDRA SARMA
SIDDHASRAMAM
T. S. ADYAR

"गुजराती" प्रिन्टिंग प्रेस
सासुन बिल्डींग्स, एलफिन्स्टन सर्कल,
कोट, मुंबई नं. १.

गुजराती प्रि. प्रेस.
नं. १-७-७
कोट, मुंबई

"गुजराती" प्रिन्टिंग प्रेस—स्थानि

क्रय्यसंस्कृतपुस्तकानि

सासून बिल्डिंग, एल्फिन्स्टन सर्कल, फोर्ट—मुंबई नं. १

गीता.

श्रीमद्भगवद्गीता सप्तटीकोपेता। प्रथमो गुच्छः—

(१) श्रीमच्छङ्कराचार्यविरचितं भाष्यम्,
(२) आनन्दगिरिकृतं शाङ्करभाष्यव्याख्यानम्,
(३) आनन्दतीर्थीय (माध्व) भाष्यम्,
(४) जयतीर्थविरचिता प्रमेयदीपिका टीका,
(५) रामानुजभाष्यम्,
(६) पुरुषोत्तमजीप्रकाशिता अमृततरङ्गिणी,
(७) नीलकण्ठविरचितो भावप्रदीपः,

एतैः समेता मञ्जुलैरायसाक्षरैर्मुद्रिता, पृष्ठान्यष्टशतपरिमितानि सुचिक्कणानि। मूल्यम् १०—०—०

श्रीमद्भगवद्गीता अष्टटीकोपेता। द्वितीयो गुच्छः—

(१) निम्बार्कमतानुयायिश्रीकेशवकाश्मीरिभट्टाचार्यपादप्रणीता—तत्त्वप्रकाशिका,
(२) श्रीमधुसूदनसरस्वतीकृता—गूढार्थदीपिका,
(३) श्रीशङ्करानन्दप्रणीता—तात्पर्यबोधिनी,
(४) श्रीधरस्वामिकृता—सुबोधिनी,
(५) श्रीसदानन्दविरचितः—भावप्रकाशः,
(६) श्रीधनपतिसूरिविरचिता—भाष्योत्कर्षदीपिका,
(७) दैवज्ञपण्डितश्रीसूर्यविरचिता—परमार्थप्रपा,
(८) पूर्णप्रज्ञमतानुसारिश्रीराघवेन्द्रकृतः—अर्थसंग्रहः

इत्येताभिर्व्याख्याभिः सहिता। अत्र श्लोकाः स्थूलतमाक्षरैष्टीकाश्च स्थूलाक्षरैर्मुद्रिताः, वृद्धा मा क्लेशिषतेति।

द्वितीय गुच्छस्य प्रथमं पुष्पम् ...	...	मूल्यम्	३-१२-०
,, ,, द्वितीयं पुष्पम् ...	...	,,	२-१२-०
,, ,, तृतीयं पुष्पम् ...	...	,,	३—८—०
		समग्रं ,,	१०—०—०

उत्तरगीता। गौडपादीयदीपिकाख्यव्याख्यायुता भगवत्पादश्रीशंकराचार्याणां परमगुरुभिः श्रीशुकाचार्याणां च शिष्यैः श्रीगौडपादाचार्यैः प्रणीतेयं व्याख्येत्येतावत्कथनमलमस्या महिमानमवगमयितुम्। मूल्यम् ०—३—०.

मीमांसान्यायप्रकाशः

(पूर्वार्ध)

(आपदेवीयः)

श्रीमदनन्तदेवकृतभाट्टालंकाराख्यटीकासहितः

(तस्यायं विधिनिरूपणान्तो भागः)

बाक्रे इत्युपाह्वगंगाधरभट्टसुतमहादेवशर्मणा

संशोधितः

स च

"गुजराती" प्रिन्टींग प्रेस नाम्नि मुद्रणयंत्रालये नटवरलाल इच्छाराम

देसाई इत्यनेन मुद्रयित्वा प्रकाशितः

शकाब्दः १८४८ खिस्ताब्दः १९२६

ગુજરાતી પ્રિ. પ્રેસ.
રૂ. ૧-૦-૦

पुस्तक प्राप्ति स्थानमूः--

"गुजराथी" प्रिंटींग प्रेस,

बुकसेलर्स एण्ड पब्लिशर्स.

सासुनबिल्डींग, बजारगेट स्ट्रीट,

फोर्ट, मुंबई नं. १.

(All rights reserved by the Publishers)

Printed & Published by Natverlal Itcharam Desai, at
The Gujarati Printing Press.
Sassoon Building, Bazargate Street
Fort, Bombay No. 1.

K. RAMACH... SIDDHABHARATAM T. S. ADYAR-20

श्रीः

मीमांसान्यायप्रकाशविषयसूची.

विषयः	पृष्ठं.
मंगलम्	१
मीमांसाविषयः	२
धर्मलक्षणम्	४
तद्बोधकं विधिवाक्यम् ...	,,
विधिस्वरूपोपपादनाय तद्वाक्यविभागः	५
भावनालक्षणविभागौ ...	९
शाब्दी भावना	१२
वेदापौरुषेयत्वम्	१७
शाब्दीभावनाया अंशत्रयम् ...	२०
वेदस्य पञ्चधाविभागः ...	२५
कर्म(धात्वर्थ)विधिः ...	,,
गुणविधिः	,,
विशिष्टविधिः	२६
विधेश्चातुर्विध्यम्	४७
उत्पत्तिविधिः	,,
विनियोगविधिः	४८
तत्सहकारीणि श्रुत्यादीनि षट्प्रमाणानि	,,
अङ्गत्वलक्षणम्	,,
श्रुतेस्त्रैविध्यम्	,,
विधात्र्यभिधात्रीश्रुत्योरुदाहरणे	६७
विनियोक्त्र्याः श्रुतेस्त्रैविध्यम्...	,,
तत्र विभक्तिश्रुत्याङ्गत्वम् ...	,,
समानाभिधानैकपदश्रुतिभ्यामङ्गत्वम्	७०
भावनायाः कर्त्राक्षेपकत्वम् ...	७०
श्रुतेर्लिङ्गादिभ्यः प्राबल्यम् ...	८२
लिङ्गादङ्गत्वम्	८४
लिङ्गस्य वाक्यादिभ्यः प्राबल्यम्	८८
वाक्यादङ्गत्वम्	९०
अनारभ्याधीतानां प्रकृतौ संनिवेशः	,,
सप्तादश्यस्य विकृतिष्वेव ...	,,
उपसंहारलक्षणम्	९२
वाक्यस्य प्रकरणादिभ्यो बलीयस्त्वम्	९३
प्रकरणादङ्गत्वम्	९४
प्रकरणं क्रियाया एव विनियोजकम्	९५
आर्थीभावना	,,
प्रकरणद्वैविध्यम्	९७
महाप्रकरणम्	,,
प्राप्तबाधः	१०२
अप्राप्तबाधः	,,
अवान्तरप्रकरणम्... ...	१०७
संदंशः	,,
अवान्तरप्रकरणं महाप्रकरणाद्बलीयः	१०८
प्रकरणं स्थानादिभ्यो बलवत्	,,

विषयः	पृष्ठं.
राजसूयप्रदमाख्यातपरतन्त्रम् ...	१०९
स्थानादङ्गत्वम्	११२
स्थानद्वैविध्यम्	,,
पाठसादेश्यद्वैविध्यम् ...	,,
यथासंख्यपाठादङ्गत्वम् ...	,,
संनिधिपाठादङ्गत्वम् ...	११३
अनुष्ठानसादेश्यादङ्गत्वम् ...	,,
स्थानस्य समाख्यातो बलवत्त्वम्	११४
समाख्ययाङ्गत्वम्	११६
संनिपत्योपकारकाण्यङ्गानि ...	११७
प्रतिपत्तिकर्म	,,
अङ्गगुणविरोधे तादर्थ्यादिति न्यायः	११८
आरादुपकारकाण्यङ्गानि ...	११९
अङ्गानामपूर्वप्रयुक्तत्वम् ...	,,
प्रयोगविधिः	१२६
क्रमलक्षणम्	१२८
क्रमे षट्प्रमाणानि	१२९
श्रौतक्रमः	,,

विषयः	पृष्ठं.
अर्थक्रमः	१३९
पाठक्रमः	,,
तद्वैविध्यम्	,,
मन्त्रपाठक्रमः	,,
ब्राह्मणपाठक्रमः	१३०
स्थानक्रमः	१३१
मुख्यक्रमः	१३२
प्रवृत्तिक्रमः	१३४
अधिकारविधिः	१३५
शूद्रस्य यागादावनधिकारः ...	१३६
रथकारस्याधानमात्रेऽधिकारः ...	,,
स्त्रिया भर्त्रा सहाधिकारः ...	१३७
निषादेष्टिविधेर्ज्ञानाक्षेपकत्वम् ...	१३९
सामर्थ्यस्याधिकारिविशेषणत्वम्	,,
काम्ये कर्मणि साङ्गप्रयोगसमर्थस्याधिकारः	,,
नित्यकर्मणामङ्गेषु यथाशक्ति-न्यायः	१४०

पूर्वार्धानुक्रमणिका समाप्ता ।

आपदेवकृतः

मीमांसान्यायप्रकाशः ।

अनन्तदेवकृतभाट्टालंकाराख्यटीकासहितः

श्रीगणेशाय नमः ।

यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् ।
प्राप्यते तमहं वन्दे गोविन्दं भक्तवत्सलम् ॥ १ ॥

भाट्टालंकारः ।

दध्नो मन्थनकाम्यया व्रजवधूं कुम्भे तदासिञ्चतीं
सल्लेहं दधि देहि मह्यमधुनेत्यूचे रमेशोऽथ याम् ।
ओमित्युक्तिपुरःसरं निजकरे तस्यार्पणं कुर्वतीं
प्रत्युक्तिः कुरु कार्यमस्तु शमिति श्रीशस्य सा पातु नः ॥ १ ॥
अनल्पजल्पोत्थितदोषदुष्टां पुनः पुनस्तद्वचनेऽतिहृष्टाम् ।
श्रीस्वामिसंजातगिरिं द्युनद्यां निजां गिरं संप्रति मज्जयामः ॥ २ ॥

आचारानुमितश्रुत्या मङ्गलफलत्वेनावगतं विघ्नध्वंसाद्यन्यतरदुद्दिश्य कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति श्लोकाभ्यां—यदिति । मात्रशब्दः कात्स्न्र्य-वाची । 'मात्रं कात्स्न्र्येऽवधारणे' इत्यमरोक्तेः । यावन्तो यदीयाः कृपालेशाः पुरुषार्थप्राप्तिहेतुभूतास्तत्फलोपहिता इति यावत् । ननु सर्वेऽपि धर्मादिचतुष्टया-र्थिनस्ते च यदि कृपालेशविषयतां गतास्तदा निर्विषयसंपूर्णकृपाया अप्रसिद्धौ तल्लेशानां पुरुषार्थप्रापकत्वोक्तेरसंगतिरित्याशङ्क्योक्तं—भक्तेति । भक्तिः प्रकृते कीदृशेऽपि भगवति निरुपधिप्रीतिः । तथा च—

या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥

इति प्रार्थयन्तं प्रह्लादं प्रति भगवतोक्तं—

'भक्तिर्मयि तवास्त्येव भूयोऽप्येवं भविष्यति' ।

इति तद्वन्तो भक्ताः, तेषु वत्सलः 'वत्सांसाभ्यां कामबले' इति वत्स-

अनन्तगुणसंपन्नमनन्तभजनप्रियम् ।
अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणम् ॥ २ ॥

इह खलु परमकारुणिकेन भगवता जैमिन्यृषिणा 'अथातो

पदान्मत्वर्थीयो लच् । ततश्च स्नेहवानित्यर्थः । अन्यत्र स्नेहवाचित्वेनादृष्टोऽपि वत्सशब्दो लजन्तवृत्तौ स्नेहमभिधत्ते तथाप्रतीतेः सूत्रान्तर्गतकामशब्दस्य व्याख्यातृभिस्तादर्थ्याङ्गीकरणाच्च । यश्च यदीयस्नेहविषयः सन्दुःखित्वेन तद्बुद्धिस्थो भवति स तदीयकृपाविषय इति भक्तानां पूर्णकृपाविषयत्वं द्योत्यते । यद्वा कामशब्दो लोके इच्छासामान्यवाचितया प्रसिद्ध इति सूत्रे निरुपधिपरदुःखहानेच्छात्मकृपावाचित्वेनैवाभ्युपेयः, ततश्च शब्दशक्त्यैव तेषां तद्विषयत्वलाभः । यद्यपि वदिरभिवादनस्तुत्योर्वाचकः तथापि प्रणतिविशेषपूर्वकाशीर्वचनात्मनोऽभिवादनस्य प्रकृतेऽसंभवात्स्तुतिपरतया व्याख्येयः ॥ १ ॥

अनन्तरूपिणमिति । अनंतसंज्ञमित्यर्थः । संज्ञाया अर्थानुसारितामाह—**अनन्तगुणेति** । अनंतस्य गुणा अनन्ता वा गुणास्तैः संपन्नस्तं, कथं तादृशगुणवत्तालाभोऽभूदतोऽनन्तभजनेति । अनन्तस्य परमात्मनो भजनं सेवनं तदेव प्रियं कामनागोचरो यस्य तम् । ततश्च भजनमहिम्नैव तल्लाभ इत्याशयः । गुरुदेवतैक्यचिंतनद्योतनायाह—**आनन्देति** । आनन्दो विष्णुः 'आनन्दो नन्दनो नन्दः' इति विष्णुसहस्रनामसु पाठात् । यद्वाऽमुना पदेन अनन्तगुणवत्तोपपादनाय विष्णवभेदेन निर्दिष्टे तदुपपत्तयेऽनन्तभजनेति । अनन्तभजनाः विष्णुभक्तास्तेषां प्रियं, नहि विष्णुभक्ता विष्णुभिन्ने प्रियबुद्धिं कुर्युरित्याशयः ॥ २ ॥

यज्जैमिनिप्रणीतद्वादशलक्षण्यात्मकशास्त्रीयं विषयादि तदेवेहापि ग्रन्थ इति सूचनाय शास्त्रीयं विषयादि दर्शयन्वेदार्थत्वेन धर्मो जिज्ञास्यो न धर्मत्वेन, प्रथमसूत्रस्थाथशब्देन वेदाध्ययनस्य जिज्ञासाहेतुत्वोक्तेरिति मतं निराकरोति—**इहेति** । आदिरुपक्रमः । हेतौ तृतीया । धर्मो विचारितु इति विवक्षितप्रकारको निर्देशः । धर्मजिज्ञासेत्येवोपक्रमः कृतो जैमिनिना न वेदार्थजिज्ञासेति, तेन हेतुना धर्मत्वेनैव श्रौतस्मार्तसाधारणेनेह शास्त्रे धर्मो विचारितो न वेदार्थत्वेनेत्यर्थः । यद्यपि वेदाध्ययनानन्तर्यमेवाथशब्दार्थः, भाष्यकारेण 'तत्त वेदाध्ययनं तस्मिन् हि सति सावकल्पते' इत्यादिना तथा व्याख्यातत्वात् ; तथापि न वेदार्थत्वेन जिज्ञास्यता, चिकीर्षितविचारैकदेशहेतुत्वेनापि तदानंतर्याभिधानोपपत्तेः । अन्यथाऽध्ययनविधिविहितस्वाध्यायाध्ययनानन्तर्याभिधाय्यथशब्दवशेन कृत्स्नवेदार्थस्यापि जिज्ञास्यत्वानुपपत्तेः । यथा हि वेदाध्ययनं वेदार्थविचार एव हेतुर्न

धर्मजिज्ञासा' इत्यादिना द्वादशस्वध्यायेषु धर्मो विचारितः । तत्र स्मृत्यर्थविचारे एवमेकशाखाध्ययनमपि न शाखान्तरार्थविचारे हेतुः । स्यादेतत् । अर्थज्ञानोद्देशेनाध्ययनं विदधताध्ययनविधिना विचारमन्तरेण तदयोगाद्विचारोऽध्ययनेतिकर्तव्यतात्वेनाक्षिप्यते, करणं च विचाररूपेतिकर्तव्यतानुष्ठापकमित्यध्ययनस्य विचारहेतुत्वं सिद्धान्तिनोच्यते; तत्रैकशाखास्थप्रयोगविध्यर्थनिर्णयस्य शाखान्तरीयाङ्गवाक्यविचाराधीनत्वात् 'पुरोडाशं चतुर्द्धा करोति' 'द्वयोः प्रणयंति' 'उक्त्थान्निगृह्णाति' इत्यादिवाक्यार्थनिर्णयस्य च 'आग्नेयं चतुर्द्धाकरोति' अध्वर्युप्रतिप्रस्थातारौ प्रणयतः, तं पराञ्चमुक्थेभ्यो निगृह्णाति' इत्यादिशाखान्तरीयवाक्यविचाराधीनत्वादेकशाखाध्ययनेनापि शाखान्तरविचारोऽवश्यमनुष्ठाप्यते, अतः सुंभवति स्वाध्यायाध्ययनस्य वेदार्थविचारं प्रति हेतुत्वमिति तर्हि श्रौतानामिव स्मार्तानामाचारप्राप्ताङ्गानामप्यनुष्ठापनं कुर्वतां प्रयोगविधीनामर्थनिर्णयाय तेन स्मृत्यादिविचारोऽप्यनुष्ठाप्यत इति संभवति तस्यापि प्रतिज्ञाविषयत्वमित्याशयः । सूत्रं तु विश्वजिन्न्यायेन स्वर्गफलकोऽध्ययनविधिर्न विचारमाक्षिपतीति बाधकाभावेऽधीत्य स्नायादिति स्मृतिवशाद्ध्ययनानन्तरं समावर्तनं कार्यमिति शङ्कायां प्रवृत्तमित्थं व्याख्येयं—यतो दृष्टार्थावबोधफलकत्वे संभवति स्वर्गकल्पनानुचिता, स्मृतिश्चानन्तर्यात्मकक्रमविधित्वाभ्युपगमे विरुध्यमानाप्यध्ययने स्नानपूर्वकालतामात्रविधित्वेन भवत्युपपन्ना, 'वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ती'त्यादिना तथा तेषु वर्तेथाः' इत्यन्तेन ग्रन्थेन तैत्तिरीयैर्वेदाध्ययनान्ते वेदार्थोपदेशकर्तव्यतोपदेशाच्चैवमेव व्याख्यातुमुचिता । अतोऽध्ययनानंतरं धर्मजिज्ञासैवोचिता न स्नानमिति । अध्ययनविध्यर्थं त्ववसरे वक्ष्यामः । अथ न धर्मः शास्त्रे विचारितः प्रत्यध्यायं प्रमाणभेदशेषादीनामर्थान्तराणां निरूपणान्न कलञ्जं भक्षयेदित्यादिवाक्यार्थाधर्मस्य षष्ठे निरूपणाच्चेत्यत आह—द्वादशस्विति । धर्मसंबन्धिनामेव प्रमाणादीनां निरूपणीयत्वाद्धर्मस्य धर्मप्रतिस्पर्द्धितया निरूपणीयत्वाच्छास्त्रविषयत्वं धर्मस्यैवेति भावः । ननु धर्मपदमपूर्वाभिधायीति काणादप्रसिद्धिः, न च प्रत्यधिकरणमपूर्वं चिन्त्यत इत्याशंक्य सूत्रस्थधर्मपदार्थमाह—तत्रेति । यागादिकर्तरि अपूर्वसंज्ञाज्ञानशून्यैरपि धार्मिकपदप्रयोगात्तानि धर्माणि प्रथमान्यासन्निति श्रुतौ यज्ञे धर्मपदप्रयोगात्, इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् । अयं तु परमो धर्म इत्यत्राप्येषां मध्येऽयं परमो ब्राह्मण इत्यत्र षष्ठ्यन्तपदनिर्दिष्टानां ब्राह्मणत्वादिज्यादीनां धर्मत्वप्रतीतेर्नादृष्टवाचि धर्मपदं किं त्वदृष्टव्यापारेण यत् बलवदनिष्टाननुबन्धिफलकरणमनदृष्टं तद्वाचीत्याशयः । वेद-

वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः । यथा यागादिः । स हि 'यजेत स्वर्गकामः' इत्यादिवाक्येन स्वर्गमुद्दिश्य विधीयते ।

पदं च पारायणविधाविव न मन्त्रब्राह्मणग्रन्थपरमसंभवापत्तेः, नापि तदन्तर्गतवाक्यामिप्रायं किं त्वपौरुषेयवाक्यपरं, तेन लिङ्गादिकल्पितश्रुतिविहितानामपि धर्माणां संग्रहः । विधीयमानत्वं चाज्ञातज्ञाप्यत्वं न प्रयुज्यमानत्वम्, अप्रयोज्यस्यापि पञ्चमवर्षादिकालस्य धर्मत्वात् । यथाहुः श्रेयस्करभाष्यव्याख्यावसरे भट्टाः—श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः । चोदनालक्षणासाध्या तस्मात्तत्रैव धर्मतेति। अत्र च 'यस्मिन् प्रीतिः पुरुषस्य' इति पुरुषार्थलक्षणान्तर्गतप्रीतिपदेन श्रेयःपदव्याख्यानाद्दध्यग्निहोत्रगोदोहनादेर्धर्मत्वं स्थापयिष्यते इति चैतद्वार्तिकात्पूर्वत्र भट्टोवेकोक्तेः, भावार्थाधिकरणे च फलभावनाकरणस्यैव धर्मत्वोक्तेः, को धर्म इति स्वरूपजिज्ञासातः कानि साधनानीति पृथगङ्गजिज्ञासोक्तेश्च क्रत्वर्थानां धर्मत्वाभावे तदसंग्रहाय **प्रयोजनमुद्दिश्येति** । कामशब्दोपात्तं प्रयोजनपदार्थः । तत्साधनत्वेनाज्ञातज्ञाप्यमिति विशिष्टार्थः । अस्ति च विश्वजिदादीनामपि कल्प्यकामपदेन फलनिर्देशः । यदि तु वाजपेयानुष्ठानमजानन्द्विर्बृहस्पतिसवकर्तरि धार्मिकोऽयमिति व्यवहारात् क्रत्वर्थानामपि धर्मत्वं तदा विवाहार्थानृतवदनाभ्यनुज्ञाज्ञात्रेण निषेधातिक्रमनिमित्तानिष्टाननुबन्धित्वेनाज्ञातज्ञाप्येऽतिप्रसङ्गवारणाय **प्रयोजनमिति** । नहि तेन शास्त्रेणानृतवदनं क्रतूपकारस्य स्वर्गादेर्वा हेतुत्वेन ज्ञाप्यते । न च विवाहाख्यश्रेयःसाधनत्वादुक्तरूपेण वेदबोधितत्वाच्चास्तामस्यापि द्वितीयसूत्रानुसारेण श्रेयस्करभाष्यानुसारेण च धर्मत्वमिति शङ्क्यम् । धर्मत्वं वेदबोधितश्रेयःसाधनतेति **भट्टोक्तेः** । यथाहुः—

श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते ।
ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः ॥ इति ।

बलवदनिष्टाननुबन्ध्यर्थकमर्थपदं श्येनवारणाय । ननु नैव श्येनस्यानिष्टहेतुत्वं तस्य विहितत्वेन निषेधाविषयत्वात् । नच तद्विधौ करणेतिकर्त्तव्यतयोर्विहितत्वेऽपि फलांशस्याविहितत्वान्निषेधविषयत्वमिति वाच्यं, वैरिमरणस्य हिंसानिषेधाविषयत्वात् । नच यद्वैरिमरणं भावयेदिति तद्भावनाया अनुवाद्यत्वान्निषेध्यत्वं, भावनाया अनुवाद्यत्वे तद्विशेषणैकत्वादेरविवक्षाप्रसङ्गात् । अतः कथमनर्थत्वं श्येनस्येति चेत् ? वैरिमरणं मया कर्त्तव्यमिति संकल्पस्य भावनाशरीरान्तर्गतस्यापि रागतः प्राप्तत्वेन विध्यसंस्पृष्टस्य निषेध्यत्वादिति गृहाण । यद्वा यो

१ भट्टोवेको वार्तिकव्याख्याता ।

तथा हि—यजेतेत्यत्रास्त्यंशद्वयम्, यजिधातुः प्रत्ययश्च। तत्र

हि हिंसितुमिच्छेदिति भाष्येण हिंसाफलकत्वावगमाद्धिंसापदस्य च प्राणवियोगानुकूलव्यापारवाचित्वात् वैरिमरणफलोपहितव्यापारः कश्चिच्छ्येनादिफलम्, अस्ति च प्राणवियोगानुकूलदृष्टोपायेनेव श्येनादिना तमनुष्ठापयतो निषेधातिक्रम इति संभवति श्येनादेरनर्थत्वम्। नचैवमस्याधर्मपदवाच्यतापत्तिः, अनिष्टानुबन्धित्वेपि स्वरूपेण निषिद्धत्वाभावान्निषिद्धस्यैवाधर्मत्वात्। यदि तु स्वयमनिषिद्धेपि परंपरयाऽनिष्टानुबन्धिन्यधर्मपदं लोके प्रयुज्यते भवतु तदा श्येनादेरधर्मत्वम्। यथाहुः—

अतः स्वतो न धर्मत्वं श्येनादेर्नाप्यधर्मता।
फलानर्थानुबन्धित्वात्तद्द्वारेणोपचर्यते॥
यदा त्वप्रीतिहेतुर्यः साक्षाद्व्यवहितोऽपि वा।
तस्याधर्मत्वमुच्येत तदा श्येनेऽप्यधर्मता॥ इति।

अथ नित्यनैमित्तिकानां प्रयोजनमुद्दिश्य विधानाभावाद्धर्मत्वानुपपत्तिः। न

पूर्वां संध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति।

इत्यादिस्मृतिभ्यो यद्रात्र्या पापमकार्षमित्यादिमन्त्रेभ्यश्च पापक्षयमुद्दिश्य तेषां विध्यवश्यंभावात्। उपपादितं च पापक्षयफलकत्वमेषां सर्वशक्त्यधिकरणे मिश्रैः। यद्यपि न्यायसुधाकृतो नैतन्मतं, यच्चोक्तं यावज्जीवाधिकरणे तेन—

संध्योपासनमात्राद्धि सर्वपापक्षये सति।
अग्निहोत्राद्यनुष्ठाने कः प्रवर्तेत बुद्धिमान्॥
एकस्य तु क्षये कस्येत्यवगन्तुं न शक्यते॥ इत्यादि।

तथापि तेन स्वकाले क्रियमाणानां नित्यादीनामकरणजन्यदोषाभावफलकत्वाभ्युपगमादुक्तस्मृतिमन्त्रेभ्यश्चातिक्रान्तेऽपि काले विहिताकरणोत्पन्नदोषनाशाय कर्तव्यत्वाभ्युपगमात्संभवत्येव तन्मतेऽपि तेषामुक्तविधधर्मत्वम्। अथ 'यजेत स्वर्गकामः' इत्यत्र यागस्यैव भावनोद्देश्यत्वान्न फलोद्देशेन तद्विधिसंभवः। न च प्रत्ययवाच्यभावनया समानाभिधानश्रुत्यवगतविध्यन्वयविरोधान्न यागस्योद्देश्यत्वसंभव इति शंक्यम्। धातुप्रत्ययोभयश्रवणे प्रतीयमानभावनाया धातुवाच्यत्वं परित्यज्य प्रत्ययवाच्यत्वे नियामकाभावात्। प्रत्युत यजेतेत्यस्य विवरणे यागेन भावयेदित्यस्मिन्भावयतिना सहाख्यातोच्चारणात्, पर्याययोश्च सहानुच्चार्यत्वनियमाद्धातुवाच्यत्वमेव वक्तुमुचितम्। तथा च समानाभिधानश्रुत्यवगतयागभाव्यकत्वानुरोधेन पदश्रुत्यवगतविध्यन्वय एव हेय इत्यत आह—तथाहीत्यादि।

अंशद्वयं शक्तशब्दद्वयम् । धातुरितिवाच्ये यजिधातुरित्युक्तिर्यज्यभिधानेन चरितार्थस्य धातोर्न भावनावाचित्वमपि युक्तमिति द्योतनाय । न च सागात्मनैव धात्वभिहितव्यापारे . कारकान्वयसंभवान्नैव तदतिरिक्तभावनाभिधानमाख्यातपदे क्वापीति शङ्क्यम् । पचतीत्यस्य पाकं करोतीति विवरणानुपपत्तेः । घञन्तपाकादिपदोक्तव्यापारव्यतिरिक्तव्यापारस्यात्र करोतिना प्रतीतेः । न च पाकादिपदं फलमात्रपरं वक्तुं युक्तं, फलकाले पाको वर्तत इति प्रयोगापत्तेः । पैररनभ्युपगमाच्च । किंच स्वयमकारकस्य यागस्य सकलकारकविशेष्यात्मना धातुनाभिधाने तृतीयाद्वितीयान्तानां नाम्नामन्वयो न स्यात्स्याच्चोद्भिदादीनां भिनैव मत्वर्थलक्षणया गुणविधित्वम् । प्रत्ययोक्तिश्च भावप्रधानमाख्यातमितिस्मृतेरनुभवाच्च यजेतेत्यत्र विशेष्यभूताया भावनायास्तयोस्तु प्रत्ययः प्राधान्येनेति स्मृतेः प्रत्ययवाच्यत्वं युक्तमिति द्योतनाय । यथाहुः—

प्रत्ययार्थं सह ब्रूतः प्रकृतिप्रत्ययौ सदा ।
प्राधान्याद्भावना तेन प्रत्ययार्थोऽवगम्यते ॥
तथा क्रमवतोर्नित्यं प्रकृतिप्रत्ययांशयोः ।
प्रत्ययश्रुतिवेलायां भावनात्मावगम्यते ॥ इति ।

भावयतिना सहाख्यातोच्चारणं तु साधुत्वार्थं संख्याद्यर्थांतरकथनार्थं वेत्याशयः ॥ ननु प्रत्ययस्यापि विध्यभिधानेन चरितार्थस्य न भावनाभिधायित्वमुचितमित्याशङ्क्य शक्त्यवच्छेदकभेदेन न्याय्यमेवैतदित्यभिप्रेत्याह—प्रत्ययेपीति । अंशद्वयं शक्तावच्छेदकद्वयम् । नन्वाख्यातत्ववत् धातुत्वमेव यजिशक्तावच्छेदकभिन्नं भावनावच्छेदकमस्तु ' तयोस्तु प्रत्ययः ' इति स्मृतिस्तु सुबभिप्रायेण संकोच्यतां निर्वचनानर्हत्वं तु धातुत्ववदाख्यातत्वेपि तुल्यम् । यद्यादेशगामित्वाद्याख्यातत्वमुच्येत न तर्ह्येकशक्तावच्छेदकसिद्धिः । अथ स्थानिगामित्वमनुगताख्यातत्वं तर्ह्यादेशश्रवणादर्थबोधो न स्यात् । अथादेशोपस्थापितः स्थान्येवार्थबोधकः । उक्तं हि—स इति प्रकृतापेक्षः तत्प्रत्ययादिति भाष्यव्याख्यापरम् । अथवा तच्छब्दस्य प्रकृतग्राहित्वं प्रसिद्धं, स इत्युक्ते तच्छब्दप्रत्ययात्स एवार्थ इति वार्तिकं व्याचिख्यासता न्यायसुधाकृता । सर्वनामतच्छब्दादेशेन 'सः' इत्यनेन स्थानिनस्तच्छब्दस्य प्रत्ययादित्यन्यथा व्याचष्ट इति । यस्तु तिङर्थौ कर्तृकर्मणी इत्यादौ कर्त्रादावादेशार्थत्वव्यवहारः स स्थानिस्मृतिमुखेन तज्ज्ञाप्यत्वाभिप्रायेण नेयः । इदानींतनानां तु आदेशे शक्तिभ्रमादनुपस्थितेऽपि स्थानिनि अर्थबोधोपपत्तिरित्युच्येत । नैतत् । स्थानिनः स्वरूपेणार्थबोधकत्वानुपलम्भात् । यदि हि घटावित्यत्रौकारस्येव लकारस्य क्वचिदर्थबो-

प्रत्ययेऽप्यस्त्यंशद्वयम्, आख्यातत्वं लिङ्त्वं च । आख्यातत्वं च दशसु लकारेषु विद्यते । लिङ्त्वं पुनः केवलं लिङ्येव । तत्राख्यातत्व-लिङ्त्वाभ्यां भावनैवोच्यते ।

धकत्वं स्यात् तदा वारिणी इत्यत्रौकारादेशस्यौकारस्मारकत्ववल्लादेशस्य लकार-स्मारकत्वमाश्रीयेतेत्यत आह—आख्यातत्वं चेति । यद्दशसु लकारेषु वर्तते लत्वं तदेवाख्यातत्वमित्यन्वयः । नह्येवंरूपं धातुष्वनुगतं धातुत्वं वक्तुं शक्यम्, ऋक्त्वादिन्यायेन चानेकवर्णसमूहात्मकेषु धातुत्वं जातिः, धातुवाच्यत्वे च भाव-नाया यागदानादिशब्देभ्योऽपि भावनाप्रतीतिप्रसंगः । यद्याख्यातान्तधातुवाच्यतो-च्यते तर्हि लाघवादस्तु आख्यातवाच्यत्वं, यथाचैकवर्णात्मका अकारादयो विष्वा-दिषु शक्ताः सदा सन्तोऽपि न तान्सदा बोधयन्ति नाप्यकारादिपदोपस्थापिताः, श्रोत्रलिप्यन्यतरजन्योपस्थितेरेव तेषु शब्देषु तत्तदर्थबोधाख्यफलोपधानावच्छेदक-त्वात्, तथा लाघवात् 'लः कर्मणि' इत्यादेर्वेदाङ्गान्तःपातित्वेन वैदिकपरि-गृहीतपाणिनीयवचनाच्च लत्वेन शक्तिग्रहे जातेऽपि तिबाद्यादेशजन्योपस्थितेरेव भावनोपस्थितिफलोपधानावच्छेदकत्वान्न स्वरूपेणोच्चारिताच्छतृशानज्भ्यां स्मारि-ताद्वा लकाराद्भावनाप्रतीत्यभावो दोषाय । न च स्वयमशक्ताः शक्तशब्दान्तरस्म-रणेनार्थबोधार्थं प्रयुक्ताः शक्तिभ्रमाच्च शक्तत्वेन कैश्चिद्व्यवहृतास्तिबादयः कथं न गाव्यादितुल्याः स्युरिति शङ्क्यम्; सर्वसमभिव्याहारे स्वोपस्थित्यनपेक्षार्थबोध-करगवादिस्मारणेनार्थबोधकतया गाव्यादीनामशक्तिमत्वरूपापभ्रंशत्वस्य संभवात् । नहि गाव्यादिशब्दोपस्थितिमनपेक्ष्य गवादीनामिव तिबाद्युपस्थितिमनपेक्ष्य लकारस्यार्थबोधकत्वमस्ति येन तद्वदशक्तिमत्वं तिबादिषु वक्तुं शक्येत । यद्य-प्यौकारस्यास्ति स्वातन्त्र्येण बोधकत्वं तथापि न सर्वसमभिव्याहारेषु, वारिणी इत्यादिसमभिव्याहारे आदेशस्मारितस्यैव तस्य बोधकत्वात् । न चानादिवाचकत्वं साधुत्वं, येनावाचकेषु कथं स्यादिति शङ्क्यम् । कर्मधारयोत्तरभावप्रत्यये भावप्रत्ययोत्तरकर्मधारये वा सांकेतिकेषु तदभावेन साधुत्वस्य तादूप्यासंभवात् । अनादेरावपनवाचिनो गोणीशब्दस्य गवि साधुत्वापत्तेश्च । अथैतद्दोषपरिहाराय यदर्थवाचित्वं यस्यानादि स तत्र साधुरित्युच्येत सांकेतिकानां सादित्वेऽपि तच्छक्तेरनादित्वेन च तेषु साधुत्वमुपपाद्येत तत्र लक्षणया गौण्या वार्यातरे प्रयुज्यमानानामसाधुत्वापत्तेः । तस्मात्सर्वसमभिव्याहारेषु स्वोपस्थित्यनपेक्षार्थबो-धकशब्दस्मरणं विनैव यः शब्दो यमर्थं बोधयति स तत्र साधुरित्यवश्यं वाच्यम् । संभवति चैवंसति गवादीनामिव तिबादीनामपि साधुत्वमिति ज्ञेयम् । अथ

भावनावाचिसर्वाख्यातानुस्यूतमाख्यातत्वं यथा भावनाशक्तितावच्छेदकमङ्गीक्रियते तंथा विध्यभिधायिलिङ्लोडाद्यनुस्यूतं विधिशक्तितावच्छेदकमङ्गीकार्यं न लिङ्त्वं तत्राह—लिङ्त्वमिति । आख्यातत्वाद्वैलक्षण्यद्योतनार्थः पुनःशब्दः । यतः केवलं तादृशधर्मान्तरासमानाधिकरणम् अतो लिङ्त्वेव सदपि तदेव शक्तितावच्छेदकमित्यर्थः । स्यादेतत् । नाख्यातत्वमवच्छेदकं पच्यत इत्यादिषु भावकर्मप्रत्ययेषु भावनाभिधाने भावनया च कर्त्राक्षिपे सति पचतीतिवत् कर्तर्येव संख्यान्वयप्रसक्ते भवतिजानातीत्यादौ भावनाप्रतीत्यापत्तेश्च । अध्येतव्य इत्यादौ तव्यस्यानाख्यातत्वेन भावनाबोधकत्वानुपपत्तेश्च । नापि लिङ्त्वं विधिशक्तितावच्छेदकं हविरार्तिमार्च्छेज्जर्तिलयवाग्वाजुहुयादित्यादौ विध्यापत्तेरत आह—तत्रेति । तृतीयेत्यंभावे । आख्यातत्वरूपेण लिङ्त्वरूपेण च भावनोच्यत एवेत्यक्षरार्थः । कर्तृप्रत्ययेषु भावनाख्यप्रयोज्यव्यापारो वाच्यशरीरप्रविष्टोऽथवाक्षेपलभ्यः प्रयोजकव्यापारोपसर्जनत्वेन प्रतीयते । कर्मप्रत्ययेषु भावप्रत्ययेषु तु प्रयोजकव्यापारं प्रति विशेष्यत्वेन । यथाहुः—कदाचिदुपसर्जनीभूतप्रयोजकव्यापारः प्रयोज्यव्यापारो विवक्ष्यते क्रियेत कटो देवदत्तेनेतीति । एवं च पचतीत्यादिजन्यप्रतीतौ विशेष्यभूतं प्रयोजकव्यापारं प्रत्याश्रयत्वेन कर्तान्वेति, पच्यते ओदन इत्यादौ तु विशेषणीभूतव्यापारं प्रति कर्तुराश्रयत्वेनान्वयाद्विशेष्यभूतव्यापारं प्रति कर्माश्रयत्वेनान्वेति । एवं च भावप्रत्ययस्थलेऽपि पाकः क्रियत इत्येवं कर्मप्रत्ययेनार्थविवरणाद्विशेष्यभूतव्यापारं प्रति धात्वर्थ एवाश्रयत्वेनान्वेति । पच्यते स्वयमेवेत्यत्र तु विशेषणविशेष्यभूतौ व्यापारौ प्रत्येकस्यैवाश्रयत्वम् । आख्यातजन्यप्रतीतिविशेष्यव्यापारं प्रति च समानाभिधानश्रुत्या शेषत्वेनान्विताया: संख्याया द्वारापेक्षायां तादृशव्यापाराश्रयपरिच्छेदो द्वारमाश्रीयत इति नियमस्य सर्वाख्यातेषु स्वीकरणान्नैव क्वचित्कर्त्रन्वयादन्यत्र तत्प्रसक्तिशङ्कावसरः । यद्वा यथैवाख्यातत्वाविशेषेऽपि परमते प्रतीतिविशेषमनुसृत्य केचित्कर्त्रभिधायिनो न सर्वे तथास्मन्मते पचति पच्यत इत्यादीनां पाकं करोति पाकः क्रियत इति करोतिविवरणाविशेषात्समेऽपि भावनावाचित्वे क्वचिदेव कर्तृगतसंख्याभिधानं न सर्वत्र । भवतीत्यत्र तु भवनकर्तरि भावनाबाधान्नैव वक्ष्यमाणभावनाबोधकमाख्यातं, किंतु तेन व्यापारमात्रं बोध्यते तत्र च धात्वर्थोऽभेदेनान्वेति घटादिस्त्वाश्रयत्वेनेति बोध्यम् । अत एवोक्तं—

सिद्धकर्तृक्रियावाचिन्याख्यातप्रत्यये सति ।
सामानाधिकरण्येन करोत्यर्थोऽवगम्यते ॥

इह हि केभ्यश्चिद्धातुभ्यः परा तिङ्विभक्तिरुच्चार्यमाणा कर्त्रात्मलाभमेव

भावना नाम भवितुर्भवनानुकूलो भावकव्यापारविशेषः। सा च द्विविधा, शाब्दी भावनार्थी भावना चेति।

व्यापारं प्रतिपादयतीति। एवं च जानातीच्छति यतत इत्यादिष्वपि करोत्यर्थानुबोधकाख्यातेन बोधिते व्यापारसामान्ये धात्वर्थानामभेदान्वयो बोध्यः। अयं तु भेदः—ज्ञानस्य प्रमाणवस्तुपारतन्त्र्यादिच्छाया विषयसौन्दर्याधीनत्वात्तदुभयाधीनोत्पत्तिकत्वाच्च यत्नस्य धात्वर्थानां करोत्यर्थाविषयत्वात्प्रकृताख्यातानां व्यापारसामान्यपरत्वं, पूर्वत्र तु कर्तरि भावनाबाधादिति। वार्तिके च सिद्धकर्तृक्रियावाचिनीत्यनंतरं कृत्यन्वययोग्यधात्वर्थक्रियावाचिनीत्यपि बोध्यम्। एवमन्यत्रापि करोत्यर्थानवबोधकाख्यातेष्वूह्यम्। एवं च भावनां प्राधान्येन बोधयल्लाख्यातपदेषु 'तयोस्तु प्रत्ययः प्राधान्येन' इति स्मृतिवशाद्भावनायां प्रत्ययवाच्यत्वं स्वीकृतम्। कृदन्तेषु तु भावनाप्राधान्यसाधकस्मृत्यभावात्कर्त्रादिविशेषसमर्पकदेवदत्तादिपदेभ्य इव स्वप्राधान्येन कर्त्रादिप्रतीतेश्च कर्त्रादिभिश्च भावनाक्षेपसंभवान्न भावनाभिधायित्वम्। यथाहुः—

धात्वर्थकारकैरेव गुणभूतोऽवगम्यते।
भावनात्मा कृदन्तेषु तस्मान्नैवाभिधीयते॥ इति।

तव्यस्यापि कृद्विशेषकृत्यान्तर्गतत्वाद्भावनानभिधायित्वेऽपि कृत्यानां प्रैषे स्मरणात्प्रैषस्य च पुंव्यापारात्मकभावनाविषयत्वाद्भावनाक्षेपकत्वमस्ति। अध्येतव्य इत्यत्र त्वध्ययनस्याप्राप्तत्वात्प्रैषासंभवेन यद्यपि विधिपरत्वमाश्रीयते, उक्तं हि—'प्रवर्तनस्मृतिः प्राप्ते प्रैष इत्यभिधीयते। अप्राप्तप्रेषणं सर्वं विधित्वं प्रतिपद्यते॥' इति तथापि प्रैषविध्योः प्रवर्तनासत्त्वाविशेषादस्त्येव भावनाया आक्षेप इति युक्तमाख्यातत्वं भावनाशक्ततावच्छेदकमिति। सत्यपि लिङो विध्यभिधायित्वे यस्योभयं हविरार्तिमार्च्छेदित्यत्र यच्छब्देन विधिशक्तिप्रतिबन्धाद्विध्यनापत्तिः। य एवं विद्वानग्निं चिनुते यो दीक्षितो यदग्नीषोमीयमित्यत्र तु विद्वत्तादीक्षयोर्यच्छब्दान्वयान्न चयनपश्वालंभयोर्विधिप्रतिबन्धः। जर्तिलयवाग्वेत्यादि तु पयसा जुहोतीति विध्यन्तरशैषत्वान्न विधिपरम्। अतो युक्तमेवाख्यातत्वलिङ्त्वयोर्भावनाविधिशक्ततावच्छेदकत्वमित्याशयः। यद्यपि विधेराख्यातार्थभावनाभिन्ना यजेतेत्यादौ प्रतीयते तथापि गवानयनं कुर्वित्यत्र विध्यात्मनावगतस्य व्यापारस्य तत्कार्येत्यत्राख्यातार्थत्वात्तयोरनतिभेदद्योतनाय भावनेत्येकवचनम्। द्योतनफलं चार्थभावनास्वरूपनिरूपणावसरे वक्ष्यामः।

कोऽसावाख्यातार्थप्रतीतिविषयो भावनापदार्थो यद्भावशाद्भवतीत्याख्या-

तस्य व्यापारत्वमुच्यते, नहि भावना व्यापारभिन्नास्ति, सत्वं वा भवतीत्यादेर्लाक्षणिकत्वापात इत्यत आह—भावनेति । अत्र च नाख्यातशक्यतत्त्वच्छेदकं कथ्यते भवितृभावकयोस्तदन्तःपातानभ्युपगमात् । नापि भावनालक्षणं भवनानुकूलव्यापारत्वमात्रस्यैव लक्षणत्वसंभवेनेतरपदवैयर्थ्यापत्तेः सकलस्यापि प्रकृत्यर्थेतिप्रसक्तेश्च । किंतु यथा का धूमनिष्ठा व्याप्तिरिति प्रश्ने धूमत्वमित्युत्तरेऽतिप्रसङ्गादिदोषाभावेऽपि प्रश्नस्थव्याप्तिपदेन वह्न्यनुमितिकारणीभूतज्ञानविषयस्य विवक्षितत्वाद्यत्पदार्थविशिष्टं धूमत्वं तज्ज्ञानविषयस्तत्पदार्थविशिष्टधूमत्वप्रतिपादकमुत्तरमुच्यते तथा यजतिभवतीत्यादौ याद्दशार्थप्रतीत्यप्रतीतिभ्यां भावयतीत्याख्यातार्थविवरणभावाभावौ भवतस्ताद्दशार्थस्य पूर्वग्रन्थे भावनापदनिर्दिष्टस्योक्तविधजिज्ञासायामनुना ग्रन्थेन तत्स्वरूपं कथ्यते । न चैवं माख्यातार्थप्रतीतौ भवित्रादेर्नियतप्रतीत्याख्यातशक्यान्तःपातः शंक्यः । यथा करणत्वादौ गृहीतशक्तिकयापि तृतीयाविभक्त्याऽऽकाङ्क्षाविशेषसहकृतया क्रियासामान्यान्वितमेव करणत्वं गम्यतेऽत एव क्रियाङ्गत्वं श्रौतं क्रियाविशेषावगतिः परं पदान्तरलभ्येति व्यवहारः शास्त्रे, तथा व्यापारत्वेन व्यापारे गृहीतशक्तिकाख्यातादाकाङ्क्षासहितात्कर्तृनिष्ठतया भाव्यभवनानुकूलतया च व्यापारप्रतीतिसिद्धेः । यथा च प्राकाशावध्वर्यवे ददात्येकां गामित्यादौ परपदार्थसंबन्धविधिपक्षे बाधकवशादाकाङ्क्षाप्रापितक्रियान्वयत्यागेऽपि न विभक्तौ लक्षणा, शक्यार्थात्यागात् तथा भवतीत्यत्रासिद्धस्य घटादेः कर्तुः परभवनानुकूलव्यापाराश्रयत्वबाधादाकाङ्क्षाप्रापितभाव्यान्वयबाधेऽपि न लक्षणा आख्यातशक्यस्य व्यापारात्मनोऽपरित्यागात् । न च विशेषात्मना धातुनोपात्तस्य भवनस्य सामान्यव्यापारात्मना प्रत्ययेनाभिधानं व्यर्थमिति शङ्क्यं, भावयतीत्यत्रेव भवतीत्यत्रापि साधुत्वार्थमुच्चारितप्रत्ययेन जायमानप्रतीतेर्व्यर्थाया अप्यनिवार्यत्वात् । यथा च प्रयोज्यव्यापारविशिष्टप्रयोजकव्यापारवाचिभावयतिना प्रयोजकव्यापारमात्रवाचिन्यपि करोतौ पर्यायत्वप्रसिद्धिः, आकाङ्क्षासहितस्य करोतेर्भावयतितुल्यप्रतीतिजनकत्वात् तथा व्यापारमात्राभिधायिन्यप्याख्याते भावयतिपर्यायत्वप्रसिद्धिरुपपादनीया । अथ कोऽसौ कर्तृपदार्थो यदन्विततयाकाङ्क्षासहिताख्यातात्प्रतीयमानो व्यापारो भावयतिवत्प्रतीयत इत्युच्यते ? न तावदितरकारकप्रयोजकत्वं निर्वर्तकत्वं वा कर्तृत्वं, भवतीत्यादौ घटादेरसंभवात् । यद्याख्यातोपात्तव्यापाराश्रयत्वं तत्, उक्तं ह्येवं सांप्रदायिकैरस्मांशुक्लान्वारम्भणादिकर्तृत्वसमर्थनायेत्युच्येत तर्हि कर्तरि सिद्धे तदन्वितव्यापारप्रतिपादनमाख्यातेना-

ख्यातोपात्तव्यापाराश्रयस्य च कर्तृत्वमित्यन्योन्याश्रयमिति चेत्। न। यथासम-भिव्याहारं प्रथमान्तादिपदबोधितस्यैव कर्तृपदार्थत्वात्। ततश्च कर्तृव्यापारो-ऽन्यभवनान्वितो यजतीत्यादौ प्रतीयते न भवतीत्यत्रेति मूलार्थः। एवं च भवनान्वित इति वक्तव्ये भवनानुकूलपदं प्रयोजकप्रयोज्यव्यापारयोरनुकूलत्वं संसर्गविधया भासत इति द्योतनाय न त्वाख्यातजन्यबोधे तदपि प्रकार इति बोधाय, अनुकूलत्वस्यापि संसर्गान्तरप्रतीतिकल्पनायां गौरवात्। सकलधातूत्तरो-च्चारितेभ्यः सिद्धकर्तृक्रियावाचिभ्य आख्यातेभ्यः प्रतीतायाः क्रियायाः कर्माकाङ्क्षायां तदर्थैकद्वितीयान्तादिसमभिव्याहारस्यावश्यं वाच्यत्वाद्धातूनां सकर्मकाकर्मकात्मना द्वैविध्यं न स्यादिति शङ्कां निराकर्तुमन्यस्येति वक्तव्ये भवितुरित्युक्तम्। भावना हि भवनकर्तृत्वेनेप्सितत्वेन चोपस्थितमेव भाव्यमपेक्षते। तत्वेन चोपस्थितिः क्रमशब्दात्। स्वर्गो मे भवत्विति कामयमानपुंपरत्वात्स्वर्गकामपदस्य। अतः कामपदोपस्थापितं भाव्यमङ्गीकरोति। द्वितीयायास्तु सत्यपि क्वचिन्मते ईप्सितवाचित्वे धात्वर्थतावच्छेदकफलशालिनमेव तत्वेन साभिधत्ते नतु धात्व-र्थजन्यफलशालिनं नतरां यं कंचित्। अतिप्रसङ्गात्। अत एव धात्वर्थकर्मणो भावनाकर्मत्वविवक्षायां द्वितीयान्तेन तदर्पणं न तु तदन्यस्य तद्विवक्षायां, यथा वेतनकाम ओदनं पचतीति; अत एव च विश्वजिता यजेतेत्यत्र स्वर्गकाम इत्येव कल्प्यते न स्वर्गमिति। क्वचिद्भावनाया एव कर्म द्वितीयान्तेनागत्या ज्ञाप्यत इति स्वीकुर्मः। यथाग्निं चिनुत इति। नह्यत्राग्नेर्धात्वर्थकर्मत्वं धात्वर्थतावच्छेदकतया प्रतीयमानस्य स्थलनिर्वृत्यात्मनः फलस्य स्थलाश्रितत्वे-नाग्न्यनाश्रितत्वात्। उक्तं हि न्यायरत्नमालायां—येन धातुना यत्फ-लाभिधाननिरूपणीयेन रूपेण क्रियाभिधीयते तद्धातूक्तायां क्रियायां तत्फल-भागर्थः कर्म भवतीति। संभवति तु भावनाकर्मत्वमुद्देश्यत्वात्। एवं च सुखकामः शयीत स्वास्थ्यकाम आसीतेति कामपदेनैव भाव्यलाभान्नाकर्मक-धातुयोगे द्वितीयान्तसमभिव्याहार आवश्यक इति भावः। विशेषपदं च धात्व-र्थसमवायिव्यापारसामान्यं भावनेति मतनिराकरणाय। धात्वर्थभेदे हि भाव-नापि भिद्यते न च व्यक्तिभेदैः सामान्यं भिद्यते। अतो धात्वर्थातिरिक्त एव व्यापार आख्यातेन भावनारूपेण बोध्यत इत्याशयः। आख्यातजन्यप्रतीत्या प्रवर्तनाया अप्युक्तरूपेण क्वचिद्विषयीकरणाल्लक्ष्यान्तःपातो लक्षणान्वयश्चोपपाद-नीयः। आख्यातत्वलिङ्त्वावच्छिन्नशक्त्योर्विषयभेदं दर्शयितुमाह—सा चेति। शाब्द्यां भावनायां मतद्वयं वक्ष्यते प्रेरणात्मिका सेष्टसाधनता वेति। आद्ये शब्दनि-ष्ठत्वाच्छाब्दीति वक्ष्यति, द्वितीये शब्दैकगम्यत्वाच्छाब्दी। आर्थ्या अपि यत्नै-

तत्र पुरुषप्रवृत्त्यनुकूलो भावकव्यापारविशेषः शाब्दी भावना। सा च लिङ्त्वांशेनोच्यते, लिङ्श्रवणे 'अयं मां प्रवर्तयति' 'मत्प्र-

---

करूपत्वमद्वेऽर्थयत इत्यर्थः पुरुषः तद्गतत्वादार्थी। करणानुग्राह्यफलव्यापारात्मकत्वमते तु प्रथमान्तादिपदोपस्थापितार्थगामित्वादार्थी।

तत्रेति। विधेश्चेतनविषयत्वाच्चेतनाचेतनसाधारणं प्रवृत्तिपदार्थं विशेषयितुं **पुरुषेति**। यथा चैष साधारणस्तथाङ्गत्वलक्षणे वक्ष्यामः। यज्ञीयं प्रवृत्त्यनुकूलं स एव लिङर्थो न त्विच्छादिरिति ज्ञप्तये **विशेष** इति। आक्षेपजां पुरुषोपस्थितिमिव प्रत्यक्षजां लिङादिशब्दोपस्थितिमादाय तदुभयानुरक्तप्रवर्तनाप्रतीत्युपपत्तेर्न शब्दस्य शब्दवाच्यत्वापत्तिरिति ज्ञापनाय **श्रवण** इति। विशिष्टाभिधानाय हि विशेषणस्य नियता पूर्वोपस्थितिरपेक्ष्यते नतु विशेषणाभिधानम्। यथाहुः—विशिष्टग्रहणं नेष्टमगृहीतविशेषणम्। अभिधानभिधाने तु न केनचिदिहाश्रिते। इति। **प्रवृत्तिस्तु** यद्यार्थभावनात्मिका, 'भाव्यं तु तस्याः पुरुषप्रवृत्तिः' इति व्यवहारात्तदा तस्या आख्यातत्वावच्छिन्नशक्त्युपस्थापितायाआकाङ्क्षावशेन लिङर्थे प्रकारीभूय भानसंभवान्न लिङ्त्वावच्छिन्नशक्तिविषयता। **अथ तु** भावनादेश्च प्रवृत्तिविषयत्वेनेत्यादि**भट्टसोमेशोक्ति**वशेन मयैतत्कर्तव्यमिति सङ्कल्पात्मिका भावनाऽतो भिन्नैव प्रवृत्तिः, तद्द्वारेण च भावनाया विधिभाव्यत्वमिति स्वीक्रियते-एवमेव ह्यवादि **'भावनाविवेके महामुद्गलभट्टैः**—तदातस्या उपस्थापकान्तराभावाद्भवति शक्यान्तःपातः। **यत्तु** प्रवृत्तेर्भावनात्मत्वेऽपि लिङ्त्वावच्छिन्नशक्तिविषयत्वमावश्यकं, यतो भावप्रधानमाख्यातमिति स्मृत्याख्यातत्वावच्छिन्नशक्त्या लडादिष्विव लिङादिष्वपि प्रतीयमानभावनाया मुख्यविशेष्यतात्मकप्राधान्यकथनान्न लिङर्थं प्रति प्रकारतया भानं संभवति इति तत्तच्छम्। एकप्रत्यये द्विर्भावनाभिधानेऽतिगौरवात्। सर्वाख्यातेषु धात्वर्थनिरूपितभावनाप्राधान्यकथनेन स्मृत्युपपत्तेः। निरपेक्षशक्यताशालिन्योर्विधिभावनयोर्युगपदेकशब्दोपस्थापितयोः संख्याकारकन्यायेनान्विताभिधानेऽवश्यवाच्ये मूलोपन्यस्तप्रतीतिमनुसृत्याख्यातार्थस्य लिङर्थं प्रति प्रकारतौचित्याच्च। नहि पुष्पवन्तावितिपदं प्रति सूर्यचन्द्रयोरिव विधिभावनयोर्मिलितयोः शक्यतेति वक्तुं शक्यं, लडादिषु भावनाया अप्रतीतिप्रसक्तेः। नाप्यनेकार्थाक्षादिवत्तयोः प्रत्ययं प्रत्ययः क्रमेण जनयति नाप्येकशेषवल्लुप्तानेकशब्दसहितः, येन तत्तद्दृष्टान्तेनानन्विताभिधानं तयोः प्रसज्येत। एतेन प्रवृत्त्यन्यभावनापक्षेऽपि विधिभावनयोरवश्यवक्तव्येऽन्वये भावनां प्रति स्वर्गादिभाव्यस्य विशेषणतायाः

वृत्त्यनुकूलव्यापारवानयम्' इति नियमेन प्रतीयमानत्वात्। यच्च

क्लप्तत्वाद्भावनाया अपि विधिं प्रति विशेषणत्वमेवोचितम्। अत्र व्यापारे मां प्रवर्तयतीत्यनुभवांच्च। अत्र च ग्रन्थे न साक्षाल्लिङ्जन्यप्रतीतिर्लिङः प्रवर्तनाभिधायित्वसाधकतयोपन्यस्यते। शास्त्रानुमतयावद्विशेषणविशिष्टाधिकारिकर्मकविधेयविशेषाङ्कितप्रवर्तनां लिङानुभूय तावद्विशेषणवैशिष्ट्यमात्मनि पश्यतः पुरुषस्य मामयं प्रवर्तयतीति प्रतीतिसंभवात्। नहि स्वर्गकामपदकल्पनाप्राग्विश्वजिता यजेतेति विधिं शृण्वतः संभवति प्रतीतिर्मामयं प्रवर्तयतीति। तदूर्ध्वं त्वतिदेशादिविशिष्टममुमालोचयतो नासोमयाजी सन्नयेदितिवद्विश्वजिति पुरुषविशेषपर्युदासाभावमनुपलम्भेन निर्णीतवतो भवति प्रथमं प्रतीतिः, इष्टप्रथमयज्ञं कृतदर्शपूर्णमासं स्वर्गकाममयं प्रवर्तयतीति। ततश्च तादृशोऽहमिति निश्चयवान् स इत्थमुपलभते मामयं प्रवर्तयतीति। अत उदाहृतप्रतीतिः स्वजनकीभूतप्रतीत्यन्तराक्षेपमुखेन तज्जनकतया लिङः प्रवर्तनाभिधायित्वसाधिकेति विवक्षितम्। सूचितं चैतद्विलक्षणार्थकवाक्यद्वयोल्लेखिप्रतीत्युपन्यासेन। अयं मां प्रवर्तयतीतिवाक्यं हि स्वमते क्रियाविशिष्यकबोधजनकं द्वितीयं तु शब्दादिविशेष्यकमेव बोधं जनयति। नच लिङ्जन्यप्रतीतेर्द्वैरूप्यं, तस्याः प्रवर्तनाविशेष्यकत्वनियमात्। संभवति त्वार्थिकबोधस्यानियतविशेष्यकत्वमिति। अथ प्रवर्तनाज्ञानमपि न वाय्वादिवत्प्रवृत्तिजनकं किंतु समीहितहेतुताज्ञापनेनेति वरं लिङः समीहितहेतुतावाचित्वमङ्गीकृतमत आह—नियमेनेति। यद्यपि समीहितहेतुताज्ञानादेव प्रवृत्तिस्तथापि न तज्जननेन लिङः सर्वस्य प्रवर्तकत्वं येन तद्वाचित्वमङ्गीक्रियेत, विवाहेऽनृतं वदेद्देवान्पितॄन्समभ्यर्च्य मांसमश्नीयादित्यादिविधिभिः प्रवृत्त्यै स्वविषयस्यानिष्टाजनकत्वज्ञाननननात्। प्रवृत्त्युपयोगिनो विवाहतृप्त्यादीष्टहेतुताज्ञानस्यान्वयव्यतिरेकसिद्धत्वेन विधिना तज्जननवैयर्थ्यात्। न चैवमनिष्टाजनकत्वं शक्यमिति शङ्क्यम्। अग्निहोत्रं जुहुयादित्यादिविधिनेष्टसाधनत्वस्य प्रकारान्तरेणाप्राप्तस्य ज्ञापनात्। निषेध्यस्यानिष्टहेतुत्वस्याप्रसक्तस्य निषेधासम्भवाच्च। श्येनविधिनानिष्टाहेतुत्वज्ञापनासम्भवाच्च। न चानियतप्रतीतिजनकतया लिङोऽनेकार्थाभिधायित्वं युक्तम्। प्रवर्तनाभिधायिना तु लिङा सर्वत्रापि नियमेन जनिता प्रवर्तनाप्रतीतिः क्वचिदिष्टहेतुताज्ञानव्यापारेण क्वचिदनिष्टहेतुताज्ञानव्यापारेण प्रवृत्तिं जनयतीति युक्तमित्याशयः। यच्चेति। नियमेनेत्यनुवर्तते। तेन च लभ्योऽर्थो द्विविधः—यस्माच्छब्दाद्यद्भासत एव न तु कदाचिदुच्चारितान्न भासते यथा गोशब्दात् षण्डव्यक्तिः, यथा वा

यस्मात्प्रतीयते तत्तस्य वाच्यम्, यथा गोशब्दस्य गोत्वम्। स च बर्हिरादिशब्दात्संस्कारविशेषः। यस्मादनंतरं प्रतीयमानश्च यस्माच्छब्दादेव प्रतीयते न तु तद्बोधितार्थाक्षेपात्, यथाऽख्यातबोधितभावनाक्षेपात्कर्ता यथा वा वत्सादिपदोपस्थापितादवस्थाविशेषाद्गोत्वमिति। अथ भावनान्यप्रवृत्तिपक्षे नागृहीतविशेषणान्यायेन प्रवृत्तेर्नियतप्रत्याय्यत्वाज्जातिवत्सैव लिङः शक्यास्तु। नत्वाज्ञादिरनियतो व्यापारः, तत्प्रतीतिस्तु यद्यपि नाक्षेपाद्घटते प्रवृत्तेस्तदविनाभावाभावात्, तथापि लक्षणया भविष्यति। मञ्चाः क्रोशन्तीतिवत्सम्बन्धमात्रेण लक्षणोपपत्तेरिति चेन्न। तत्रैव हि शक्यतापर्याप्तिर्यन्मात्रप्रतीत्यै भवति शब्दसंयोगो यथा गोः सामान्यविशेषोभयात्मकत्वेपि सामान्यज्ञापनार्थोच्यते गवा क्रीणातीति, यथा गीतिमात्रप्रतीत्या एकं साम तृच इति। यत्र तु नैवं तत्र विशिष्टमेव शक्यं यथा स्तुषानस्त्रादिशब्देषु देवतातद्धितेषु वा। नहि ते पुत्रमात्राभिधायिनो देवतामात्राभिधायिनो वा। एवं लिङादीनामपि प्रवृत्तिमात्रप्रत्यायनाय प्रयोगादर्शनात्प्रवर्तनाभिधायित्वमिति। यद्यच्छब्दज्ञाप्यं तत्तद्वाच्यमित्युक्त्या च ज्ञाप्यज्ञापकभाव एव पदपदार्थयोरनादिः संबन्धो न तु पुरुषसंकेतात्मेति सूचितम्। आदैजादिषु वृद्ध्यादिव्यवहारे पाणिनिसंकेतस्येव सर्वार्थेषु सर्वशब्दव्यवहारे पुंविशेषसंकेतस्योपजीव्यत्वे हि पाणिनिवत्स स्मर्येत। इदानींतनेन च केनचिदश्वादौ संकेतेन गोपदे प्रयुक्ते परे नेत्थं ब्रूयुः न गोपदमश्ववाचकममुना संकेतेन प्रयुक्तम्' इति। गव्यश्वे च संकेताविशेषात्। न च संकेतमन्तरेणार्थबोधकः शब्दः प्रथमप्रयोगेऽपि बोधयेदिति शङ्क्यं, वृद्धव्यवहारादिजन्यसंबंधग्रहस्य तत्सहकारित्वात्। उक्तन्यायेन व्यक्तेरवाच्यत्वमभिप्रेत्याह—गोत्वमिति। नचैवं लिङ्गसंख्याद्यन्वयः प्रातिपदिकार्थे न संभवतीति शङ्क्यम्। सामान्यविशेषयोरत्यन्तभेदाभावेन सामान्यात्मनाभिहितस्यापि विशेषात्मना तदन्वयसंभवात्। अत्यन्तभेदेऽपि जातिवाचिषु विंशत्यादिभिन्न(गुण)वाचिषु च निरूढलक्षणोपस्थापितव्यक्तावेव तत्स्वीकरणात्। विंशत्यादिशब्देषु हि लक्षणया संख्येयपरेष्वपि क्वचिल्लिंगसंख्यान्वयः शक्यसंख्यायामेव दृश्यते यथा 'विंशत्यात्रिंशताद्यर्वाङ् चत्वारिंशता हरिभिर्युजानः' इति षष्ट्या च दिवसैरिति च।

यत्त भवदेव आह—क्रियाकारकसंबन्धयोग्यपदार्थावगमे सति संबंधानुपपत्त्या लक्षणाङ्गीक्रियते। न च तदयोग्याकृतिमात्राभिधाने संभवति लक्षणा। क्रियापदस्य लक्षणया व्यक्तिपरत्वे तदन्वयप्रयोग्या व्यक्तिः कारकपदेन

लक्षणीया लक्षितायां च तस्यां तदन्वययोग्या व्यक्तिः क्रियापदेन लक्षणीयेत्यन्योन्याश्रयात् । अतो जातिव्यक्त्योरुभयोरभिधानविषयत्वेनैवं प्रतीतिः । अयं तु भेदः—यथा यागनिष्पादकत्वेन साक्षाद्यागगोचरा या कृतिः सैव स्वर्गोद्देश्यकत्वात्तत्कृतिरित्यप्युच्यते तथा साक्षादाकृतिमेव विषयीकुर्वन्नभिधाव्यापारो व्यक्त्युद्देश्यकत्वाद्भवति तद्विषयः । यस्तु व्यक्तौ लक्षणानिर्देशः स व्यवधानाभिप्रायेण । एवं च यावज्जीवाधिकरणसिद्धान्ते संबन्धसामान्याभिधायिनैव णमुल् निमित्तत्वाख्यविशेषाभिधानात्पूर्वपक्षिणं प्रति काललक्षणाप्रसंजनं संगच्छते । सामान्येन विशेषलक्षणायां तु दोषसाम्यं स्यात्स्वमतेऽपीति, तन्न । अरुणगुणस्येव जातेरपि कारकत्वसंभवेन क्रियान्वययोग्यत्वासिद्धेः, अयोग्यत्वेऽपि निरूढलक्षणया अनुसंधानानपेक्षत्वेनोक्तदोषानवतारात् । अनुपपत्तिवशेन लक्षणास्थलेऽपि मञ्चाः क्रोशन्तीत्यादावभिधोद्देश्यत्वेन पुरुषादिधीसंभवेन लक्षणोच्छेदापत्तेश्च । निरूढसांप्रतिकलक्षणयोः सांप्रतिक्या अन्याय्यत्वात्संभवत्येवोक्ताधिकरणे परं प्रति तदापादनम् । अथ तदेवाभिधोद्देश्यं यन्नियमेन तत्प्रयुक्तप्रतीतिभाक् भवति यथा व्यक्तिः । न च मञ्चपदात्पुरुषो नियमेनाभिधोद्देश्यतया प्रतीयत इति तत्प्रतीत्यै लक्षणाश्रयणं तन्न । तदेव हि शब्देन लक्ष्यं यत्र तात्पर्यं, यत्प्रतीतिमुद्दिश्य च यः शब्दोऽर्थमभिधत्ते स तत्पर इति कथं लक्ष्यस्य नाभिधोद्देश्यत्वम् । उक्तं च भवतैव 'अभिधानशक्तेरेवाभिधेयाविनाभावोपस्थापितार्थतात्पर्याया लक्षणाशक्तित्वम्' इत्यरुणाधिकरणे । तस्माद्यच्छब्दाभिधेयं तदुद्देश्यकाभिधानं कुर्वञ्छब्दो मुख्यः । अभिधेयाविनाभूतं तत्सदृशं चोद्दिश्य प्रवृत्तस्तु लाक्षणिको **गौणो** वेति संभवति व्यक्तेर्लाक्षणिकत्वम् ।

अथ न प्रवर्तनात्वेन प्रवर्तनावाचको लिङ्, 'विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इतिसूत्रे लिङो नानार्थत्वोपन्यासेन शक्यतावच्छेदकभेदप्रतीतेरित्याशङ्क्येष्टसाधनतान्या प्रवर्तनेति मतमनुसृत्याह—**स चेति** । प्रवर्तनात्वेन लिङभिधेयाया अपि प्रवर्तनाया लौकिकवाक्येषु बहुविधपुरुषाशयरूपतया विध्यादिचतुष्टयेन विवरणमत्र सूत्रे क्रियते यतो विधिर्निकृष्टप्रवर्तनं यजेदिति । निमन्त्रणमावश्यके कर्मणि प्रवर्तनं श्राद्धे भुञ्जीत भवानिति । आमन्त्रणमभ्यनुज्ञात्मकं प्रवर्तनं ब्राह्मणः काममभीयादिति । अधीष्टः उत्कृष्टप्रवर्तनम् अध्यापयेद्भवानिति । नत्वत्र शक्यतावच्छेदकभेदो विवक्षितो गौरवादित्याशयः । यद्यप्येषां प्रवर्तनात्वेन शक्यतायामपि लिङोऽनेकार्थत्वमपरिहार्यम्, अस्मिन्नेव सूत्रे यतः संप्रश्नप्रार्थनयोरपि स्मर्यते लिङ्, किं भाट्टमधीयाय भोजनं

प्रवृत्त्यनुकूलव्यापारविशेषो लोके पुरुषनिष्ठोऽभिप्रायविशेषः, वेदे तु पुरुषाभावाल्लिङादिशब्दनिष्ठ एव। न हि वेदः पुरुषनिर्मितः।

लभेयेति चेत्; तथा सूत्रान्तरे कामप्रवेदनेऽकचितीति हेतुहेतुमतोर्लिङित्यादौ अर्थांतरेपि स्मर्यते तथापि, शक्यपरिहारं गौरवं न स्वीकर्तुमुचितमिति चतुर्णां प्रवर्तनात्वेनैव शक्यत्वम्। पृथिव्याद्यनेकार्थत्वेन स्वीकृतमपि हि गोपदं साक्षादिमत्स्वनुगतजातिवाच्येव स्वीक्रियते। यजेति प्रकृतिः। लिङर्थस्वरूपमाह—वेद इति। स इत्यनुषङ्गः। पुरुषाभावान्निर्मातुरभावात्। येन पुरुषेण निर्मितं यद्वाक्यं तदन्तर्गत एव लिङ् तद्गतां प्रवर्तनामभिधत्ते इति नियममभिप्रेत्येदम्। निर्मितत्वं च न ताल्वादिव्यापारकर्मत्वं वेदेऽपि तत्सत्त्वात्। नाप्यभिनवानुपूर्व्यात्मना रचितत्वं स्वाभिप्रेतज्ञप्तये प्रयुक्ते परनिर्मितश्लोकेऽन्तर्गतलिङा प्रयोक्तृगतप्रवर्तनाभिधानस्य दृष्टत्वात्। किंतु स्वानुपजीविमानान्तरबोधितार्थबोधनाय प्रयुक्तत्वम्। वेदस्यानुपूर्व्यात्मना रचितत्वे सकलपुरुषनिरूपितस्येदृग्विधनिर्मितत्वस्याभावो न वक्तुं शक्यत इति च तादृग्रचितत्वात्मकपौरुषेयत्वस्य निराकरणायाह—नेति। यतो वेदो धर्ममूलमित्यादौ स्वतंत्रमानत्वेन प्रसिद्धो वेदोऽतो नासौ पौरुषेयः मन्वादिस्मृतितुल्यत्वप्रसङ्गात्। परमते च योगमहिम्ना सर्वज्ञर्षीणां स्वभावतः सर्वज्ञेश्वरस्य ज्ञानप्रामाण्याविशेषेण तदुभयवचसोर्विशेषस्य वक्तुमशक्तेरित्याशयः। अथ वेदः पौरुषेयः वाक्यत्वात्, काठकादिसमाख्यानाच्च, त्रयो वेदा अजायन्तेतिश्रुतेश्च, मन्त्रार्थवादसिद्धप्रलयकाले प्रनष्टाध्येतृकपूर्ववेदस्य सर्गारम्भे सम्प्रदायाधिगमासम्भवेन पुरुषविशेषस्य तन्निर्मातृत्वकल्पनाया उचितत्वाच्च। वक्त्रा यत्प्रतीतिमुद्दिश्य यद्वाक्यमुच्चारितं तस्य तत्परत्वमिति लोकदृष्टतात्पर्यस्यापौरुषेयवाक्येऽसम्भवेनोपक्रमोपसंहारादेर्वेदवाक्यगततात्पर्यनिर्णायकत्वकथनानुपपत्तेश्च। शाब्दज्ञानप्रामाण्यस्याप्तवाक्यजन्यत्वाधीनत्वेन तदभावे शब्दोत्थज्ञानस्याप्रामाण्यतापाताच्च। न च समाख्यानं प्रवचननिमित्तं, प्रवचनस्यानेकपुरुषसाधारण्येनासाधारणव्यपदेशानिमित्तत्वात्। न च कर्त्रस्मरणादपौरुषेयत्वं, अस्मर्यमाणकर्तृकचिरकालिककूपादेस्तादृक्त्वप्रसक्तेः। न च पौरुषेयवाक्यप्रामाण्यस्य तत्कर्तृप्रत्ययाधीनसिद्धिकत्वात् अवश्यस्मर्तव्यस्य कर्तुरस्मरणं दृश्यादर्शनवदभावग्राहकमिति शङ्क्यम्, छन्दोगप्रसिद्धस्योहग्रन्थस्य कर्तुरस्मरणेनापौरुषत्वप्रसङ्गात्। न चेष्टापत्तिः। आम्नानादेव विशेषनिर्णये सति किमुत्तरयोर्योनिवर्णवशेन गेयमुत्तरावर्णवशेन वेत्यादिविचारानुत्थानापत्तेः। सत्यपि सर्वज्ञप्रणीतत्वेन तुल्यत्वे 'तद्विदां च स्मृतिशीले' इति वेदस्मृतित्वेन स्मृतीनां

वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।
वेदाध्ययनसामान्यादधुनाध्ययनं यथा॥

इत्यादिना वेदापौरुषेयत्वस्य साधितत्वात्। 'यः कल्पः स

प्रमाणत्वात् तासां दौर्बल्यं सेत्स्यतीति वदन्तं प्रत्याह—वेदस्येति। सर्वं निखिलशाखागोचरं न तु निखिलकालवर्ति पक्ष इति विवक्षितम्; इदानींतने सिद्धसाधनापत्तेः, दृष्टान्तत्वेन तदुपन्यासानुपपत्तेश्च। अतोतीतकालस्यैव पक्षता ज्ञेया। न च पूर्वानुमानवशेनामुष्य संप्रति साधनत्वं, स्मर्तव्यास्मरणबाधितत्वात्तस्य। युक्तं हि ऊहस्य पौरुषेयत्वं नावमिकन्यायसहकृताद्यद्योन्यां गायति तदुत्तरयोर्गायतीत्याद्यतिदेशवचनादुत्तराद्यारूढगानकर्तव्यतायास्तत्प्रमेयभूतायाः कर्तृप्रत्ययमनपेक्ष्यैव सिद्धेः। अनादरेणैव कर्त्रस्मरणसंभवात्। अपौरुषेयत्वे चाम्नानत एवोत्तराद्यृक्षु गानसिद्धावतिदेशवचोवैयर्थ्यापत्तेः। वेदप्रमेयस्य तु यागस्वर्गसंबन्धादेस्तत्कर्तृप्रत्ययाधीनसिद्धिकत्वेनावश्यस्मर्तव्यस्य कर्तुर्नियतरूपेणास्मरणाद्भवति तदभावनिर्णयः। किंच पराभिमतानुमानं जन्यमानान्तरमूलकत्वेन सोपाधिकम्। यद्धि प्रमाणवाक्यं पौरुषेयं तत्ताद्दगेवेति नियमः। न च वेदार्थः प्रत्यक्षेण ग्राह्यः अविद्यमाने यागादौ शब्दान्तरादिगम्यवैजात्यस्य यागानुष्ठानानन्तरक्षणेऽविद्यमानस्वर्गादौ तत्साध्यत्वस्य च प्रत्यक्षेण ग्रहीतुमशक्यत्वात्। तदुक्तं 'सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलंभनत्वात्' इति। विद्यमानोपलंभनत्वे हेतुः इन्द्रियाणां सत्संप्रयोगे पुरुषस्य यद्बुद्धिजन्म तद्धि प्रत्यक्षमिति। प्रत्यक्षपूर्वकत्वाच्चानुमानादेर्न तद्ग्राह्यत्वमपि वेदार्थस्य सम्भवतीति नोक्तोपाधिशून्ये वेदे प्रमाणत्वाभिमते वाक्यत्वहेतुः पौरुषेयत्वं साधयितुमलम्। स्यादेतत्। मानान्तरग्रहीतार्थकं प्रमाणवाक्यं पुरुषेण निर्मातुं शक्यं नान्यदिति प्रमाणवाक्यं स्वपौरुषेयत्वाय स्वार्थग्राहकं मानान्तरमपेक्षते न तजन्यत्वमपि; अतः पौरुषेयप्रमाणवाक्यत्वं स्वानुपजीविमानान्तरग्राह्यार्थकत्वमात्रेण नियतमिति ईश्वरीयनित्यप्रत्यक्षग्राह्यत्वाद्वेदार्थस्य सम्भवति पौरुषेयत्वं वेदस्येति। तन्न। वेदप्रामाण्याधीनसिद्धिकेश्वरीयज्ञानमूलकत्वेन वेदप्रामाण्यकथने अन्योन्याश्रयात्। अथ क्षित्यादि सकर्तृकं कार्यत्वादित्यनुमानान्नित्यज्ञानवदीश्वरसिद्धौ तदीयज्ञानमूलकत्वेन वेदप्रामाण्यं सेत्स्यतीति चेन्न। यादृक्साध्यसंबन्धो दृष्टान्ते हेतोः कल्पितः तादृगेव साध्यं हेतुना सिध्यतीति अनित्यज्ञानवत एव क्षित्यादिकर्तुः सिद्धौ तदीयज्ञानस्यापि मूलप्रमाणं विना प्रामाण्यासिद्धेः। न च जन्यज्ञानवतः शरीरित्वापत्तेस्तत्र च

कल्पपूर्वः[1] इति न्यायेन संसारस्यानादित्वादीश्वरस्य च सर्वज्ञ-

मानान्तरविरोधान्नित्यज्ञानवत एव कर्तुः सिद्धिरिति शक्यम्। जन्यज्ञानवत्कर्तृत्वव्याप्यप्रकृतहेतोरेव तत्सिद्धिबाधकत्वात्। अथ दृष्टान्तदृष्टजन्यज्ञानवत्कर्तृसंभवे हेतुप्रभवा कर्तृसामान्यसिद्धिर्नित्यज्ञानवन्तमाक्षिप्य पर्यवस्यतीत्युच्येत तर्हि उष्णाग्निनियतेन हिमे दृश्यमानेन तृणविकारेण जाताग्निसिद्धिः प्रत्यक्षविरोधादुष्णाग्न्यसंभवेऽनुष्णाग्निमाक्षिप्य पर्यवस्येत्। तस्मान्नित्यज्ञानवज्जगत्कर्तृसिद्धिमिच्छद्भिरपि तस्यै वेदापौरुषेयत्वं स्वीकार्यं तदाहि· स्वतःप्रमाणाद्वेदात्स्यादपि तत्सिद्धिः।

अथाप्रमाणमेव वेदवाक्यमुक्तहेतोर्भवतु पौरुषेयमप्रमाणवाक्यरचनस्य मूलप्रमाणानपेक्षत्वादिति चेन्न। अप्रामाण्ये कारणान्तराभावात्। तथाहि—अनधिगततथाभूतार्थबोधकत्वं प्रामाण्यं तदभावस्त्रेधा संभवति—अबोधकत्वात्, अधिगतबोधकत्वात्, बोध्यस्य तथाभूतत्वाभावाद्वा। सोऽपि द्वेधा संभवति—अर्थक्रियाकारित्वगुणजन्यज्ञानविषयत्वादिसाधकाभावाद्वा बाधकमानान्तराद्वा। तदपि द्वेधा—मिथ्यैतदितिज्ञानं दुष्टकरणज्ञापितत्वं वा। वेदवाक्यस्य च दुष्टत्वं त्रेधा पुरुषसंबन्धात्स्यात्। पदपदार्थसंबन्धस्य पौरुषेयत्वात्, वाक्यतदर्थसंबन्धस्य तत्त्वात्, वाक्यस्य वा। तत्र न तावदबोधकत्वं वेदे वक्तुं शक्यम्। आकाङ्क्षादियुक्तेभ्यो गृहीतसंगतिकेभ्यो वैदिकपदेभ्यो वाक्यार्थबोधस्यानुभवसिद्धत्वात्। नचासौ मानान्तरेण केनाप्यधिगत इति निरूपितं प्रत्यक्षसूत्रे। विषयतथात्वनिश्चयात्मनोदितं च ज्ञानं न तत्सिद्ध्यर्थमर्थक्रियाकारित्वाद्यपेक्षते। अन्यथाऽर्थक्रियादिज्ञानस्याप्यर्थक्रियातथात्वसिद्ध्यर्थमर्थक्रियान्तरापेक्षत्वेऽनवस्थापत्तेः। अतथाभूतस्यापि स्वप्नस्यार्थक्रियादर्शनेन तस्यास्तथाभूतत्वेव्यभिचाराच्च। एतेन शाब्दबोधस्यासत्यवाक्यजन्यत्वमन्तरेण न प्रामाण्यमित्यपि निरस्तम्। प्रामाण्यघटकयावत्पदार्थानामुक्तविधया प्रकारान्तरेणैव सिद्धेः। न च वेदार्थे मिथ्यात्वप्रत्ययः स हि स्वर्गफलकविधिषु क्षणिककर्मण आमुष्मिकफलकत्वानुपपत्त्या स्यात्। निरस्ता चैषा पूर्वाधिकरणे। चित्राकारीर्यादिविधिषु चानन्तरं फलानुपलम्भात्स्यात्। घटते च तदर्थसत्यत्वेपि चित्राफलस्यानन्तरमनुपलम्भसंभवः। चातुर्थिकन्यायेन तस्य ऐहिकामुष्मिकत्वात्। कारीरीफलस्य तु ऐहिकस्वभावस्यापि वैगुण्यादनन्तरमनुपलम्भसंभवः। पदपदार्थसंबन्धस्य

---

[1] तथैवेति पाठः।

त्वादीश्वरो गतकल्पीयं वेदमस्मिन् कल्पे स्मृत्वा उपदिशतीत्येतावतैवोपपत्तौ प्रमाणान्तरेणार्थमुपलभ्य रचितत्वकल्पनानुपपत्तेश्च । ततश्च पुरुषाभावाच्छब्दनित्यैव सा । अत एव शाब्दीभावनेति व्यपदिशन्ति ।

पौरुषेयत्वं निरस्तं प्राक् । वाक्यस्य वाक्यार्थसंबन्धे तु पौरुषेयत्वं द्वेधा संभवति, वाक्यस्य वाक्यार्थे संकेतात्मकशक्तिस्वीकाराद्वा काश्यपीयमतानुसारेण वाक्यार्थानुमापकस्य वाक्यस्यानुमापकतानिर्वाहकसंबन्धे पुरुषप्रत्ययनिरूपितत्वाद्वा । तत्र वाक्यं तावत्पदसमुदायः एकार्थप्रतीतिजनकत्वोपाधिना पदेष्वेकवाक्यत्वप्रतीतिसंभवेन तदतिरिक्तस्य वाक्यस्य निष्प्रमाणकत्वात् । इत्थं चाकाङ्क्षादिप्रत्यक्षोपस्थापितपदार्थेभ्य एव लक्षणया वाक्यार्थप्रतीत्युपपत्तेर्न तत्र शक्तिमङ्गीकुर्मः नतरां संकेतत्वं तस्याः । न च संभवत्यनन्तवाक्यार्थेषु कस्यापि संकेतः । दृश्यते च पुरुषप्रत्ययमनपेक्ष्य श्रुतमात्राल्लोकवाक्यादपि बोध इति न द्वितीयोऽपि । तस्माद्वेदस्य प्रकारान्तरेणाप्रामाण्यशङ्काया असंभवात् पौरुषेयत्वेनैवाप्रामाण्यमित्यन्ध्यः पक्षोऽवशिष्यते । न च पौरुषेयत्वमुक्तानुमानात्सिध्यतीत्युक्तम् । न च समाख्यानात्तत्सिद्धिः, कठादिषु विशेषवृत्तिप्रवचनातिशयेन केनापि तदुपपत्तेः । कठचरणैः पुरुषैः परम्परयाधीयमानत्वेन वा तत्संभवात् । तदुक्तं 'आख्या प्रवचनात्' इति । 'तेभ्यस्तप्तेपानेभ्यः' इति श्रुतिवशेनाग्न्यादिकर्तृकत्वं वेदेषु वदद्भिः पौरैरपि इत्थमेव समाख्यार्थो वर्णनीयः । नचैतच्छ्रुतिवशेनैव तत्सिद्धिः । अस्या विध्यन्तरशेषत्वेन [स्वार्थे तात्पर्याभावात्] उच्चैष्टादिस्तुतिपरत्वात् । एतेन मन्त्रार्थवादेभ्यः सृष्टिप्रलयसिद्धिर्निरस्ता, तेषामपि विध्यन्तरशेषत्वेन स्वार्थे तात्पर्याभावात् । किंपरो धर्म इत्यादिप्रयोगाच्च तादर्थ्यात्मकं तात्पर्यं वेदेऽप्यविरुद्धम् । यत्प्रतीत्यर्थं यद्वाक्यं तत्परं तदिति तादर्थ्यं च न पुरुषव्यापारघटितमिति वक्ष्यामः ।

अभ्युपेत्यापि अनुमानादिना सृष्टिप्रलयेश्वरसिद्धिं न वेदस्य पौरुषेयत्वमित्याह—यः कल्प इति । संसारसादित्वे ह्यभिनवानुपूर्वीविरचनमवश्याभ्युपेयं स्यात् । न च तत्संभवति प्रथमोत्पन्नप्राणिनो व्याप्तिग्रहाभावेन स्तनपानादिप्रवृत्त्युपयोगीष्टसाधनतानुमित्यसंभवापत्तेः । धर्मादिशून्यस्य सुखाद्यभावप्रसक्तेश्च । न च भवदभिमतो वेदनिर्मातेश्वरोऽसर्वज्ञो येन गतकल्पस्थानुपूर्वीमज्ञानाद्वक्तुमशक्नुवन्नभिनवां रचयतीत्युच्येतेति पञ्चम्यन्तद्वयाशयः । यद्यपि परैर्नित्यज्ञानवानीश्वरोऽभ्युपगतः तथाप्यनुमानात्सिध्यन्नीश्वर उक्तन्यायेन अन्यज्ञानवानेव

सा च शाब्दी भावनांऽशत्रयमपेक्षते, साध्यं साधनमितिकर्तव्यतां चेति । तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेताऽऽर्थीभावना साध्यत्वेन संबध्यते, एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः । यद्यपि संख्यादीनामप्येकप्रत्ययगम्यत्वं समानं तथाऽप्ययोग्यत्वान्न तेषां भाव्यत्वेनान्वयः ।

करणाकाङ्क्षायां लिङादिज्ञानं करणत्वेन संबध्यते । तस्य च करणत्वं न भावनोत्पादकत्वेन, सन्निकर्षस्येव रूपादिज्ञाने, संनिकर्षात्प्राक् रूपज्ञानस्येव लिङादिज्ञानात्प्राक् शब्दधर्मभावनाया अभावप्रसङ्गात्, किंतु भावनाभाव्यनिर्वर्तकत्वेनैव । लिङादिज्ञानं

सिध्येत्, स्वीकुर्वन्ति च केचित्तं तथाभूतं स ईक्षांचक्र इत्यादिश्रुतिभ्य इत्यभिप्रेत्य स्मृत्वेति प्रमाणान्तरेणोपलभ्येति चोक्तम् ।

अपेक्षत इति । यजेतेत्यत्रार्थभावानायामिव शब्दभावनायां करणाद्यात्मना स्वांशान्वयप्रतीत्यै नायमपेक्षोपन्यासः, कर्तव्यतानागोचरप्रवर्तनान्तराभावेन कर्तव्यत्वेनाप्रतीयमानायास्तस्या इतिकर्तव्यतान्वयासंभवात् । प्राशस्त्यविधिज्ञानयोः करणेतिकर्तव्यतात्मनान्वयाननुभवाच्च । किंतु यजेतेत्यादिविधिवशात्पुरुष इव स विधिरप्यध्ययनविधिवशाद्भावनामनुतिष्ठन्कीदृशभाव्यान्वितां भावनामनुतिष्ठतीति जायमानाकाङ्क्षात्र निर्दिश्यते । यथाहि विहितव्यापारमनुतिष्ठतां ज्ञानवतां भवत्याकाङ्क्षा किमुमुष्य व्यापारस्य साध्यादीति तथैषापि । तत्रेति । किमस्यां साध्यत्वेन संबध्यत इत्याकाङ्क्षायां वक्ष्यमाणेत्याद्युत्तरं देयमिति व्याख्येयम् । संबध्यत इति भावनासाध्यतां प्रतिपद्यत इत्याशयेन, न तु तस्याः साध्यत्वेनान्वयो बोध्यत इत्याशयेन, एवमग्रेपि । अंशत्रयग्रहणेपि करणेतिकर्तव्यतयोरेव प्रवर्तनाभाव्यशरीरे निवेशो न भाव्यस्य । एकेति । अध्ययनविधिनार्थाद्यजेतेतिलिङं पुरुषप्रवर्तने प्रवर्तयता तत्समानाभिधानश्रुत्यवगतभावनाया एवोद्देश्यत्वेन स्वीकरणादित्याशयः ।

लिङादीति । आदिना प्रवर्तनाप्रवर्त्यतत्संसर्गाणां संग्रहः । अयमत्रेदृशं पुरुषं प्रवर्तयतीति ज्ञानं ह्युक्तन्यायेन समुद्भूतं करणतां प्रतिपद्यते । यद्वा लिङादिः कारणं यस्य तच्च तज्ज्ञानं चेति विग्रहः । लिङ्शब्देन च यजेतेतिप्रकृतस्य परामर्शः । तज्जन्यमेव हि प्रवर्तनाज्ञानं फलपर्यन्तां प्रवृत्तिं जनयितुमलं न लौकिकशब्दान्तरजन्यं 'न शास्त्रपरिमाणत्वात्' इति न्यायादित्याशयः । सर्वलिङ्जन्यज्ञानानामादिभूतमुपजीव्यं यज्ज्ञानं लिङ् प्रवर्तनाभिधायीति संबन्ध-

हि शब्दभावनाभाव्यार्थीभावनां निर्वर्तयति, कुठार इवच्छेदनम्। अतो लिङादिज्ञानस्य करणत्वेनान्वयः।

इतिकर्तव्यताकाङ्क्षायां प्राशस्त्यज्ञानमितिकर्तव्यतात्वेन संबध्यते। तच्च प्राशस्त्यज्ञानं 'वायुर्वै क्षेपिष्ठा देवता' इत्याद्यर्थवादै-

---

ज्ञानमिति यावत् तत्करणमित्यपि कश्चित्। भाव्येति। भाव्यनिर्वर्तकं तद्विशिष्टात्मना भावनाया निर्वर्तकत्वेन कथ्यत इत्याशयः।

इतिकर्तव्यतात्वेनेति। यथा हि यागेन स्वर्गे जनयितव्येऽपेक्षितोपकारं कुर्वतः प्रयाजादेरितिकर्तव्यतात्वं यागभावनायामेवं विधिज्ञानेन प्रवृत्तौ कर्तव्यांयामपेक्षितः प्रवृत्तिप्रतिबन्धकालस्यादिनिवृत्तिरूपोपकारः प्राशस्त्यज्ञानेन क्रियत इति भवति तस्येतिकर्तव्यतात्वं प्रवर्तनायाम्। प्राशस्त्यपदार्थश्च यद्यपि नेष्टसाधनत्वं तद्धि विधिबोधितमेवार्थवादैर्बोध्येतान्यद्वा। आद्ये वैयर्थ्यापातः, द्वितीये वेदतात्पर्यगोचरस्य तात्त्विकत्वावश्यंभावेनौदुम्बराधिकरणादौ कृतस्योर्गावरोधादिफलनिराकरणस्यानुपपत्तिः। नाप्यनिष्टाननुबन्धित्वं, तद्धि प्रवृत्तिप्रतिबन्धकालस्यहेतुदृष्टश्रमाद्यननुबन्धित्वमदृष्टानिष्टान्तराननुबन्धित्वं वा। आद्ये बाधः, अन्त्येऽप्रसक्तप्रतिषेधः। श्येनाद्यर्थवादेष्वसंभवाच्च। तथापि प्राशस्त्यं नाम गुणवत्त्वम्। यथाच ज्ञानजनकस्वभावे शब्दे ज्ञानगतयाथार्थ्यात्मकातिशयप्रयोजकं आप्तोच्चारितत्वादिधर्मः परैर्गुण इत्युच्यते, एवं फलगतक्षिप्रत्वाद्यतिशयप्रयोजकं विधेयगामि क्षिप्रदेवताकत्वादि गुणपदेन विवक्षितम्। तेनैव च रूपेण तं तं गुणं विधेयगामिनमर्थवादो बोधयति। शक्यते च वक्तुमुदुम्बरत्वपर्णत्वादिविशिष्टं काष्ठं पश्वपाप्रश्लोकश्रवणविशिष्टं क्रतुफलं जनयतीति केचित्। तन्न। यदि ह्युक्तविधगुणस्य फलगतातिशयजनकतावच्छेदकता विध्यनपेक्षेणार्थवादेन तात्त्विकी सिध्येत्, विधेयस्य फलसाधनता किं न सिध्येत्। न च वेदतात्पर्यगोचरस्यातात्विकत्वं वक्तुं शक्यम्। यद्यपि प्रवृत्तिमुद्दिश्य प्रवृत्तेनार्थवादेन तात्पर्यगोचर उक्तविधप्राशस्त्यं बोध्यत इत्युच्यते तथापि सर्वार्थवादेषु नोक्तविधप्राशस्त्यबोधकत्वसंभवः, 'एतानि वै दश यज्ञायुधानि, एकं वृणीते' इत्यादौ तादृशगुणासंभवात्। तस्माद्यज्ज्ञानं प्रवृत्तिप्रतिबन्धकालस्यादिनिवर्तकं स एव गुणः क्षिप्रफलदत्वादिस्तादृशज्ञानविषयतावच्छेदकीभूतरूपेण च तद्वत्तात्मकं प्राशस्त्यमालस्यादिनिवृत्त्यर्थमर्थवादो बोधयतीत्यन्ये। परे तु प्रशस्तमित्यत्र शंसतिना गुणवत्ताभिधानमुच्यते निष्ठाप्रत्ययेन तत्कर्म। ततश्च गुणवत्तयाभिहितमिति शस्तपदार्थः। गुण इष्टसाधनत्वं प्रशब्दार्थश्च प्रकर्षस्तात्पर्यात्मकोऽभिधानाऽ-

र्जन्यते । ते ह्यर्थवादाः स्वार्थप्रतिपादने प्रयोजनमलभमाना लक्षणया क्रतोः प्राशस्त्यं प्रतिपादयन्ति । स्वार्थमात्रपरत्वे आनर्थक्यं

न्वयी । तच्च तात्पर्येणेष्टसाधनतया बोधितत्वं प्राशस्त्यमर्थवादैर्बोध्यते । इत्थं च सर्वार्थवादानां प्राशस्त्यलक्षकत्वं संभवति । संगच्छते च 'अर्थवादोपपत्तेश्च लिङ्गं तात्पर्यनिर्णये' इतिप्राचामुक्तिः । न च तादृशप्राशस्त्यज्ञानस्य प्रवृत्त्यनुपयोगित्वं, सकृत्प्रयोजकवाक्यश्रवणेनोत्पन्नप्रवर्तनाज्ञानस्यालस्यादिवशेनाप्रवर्तमानस्याभ्यासादिलिङ्गवशादमुष्येष्टहेतुतां स्वविषयेषु तात्पर्येणायं बोधयतीति निर्णीतवतः प्रवृत्तिदर्शनात् । यद्यप्यध्ययनविधिना वेदवाक्यानां सामान्यतः प्रयोजनवत्यर्थे तात्पर्यं बोधितं तथापि तत्तद्विधिभिः प्रवृत्त्यर्थं विशेषतस्तात्पर्योपस्थित्यपेक्षायामर्थवादैस्तदुपस्थाप्यते, विधिविहितः पदार्थ इव प्रयोगकाले मन्त्रैरिति ज्ञेयमित्याहुः । **लक्षणयेति** । स्वार्थप्रतीतिजन्यप्रतीतिविषयत्वं लक्षणाघटकसंबन्धः । दृश्यते हि विधेयगतसदसद्गुणप्रत्यायने विधेयसंबन्धिगतसदसद्गुणप्रत्यायने विधेयान्यनिन्दाप्रत्यायने विधिसमभिव्याहृतविधेयनिन्दाप्रत्यायने वा विधेयप्राशस्त्यप्रतीतिः 'वायुर्वै क्षेपिष्ठा देवता, न स पापं श्लोकं शृणोतीति, आपो वै शान्ताः, यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनातीति, प्रातःप्रातरृतं ते वदन्तीति, यदभिघारयेद्दुद्रायास्ये पशून्निदध्यादथो खल्वाहुरभिघार्या एव' इत्येवमादौ । तादृशसंबंधस्य च सर्वपदार्थेषु पर्याप्तत्वात्सर्वपदेषु प्राशस्त्यलक्षणा । स्यादेतत् ।

अन्यन्यलभ्यं हि प्रयोजनं वक्तुमुचितं वसन्ताय कपिञ्जलानित्याद्यर्थवादशून्यविधिवच्च सर्वत्र विधिभ्य एव प्राशस्त्यलाभात्तल्लक्षणायामप्यानर्थक्यं तदवस्थं, किंच प्रयाजादिविधीनामननुष्ठापकत्वाद्धर्मवाएतदित्यादिजनितप्राशस्त्यबोधस्य न तदनुग्राहकत्वं नापि तदनुष्ठापकप्रधानविध्यनुग्राहकत्वं, तत्संनिधिपाठाभावेन तच्छेषत्वासंभवात् । ततश्च कृतायामपि लक्षणायां यद्यानर्थक्यं किं तत्स्वीकारेणात आह—**स्वार्थेति** । स्वार्थपरत्व एवानर्थक्यं न प्राशस्त्यपरत्व इति द्योतनाय मात्रशब्दः । यथाहि नियमांशेऽदृष्टकल्पनामङ्गीकृत्यान्यलभ्यमपि वैतुष्यमवघातसाध्यत्वेनाश्रीयते एवमन्यलभ्योऽपि प्राशस्त्यबोधो भवत्यर्थवादफलम् । अङ्गविध्यर्थवादानां तु तद्द्वारेणैव प्रधानविधिशेषभूतानामङ्गेषु प्रवृत्तिं जनयन्तं प्रधानविधिं प्रति संभवत्यनुग्राहकत्वमित्याशयः ।

ननु नाध्ययनविधिरर्थज्ञानमुद्दिश्याध्ययनं विधत्ते येनार्थवादानां प्राशस्त्यपरता कल्प्येत, कुतः ? अध्ययनस्य तत्साधनताया मानान्तरसिद्धत्वात् । नचावघात-

प्रसङ्गात्। न चेष्टापत्तिः, अध्ययनविध्युपात्तत्वेनानर्थक्यानुपपत्तेः। तथाहि 'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनविधिः सकलस्य वेदस्या-

---

विधिवदेष नियमविधिः, यतोऽपूर्वीयवैतुष्यमवघातेनैव कुर्यादितिवदपूर्वीयमर्थज्ञानमध्ययनेनैव कुर्यादिति वक्तुं शक्येत, अनारभ्याधीतेऽध्ययनविधावपूर्वोऽस्थित्यभावात्। कथंचिदुपस्थितावप्यध्ययनस्य क्रत्वर्थत्वापत्तेः। अथ नियमविधिस्थले नियमो न वाक्यार्थः येनार्थज्ञानस्वरूपे नियमासंभवादपूर्वीयत्वेन तत्र नियमं बोधयितुमपूर्वोपस्थितिरपेक्ष्येत किंतु नियमः फलमित्युच्येत, तथाप्यवघातनियमादृष्टस्येवाध्ययननियमादृष्टस्य क्रतावनुपयोगान्न तन्नियमस्य विधिफलत्वसंभवः। भवेदप्यधीतविध्यर्थज्ञानस्य विहितकर्मणि नियमः, नत्वधीतनिषेधार्थज्ञानं निषिद्धकर्मणि नियन्तुं शक्यम्। न च साम्नां हुमादिस्तोभानामध्ययनस्य राजकर्तृकस्य वैश्यस्तोमाद्यध्ययनस्यार्थज्ञानफलत्वं घटते। अतो विश्वजिन्न्यायेन स्वर्गफलत्वमनधीयाना व्रात्या भवन्तीति स्मृतिवशेन प्रत्यवायपरिहारार्थत्वं वाध्ययनविधौ स्वीकार्यं, ग्रहणाध्ययने फलार्थवादाभावेन रात्रिसत्रन्यायासंभवात्। तस्मादध्ययनस्य प्रधानकर्मत्वान्न तत्संकार्यत्ववशेनार्थवादानां प्रयोजनवदर्थपरत्वं, गुणकर्मत्वे वा पारायणाद्युपयोगिनं स्वाध्यायं भाव्यमङ्गीकृत्य निराकाङ्क्षोऽध्ययनविधिर्नार्थज्ञानं भाव्यमपेक्षतेऽत आह—स्वाध्याय इति। वेदस्येत्यनन्तरमर्थज्ञानोद्देशेनेति शेषः। नाध्ययनस्य स्वर्गफलत्वं पापपरिहारफलत्वं वा युक्तं; सर्वौषधावघातवत्सकृदुच्चारणेन शास्त्रार्थसिद्धिप्रसङ्गात्, स्वाध्यायकर्मत्वनिर्देशेन प्रतीयमानसंस्कारकर्मताबाधापतेः, सर्वक्रतुविधिष्वर्थज्ञानविचाराक्षेपगौरवापत्तेः, दृष्टार्थदानफलत्वसंभवेऽदृष्टफलत्वायोगाच्च। नापि स्वाध्ययभाव्यकत्वं तत्स्वरूप आनर्थक्यात्। हिरण्यं भार्यमित्यत्र हिरण्यपदेन क्रत्वपूर्वस्येव स्वाध्यायपदेन पारायणापूर्वलक्षणाया अनुपपत्तेः। नचाध्ययनविधिसिद्धस्वाध्यायावाप्तेः क्रतुविधिभिर्ग्रहणात्सिद्धान्तनीत्याऽध्ययननियमस्य क्रत्वपूर्वोपयोगः शङ्क्यः; अर्थज्ञानेनैव ब्राह्मणाद्यवाप्त्याऽविनाभावाभावेन सामान्यसंबन्धबोधानपेक्षलिङ्गेन क्रतौ विनियोगायोगात्, स्वाध्ययस्योद्देश्यत्वे तदेकत्वविवक्षायामेकस्य पुंसो दैवात्पूर्वजाधीतानेकशाखाध्ययनस्य शास्त्रतः प्रसक्तौ सर्वशाखाप्रत्ययमेकं कर्मेतिन्यायोच्छेदश्च स्यात्, क्रतुविधिष्वर्थज्ञानाद्याक्षेपगौरवतादवस्थ्यं च। तस्मादर्थज्ञानमुद्दिश्याध्ययनं विधीयत इत्याशयः। कथं तर्हि स्वाध्यायान्वयः? तत्र भवदेवः—यथा पार्वणौ जुहोतीत्यत्र पर्वपदोक्तानां यजीनां देवतात्मना होमं प्रति गुणत्वेनान्वयेऽपि होमस्य

ध्ययनकर्तव्यतां बोधयन् सर्वो वेदः प्रयोजनवदर्थपर्यवसायीति सूचयति, निरर्थकस्याध्ययनानुपपत्तेः ।

कर्माङ्गस्य केन द्वारेणोपकारकत्वमित्यपेक्षायां तेषामेव संस्कारो द्वारमाश्रीयते, एवं स्वाध्यायाध्ययनेनार्थज्ञानं कुर्यादित्यध्ययनस्य शब्दतः प्रधानकर्मत्वेऽपि स्वाध्यायद्वारेणैवाध्ययनस्यार्थज्ञानार्थत्वकल्पनादर्थादध्ययनस्य गुणकर्मत्वसिद्धिः । संभवति चैवं सति देवताभूतयजिसाहित्यवत्स्वाध्यायैकत्वविवक्षापि । नचार्थज्ञानमुद्दिश्याध्ययने विधिवैयर्थ्यम् । अर्थप्रतिपादनपरो वेद इति निर्णयस्य तत्फलत्वात् । यद्वाक्यं यदर्थप्रतिपत्तिमुद्दिश्योच्चार्यते तत्तदर्थप्रतिपादनपरमिति व्यक्तं लोके । विशिष्टार्थप्रतीतिमुद्दिश्योच्चारितमेतदिति निर्णीते तदसमर्थतया प्रतीयमानेऽपि गौरश्वः पुरुषो हस्तीत्यादिवाक्ये गौण्यध्याहारादिकल्पनेन विशिष्टार्थपरतास्वीकरणात्, तत्प्रतीतिसमर्थेऽप्यन्यप्रतीतिमुद्दिश्योच्चारितमेतदिति ज्ञातेऽक्षमानयेत्यादौ तत्परत्वास्वीकरणाच्च । विशेषतश्च वेदवाक्येषु गुरूच्चारणानूच्चारणात्मकाध्ययनाधीनो विशिष्टार्थपरतानिर्णयः । स्वेच्छया हि वेदवाक्यानि पठताङ्गवाक्येष्वपि फलपदमुच्चार्येत । योऽध्वर्युः स होता, य ऋत्विजस्ते यजमानाः, मुष्टींश्चतुरश्चतुरो निर्वपति, तनूनपातं यजति समिधो यजतीत्यपि पठ्येत । तत्र नाङ्गाङ्गिभावव्यवस्था सिध्येत् । न स्याच्चाध्वर्युकार्ये होतृविधिः ऋत्विक्कार्ये च यजमानविधिः सप्तदशशरावे च चरौ संख्यानुग्रहेण मुष्टिपरिमाणबाधः क्रमनियमश्चेत्याह तन्मतमनुसृत्योक्तं—सकलस्येत्यादि । वेदस्येति षष्ठ्या शाब्दबोधे स्वाध्यायस्याध्ययनं प्रति गुणत्वेनान्वयो द्योत्यते । सूचयतीति । प्रयोजनवदर्थे वेदतात्पर्यनिर्णयोऽध्ययनविधिफलमित्यर्थः ।

अन्ये तु न पर्वपदाभिहितदेवतावत्स्वाध्यायस्य गुणत्वेनान्वयः तव्यप्रत्ययेन कर्मतयाभिहितस्य प्राधान्यान्वयौचित्यात् । तेन यथा पुरोहितं वृणीत इत्यत्र प्रतीतप्राधान्यापरित्यागेन वाक्यार्थ आश्रीयते 'वृतेन पुरोहितेनेष्टं भावयेत्' इति तथा प्रकृतेऽधीतेन स्वाध्यायेनार्थज्ञानं भावयेदिति वाक्यार्थः । एवं च पुरोहितैकत्ववत्स्वाध्यायैकत्वस्यापि विवक्षासिद्धिः । अध्ययनविधिश्रवणाच्च जायमानोऽर्थपरत्वनिर्णयः स्यादप्यध्ययनविधिफलं, नत्वध्ययननियमस्य । पुस्तकादिनापि हि महाभारतादिवन्नियतानुपूर्वीमधिगच्छन्तः प्राप्नुयुरेव विशिष्टार्थबोधम् । त्रैवर्णिकाधिकारनियमस्तु भवेदध्ययननियमस्य फलं, विनार्थज्ञानं क्रत्वनुष्ठानासंभवात्क्रतुविधीनामर्थज्ञानापेक्षां जानतः साङ्गाध्ययननियमविशिष्टार्थज्ञानस्य च प्रयोजनापेक्षां पश्यतः पुरुषस्य लिङ्गकल्पितश्रुत्या तादृगर्थज्ञानं क्रत्वङ्गमिति

'स च वेदो विधिमन्त्रनामधेयनिषेधार्थवादात्मकः। तत्र विधिः प्रयोजनवदर्थविधानेनार्थवान्। स चाप्राप्तमर्थं विधत्ते। यथा 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इति विधिरप्राप्तं प्रयोजनवद्धोमं विधत्ते, 'अग्निहोत्रहोमेन स्वर्गं भावयेदिति'।

यत्र तु कर्म प्रकारान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रविधानम्। यथा 'दध्ना जुहुयात्' इत्यत्र होमस्य 'अग्निहोत्रं जुहुयात्' इत्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानम् 'दध्ना होमं भावयेदिति'।

बोधे जनिते तादृग्ज्ञानवत एव क्रतुष्वधिकार इति बोधावश्यं भावात्। यद्यप्यग्निसाध्येषु कर्मसु त्रैवर्णिकाधिकारोऽग्निबलादेव सिध्यति तथापि दर्भस्तंबे जुहुयादित्यादिष्वनग्निसाध्येषु तत्सिद्धिरुक्तविधार्थज्ञानबलादेव भवति। वस्तुतस्त्वाधानस्यानङ्गत्वेऽपि तजन्यापूर्वविशिष्टाग्नीनां क्रत्वङ्गत्ववदध्ययनस्यानङ्गत्वेऽपि तन्नियमादृष्टविशिष्टार्थज्ञानस्योक्तश्रुत्या कर्माङ्गत्वेन ज्ञापनान्न नियमानर्थक्यं, नियमादृष्टस्याहवनीयवत्क्रत्वपूर्व एवोपयोगात्। एतेन क्रत्वर्थनिषेधेष्वध्ययननियमस्यार्थवत्ता सिद्धा। पुरुषार्थनिषेधेष्वपि तन्नियमस्य प्रायश्चित्तापूर्वोपयोगो बोध्यः। शक्यते हि वक्तुमध्ययनावाप्तनिषेधेनैव स्वानुष्ठितकर्मणो दोषजनकत्वं ज्ञात्वा तन्निवृत्त्यर्थं कृतप्रायश्चित्तात्तन्निवृत्तिर्भवतीति। वक्ष्यति चैतद्विस्तरेणावसरे। एवं च नित्याद्यनुष्ठानस्याध्ययनविधिसिद्धार्थज्ञानमन्तरेणासंभवात्सिद्धमध्ययनस्य फलतो नित्यत्वं द्रढयितुमध्ययनाकरणे प्रत्यवायस्मरणं संगच्छते इत्याहुस्तन्मतमभिप्रेत्य वाह—सकलस्येति। कर्मणि षष्ठी। अध्ययनेन स्वाध्यायं भावयेदित्यापाततो बोधमन् स्वाध्यायप्रयोजनाकाङ्क्षायामधीतेन स्वाध्यायेन प्रयोजनवदर्थज्ञानं कुर्यादिति विपरिणामेन बोधयति। स्वाध्यायस्योपयोगयोग्यतया सक्तुवैलक्षण्यादित्याशयः।

ननु सन्ति वेदावयवा अन्येऽपि तद्वदर्थवादानां भवतु लक्षणां विनैव फलवत्तेत्याशङ्क्यार्थवादेषु तद्वैलक्षण्यं दर्शयितुं वेदावयवान्तराणामुद्देशपूर्वकमुपयोगं तावदाह—स चेत्यादिना। विधौ संभवदन्तर्भावस्यापि नामादेः पृथक्कथनं विभिन्नन्यायव्युत्पाद्यप्रयोजनवत्ताकत्वख्यापनाय।

धात्वर्थानुबन्धिगुणानां धात्वर्थानुवादेन विधानस्थले धात्वर्थस्यैव कर्मत्वेनान्वय इत्याशयेनोक्तं होममिति। प्रयोगानुबन्धिगुणस्य तु तदनुवादेन विधौ धात्वर्थः करणत्वेनैवान्वेति यथा पूर्णमास्यां पूर्णमास्या यजेतेत्यादौ।

यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते । तदुक्तम्—'नचेदन्येन शिष्टाः' इति शिष्टा उपदिष्टा इत्यर्थः । यथा 'सोमेन यजेत' इत्यत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्टयागविधानम्, 'सोमवता यागेनेष्टं भावयेत्' इति । न चोभयविधाने वाक्यभेदः, विशिष्टस्यैकत्वात् । विशिष्टविधौ च मत्वर्थलक्षणा । यथा सोमपदेन मत्वर्थो लक्ष्यते सोमवतेति । न हि मत्वर्थलक्षणां विना सोमस्यान्वयः संभवति । यदि तावत्सोमयागयोरैकरूप्येण भावनायां करणत्वेनैवान्वयः 'सोमेन यागेनेष्टं भावयेत्' इति । तत उभयविधाने वाक्यभेदः । सोमस्य यागवत्फलभावनाकरणत्वेन प्राधान्यापातश्च यागार्थत्वानुपपत्तिश्च यागे द्रव्यानुपपत्तिश्च प्रत्ययवाच्य-

---

न चेदिति । 'तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थः' इति सूत्रस्य पूर्वो भागः । यदि शास्त्रान्तरेण कर्म गुणाश्च शिष्टा न भवन्ति तर्हि तत्कर्म गुणाश्च विधीयेरन्नित्यवयवार्थमुक्त्वाऽविभागादित्यवयवार्थं वक्तुमाह—नचोभयेति । ननु सोमस्य कारकात्मनान्वयात्कथं सोमवतेति यागविशेषणत्वमवाद्यत आह—विशिष्टविधाविति । कारकद्वारेणैव भावनान्वययोग्यगुणविशिष्टधात्वर्थविधाविति बोध्यम्। तेन साहित्यविशिष्टयागविधौ राजप्रभृत्तिकर्तृविशिष्टराजसूयप्रयोगविधौ च न मत्वर्थलक्षणापत्तिः । ऐकरूप्येणेत्यस्यं विवरणं करणत्वेनैवेति । विधेयभेदनिमित्ता विध्यावृत्तिः स्यादित्याशयेनाह—वाक्यभेद इति । ननु शब्दान्तराधिकरणन्यायेन भावनाया अवश्यं विधेयत्वादुभयविशिष्टा सैकैव विधेयेत्याशङ्क्याह—सोमस्येति । यागवत्सोमस्यादृष्टार्थत्वेन प्रतिनिधिग्रहणाप्रसक्तौ पूतीकविधेरपूर्वविधित्वेन गौरवं स्यादित्याशयः । श्रुतिवशादृष्टार्थत्वेऽवगते समापतद्गौरवं प्रमाणमुखत्वान्न दोषायेत्याशङ्क्याह—यागार्थत्वेति । फलोद्देशेन विधीयमानसोमस्याश्रयापेक्षायां समभिव्याहृतयागस्य कथंचिदाश्रयत्वेनान्वयं स्वीकृत्यानङ्गभूतसोमेन प्रकृतियागोपपादनेऽपि विकृतिषु तदप्राप्तेर्न सोमेन तासामनुष्ठानं स्यात् । नाप्याक्षिप्तद्रव्यान्तरेण 'त्रिवत्सः सांडः सोमक्रयणः' इत्यादौ क्रयाद्यनुवादेन गुणविध्यनुपपत्तेरित्याशयः । स्यादेतत् । एकक्रियान्वितयोः सोमयागयोरुणैकहायनीन्यायेन परस्परनियमे सति सोमस्य यागद्वारेणैव फलार्थत्वं सिध्यति न स्वातंत्र्येण, एवं च विकृतियागानां द्रव्याकाङ्क्षायां प्रकृत्यनङ्गमपि तत्साधनत्वेन नित्यवदवगतः सोमः साधनत्वेन कल्प्यते, अग्नीषोमीयानुबन्ध्ययोः पौर्वापर्यमिव साद्यस्क्रे । इयांस्तु

भावनायाः समानपदोपात्तेन यागेन करणाकाङ्क्षानिवृत्तत्वेन भिन्नपदोपात्तस्य सोमस्य करणत्वेनान्वयानुपपत्तिश्च स्यात्।

विशेषः—यदत्र सोमः शाब्दः पौर्वापर्यमशाब्दमिति। 'अणुरपि विशेषोऽध्यवसायकरो भवति' इति न्यायेन यागजन्यापूर्वसिद्ध्यर्थं द्रव्यापेक्षायामनुपस्थितद्रव्यकल्पनमपेक्ष्योपस्थितसोमसदृशकल्पनमुचितम्। ततश्च नोक्तदोषगणप्रसक्तिः। संभवति च दृष्टार्थे सोमे प्रतिनिधिः। नच प्रधानत्वान्न सोमस्य प्रतिनिधिः स्यादिति शङ्क्यम्, त्वन्मते सोमवाक्यविधेयभावनायाः सोमयागोभयकरणत्वेन केवलयागकरणकवाक्यान्तरीयभावनाभिन्नाया आरम्भोत्तरं सोमाभावेऽप्याचारानुमितश्रुत्या केवलयागानुरक्ताया अवश्यसमापनीयत्वे ज्ञापिते [दृष्टद्वारा] सोमसाध्यत्वावगतापूर्वसिद्ध्यर्थं तत्प्रतिनिधेरवश्यं स्वीकार्यत्वादत आह—याग इति। 'रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति' इत्यत्र हि समाहारद्वन्द्वाश्रयणेन रथघोषयोरुपाकरणार्थत्वविधिरिति पूर्वपक्षे द्वयोः साक्षात्क्रियान्वयसंभवान्नारुणैकहायनीन्यायेन परस्परनियम इति यस्य कस्यचिद्घोषस्याङ्गत्वसिद्धिः प्रयोजनमित्युक्तं तन्त्ररत्ने। तेन न्यायेन सोमयागयोः परस्परनियमाभावे सकृच्छ्रुतस्य फलसाधनत्वेन सोमाश्रयत्वेनान्वयासंभवे प्रकृतावेव द्रव्यानुपपत्तिः स्यात्किमुत विकृताविति्याशयः।

ननु दर्भमन्त्रयोरुपाकरणसाधनत्वेन प्राप्तयोः कार्ये विधीयमानौ रथघोषौ तद्वत्साक्षादुपाकरणहेतू भवत इति युक्तम्। प्रतीयते च द्वन्द्वोपात्तयोरैकरूप्येण क्रियान्वयः। नतु सोमयागौ पूर्वक्लृप्ते कार्ये विधीयेते। न च समानभिन्नपदोपात्तौ यागसोमावेककरणाकांक्षोपशामकाविति वक्तुं युक्तम्। तस्माद्यथा कपिञ्जलैर्यजेतेत्यादौ बलवदभिधानश्रुत्या कारकस्य लिङ्गसंख्यान्वयेऽवगतेपि येन पुंसा बहुसंख्येन यजेत तेन किंजातीयेनेत्याकाङ्क्षान्तरे दुर्बलपदश्रुत्युपस्थिता जातिरन्वेति कपिञ्जलजातीयेनेति, एवं समानपदश्रुत्या भावनाकरणत्वेन यागेऽवगते किंसाधनकेन यागेनेत्याकाङ्क्षान्तरेण सोमस्य भावनान्वयो वाच्यः। ततश्च यथा साक्षाद्भावनया सम्बन्ध्यमानावपि दर्शप्रयाजौ विभिन्नाकाङ्क्षाग्राह्यत्वमहिम्नोपकार्योपकारकभावं भजतः इत्थमिमावपि मिथः संभन्त्स्येते। संभवति चांशत्रयाकाङ्क्षाभ्योपि भिन्ना कर्त्राद्याकाङ्क्षावद्यागसाधनाकाङ्क्षा भावनाया अत आह—प्रत्ययेति। यद्धि क्रियया यादृगन्वयितयाकाङ्क्षितं तादृगन्वयितया ज्ञायमानमेव तत्तदाकाङ्क्षां पूरयितुमलमिति नियमात्किंसाधनकेनेत्याकाङ्क्षायां सोमसाधनकेनेत्येवं यागविशेषणत्वेनोपस्थितस्यैव सोमस्य कार-

यदि च वैयधिकरण्येनान्वयः, तत्र न तावत् 'यागेन सोमम्' इत्यन्वयः समानपदोपात्तत्वात्प्रत्ययवाच्यफलभावनायां करणत्वेनान्वितस्य यागस्य सोमकर्मकभावनान्वयानुपपत्तेः, यागस्य सोमार्थत्वापत्तेश्च। न चेष्टापत्तिः, अदृष्टद्वयापत्तेः। न हि यागस्य सोमार्थत्वं दृष्टद्वारेण संभवति, व्रीहिष्ववघातेनेव यागेन सोमे कस्यचिद् दृष्टस्याजननात्। अतस्तेन तावत्सोमे किञ्चिददृष्टं जननीयम्, प्रोक्षणेनेव व्रीहिषु।

कात्मना क्रियान्वयो वाच्यः, किंजातीयेन किंगुणकेनेत्याकाङ्क्षयोः पश्वरुणपदाभ्यां निरूढलक्षणोपस्थितव्यक्तिविशेषणत्वेन ज्ञापितजात्यादेस्तदात्मनान्वयवत्। नच मत्वर्थलक्षणामनिच्छतां तादृशान्वयः संभवतीति करणत्वेनैवान्वयो यागवत्स्यात् तत्र च त्वदुक्त एव दोष इत्यर्थः। एतेन हिरण्यमात्रेयाय ददातीत्यादौ कर्मसंप्रदानादेरपि मत्वर्थलक्षणया धात्वर्थविशेषणत्वेनान्वयो बोध्यः। तदपि हि श्रुतभावनया तद्विशेषणत्वेनैवाकाङ्क्ष्यते। दानेन क्रतूपकारं भावयेदित्युक्ते हि भवत्याकाङ्क्षा किंकर्मकेन किंसंप्रदानकेनेति च। यस्त्वत्र सोमेन यजेतेत्यतो विशेषस्तमनन्तरं वक्ष्यामः।

वैयधिकरण्येन भिन्नकारकद्वारेण। **समानेति**। यागस्य सोमसंस्कारत्वं वदता हि सोमस्य फलभावनाकरणत्वं वाच्यं निष्फलस्य संस्कार्यत्वानुपपत्तेः। एवंच यागसंस्कृतेन सोमेन फलं भावयेदिति निष्पन्नः श्रुतविधिः सोमकरणिकां फलभावनां विधत्ते, आर्थिकस्तु यागकरणिकामित्युच्यते। समानाभिधानश्रुत्या च विधिभावनयोरन्वयो युक्त इति श्रुताख्यातेन फलभावनैवाभिधीयते तत्र चैष दोष इत्याशयः। ननु स्वीक्रियत एव भवतापि श्रुतभावनायां अध्याहृतभावनाया वा धात्वर्थान्यकरणकत्वं वृतेन पुरोहितेन भावयेदित्यादौ स न्यायः प्रकृतेऽप्यनुसर्तव्योऽत आह—**यागस्येति**। पुरोहिते कर्मत्वश्रवणात्तद्वतानतिरूपदृष्टार्थत्वलाभाद्युक्तं श्रुत्यार्थाद्वाध्ययनस्य स्वाध्यायार्थत्वन्यायेन तादर्थ्यं वरणस्य नतु करणत्वेन श्रुतं यागजन्यदृष्टातिशयहीनं सोमं प्रति यागस्याङ्गत्वं युक्तमित्याशयः। ननु भावनायाः करणाकाङ्क्षायां समानपदोपात्तोऽपि यागो न करणत्वेनान्वेति तत्र तृतीयाद्यभावात्। तृतीयान्तपदोपस्थितसोमस्य तु भावनाकरणत्वे झटित्यवगते यागस्य तादर्थ्यमेवोचितमिति नानिष्टमत आह—**नचेति**। यद्यपि सोमस्य शीघ्रं करणत्वेन फलभावनान्वयः प्रतीयते तथापि गौरवाद्धेय इति भावः। नन्वाश्रयतया करणतानिर्वाहको यागः सोमस्य दृष्टविधयैवोपका-

तथा यागस्य सोमार्थत्वे फलभावनायां सोमस्य करणत्वेनान्वयो वक्तव्यः। भावनाकरणत्वं च भावनाभाव्यनिर्वर्तकत्वेनेत्युक्तम्। न च सोमोऽदृष्टमन्तरेण फलं जनयितुं समर्थः, 'ग्रहैर्जुहोति' इति वाक्यविहितहोमेन तस्य भस्मीभावात्। अतोऽदृष्टद्वयापातान्न यागस्य सोमार्थत्वमिति न 'यागेन सोमं भावयेत्' इत्यन्वयः संभवति, करणत्वेनोपस्थितस्य सोमस्य साध्यत्वेनान्वयानुपपत्तेश्च।

अथ 'सोमेन यागं भावयेत्' इत्यन्वयः, तत्र यद्यपि सोमस्य करणत्वेन यागार्थत्वाद्यागनिर्वृत्तिर्दृष्टमेव प्रयोजनं लभ्यते इति नादृष्टद्वयापत्तिः, नापि करणत्वेनोपस्थितस्य सोमस्य साध्यत्वान्व-

---

कोऽत आह—व्रीहिष्विति। इन्द्रियोद्देशेन होमकरणत्वविशिष्टदध्न इव यागकरणत्वविशिष्टस्य सोमस्य फलविधिमङ्गीकृत्य यागस्याश्रयत्वमुच्यते उत फलकरणत्वेन ज्ञातस्य सोमस्याङ्गत्वेन यागे ज्ञाते कथमस्योपकारकत्वमित्याकांक्षायामाश्रयत्वेनेति कल्प्यते? नाद्यः प्रथमप्रतीतस्य यागनिरूपितकरणत्वस्याप्राप्तस्यावश्यं विधेयत्वेन कल्प्यफलकरणत्वस्याविधेयत्वापत्तेः। सोमयागयोः फलनिरूपितकरणत्वकल्पनासाम्ये समानपदोपात्तस्य सोमशेषितयावगतस्य यागस्यैव तत्कल्पनौचित्याच्च। द्वितीये तु प्रोक्षणान्वयात्प्राग्व्रीहीणामिव यागान्वयात्प्राक्सोमस्य फलान्वयेन भवितव्यम्। फलकरणत्वेनावगतं प्रत्येव निष्फलस्याङ्गत्वसंभवात्। ततश्च यागान्वयात्प्रागेव सोमस्य फलकरणत्वे निर्व्यूढे न यागस्य तन्निर्वाह्यकता संभवतीत्याशयः।

वस्तुतस्तु न यागवत् सोमस्य फलभावनायां शीघ्रमन्वयः संभवति, निर्णीतः पदार्थः पदार्थान्तरेणान्वेतीति नियमेन सोमान्वयात्प्राक् यागभावनान्वयनिर्णयस्यावश्यं वक्तव्यत्वे सति योग्यतया यागस्यैव करणत्वान्वयनिर्णयात्। अभिधानश्रुत्यवगतप्रवर्तनान्वयमहिम्ना फलोद्देश्यकतयावगतभावनायां शब्दादेव शक्त्या लक्षणया वावगतस्य विषयतया यागवैशिष्ट्यस्य सोमकरणकत्वविरोधित्वाच्च। यागविषयिणी कृतिः फलोद्देश्यिकेत्युक्ते हि यागेन फलं कार्यमिति धीरवश्यं भवतीत्युक्तं भवदेवेन। यथाजत्वविरोधिगोत्वव्याप्यवत्सत्वोपदेशोऽजत्वप्राप्तिं प्रतिबध्नाति तथा सोमकरणकत्वविरोधियागकरणकत्वव्याप्ययागविषयकत्वधीरपि सोमकरणकत्वधियम्। नच नैव विषयत्वेनान्वयो धात्वर्थस्य तथा सति करणत्वकल्पनानापत्तेरिति शंक्यम्, द्रव्यदेवतान्वयज्ञापनस्य यागपरत्वद्विषयत्वान्वयज्ञापनस्य करणत्वपरत्वात्। उक्तन्यायेन च न फलाय विधीयमानस्य सोम-

यानुपपत्तिः । करणत्वेनैवान्वयात् । तथाऽप्यप्राप्तत्वाद्भावनाकरणत्वेनान्वितस्य यागस्य साध्यत्वेनान्वयानुपपत्तिस्तदवस्थैव ।

ननु यजेतेत्यत्र यागस्य न करणत्वेन नापि साध्यत्वेनोपस्थितिः । तद्वाचकतृतीयाद्यभावात्, किन्तु भावनायां यागसंबन्धमात्रं प्रतीयते । यागस्य च भावनासंबन्धः करणत्वेन साध्यत्वेन च संभवति । तत्र करणत्वांशमादाय फलसंबन्धः साध्यत्वांशमादाय गुणसंबन्धश्च स्यात्, इति चेत्—मैवम् । यद्यपि भावनया यागस्य संबन्धमात्रं प्रतीयते तथाऽपि करणत्वेनोपस्थितिदशायां न साध्य-

---

स्याश्रयलाभः संभवतीति न सोमस्य श्रुतमपि करणत्वं फलनिरूपितं, यागनिरूपितं तु स्यात् । ततश्च यागगुणत्वेन प्रतीयमानस्य सोमस्य न तच्छेषित्वं संभवतीत्याशयेनाह—करणत्वेनेति । अप्राप्तत्वादिति । शास्त्रान्तरेणेष्टहेतुतयावगतस्य यागस्य संभवति भावनायामुद्देश्यत्वं नाप्राप्तस्य स्वत इष्टत्वाभावादित्याशयः ।

वाजपेयाधिकरणपूर्वपक्षन्यायेन मत्वर्थलक्षणामाक्षिपति—नन्विति । संबन्धमात्रमिति । संसर्गविधया विषयताभानेपि न तस्यामीप्सितत्वमनीप्सितत्वं वा भासते संसर्गे धर्मान्तराभावात् । ईप्सितत्वेन भाने हि साध्यत्वेनैवान्वयः स्यात् । अन्योद्देश्यकभावनायामनीप्सितविषयत्वेन भाने करणत्वेनैवान्वयः स्यादित्याशयः । करणत्वेनेत्यतः प्रागर्थादिति शेषः । ततश्चार्थात्सेत्स्यदपि यागकरणकत्वं यागकर्मकत्वं च शाब्दबोधे यागीयतया भासमानायां भावनायां वस्तुसत्फलगुणाभ्यां तन्त्रसंबंधयोग्यतापादकं भविष्यतीत्याशयेनाह—तेनेति । नच कारकव्यवधानेनैव यागस्य भावनान्वयित्वमकारकस्य साक्षात्क्रियान्वयासंभवादिति शंक्यं, नामार्थविषयत्वादस्य नियमस्य; तत्कुत इति चेत् भवति जानातीत्यादौ धात्वर्थस्य साक्षात्तदन्वयस्वीकारात्, प्रयाजादिभावनानामित्थमित्थव्यवधानेन प्रधानभावनान्वयाच्च । ततश्च सोमकरणिका फलकर्मिका यागीया भावनेति विनैव मत्वर्थलक्षणया बोधो घटत इत्यर्थः । यजेतेतिपदाद्यागीयतया भावनाप्रतीतिसंभवमभ्युपेत्याह—यद्यपीति । मात्रमित्यस्यानन्तरं पदादिति शेषः । अपीत्यस्य फलान्वयसिद्ध्या इति । समानाभिधानश्रुत्यवगतविध्यन्वयवशेनेष्टं भावयेदिति भावनासाध्यत्वेनावगतस्य हि फलस्य केन भावयेदिति भावनाद्वारककरणान्वयाकाङ्क्षा न वस्तुतो यागकरणिकयापि यागीयतयोपस्थापितभावनयान्वयेन शाम्यति । अतस्तच्छमनाय यागेन भावयेदित्युपस्थितिरवश्यं कस्या । तस्यां च न सोमापेक्षिता साध्यत्वेनोपस्थितिः संभवतीत्याशयः ।

त्वेनोपस्थितिः संभवति विरोधाद्। तदवश्यं 'यागेन स्वर्गं भावयेत्' इति करणत्वेनान्वये सति पश्चात् 'सोमेन यागं भावयेत्' इति साध्यत्वेनान्वयो वक्तव्यः। ततश्च वाक्यभेदः।

न च प्रत्ययाभिहितभावनास्वरूपे यागस्वरूपमात्रमन्वेतीति वक्तुं युक्तम्, कारकाणामेव क्रियान्वयात्। तत्सिद्धं सोमस्य न यागे सामानाधिकरण्येन वैयधिकरण्येन वाऽन्वयः संभवतीति।

ननु यजेतेत्यत्र प्रत्ययाभिहितभावनायाः करणाकाङ्क्षायां यथा यागः करणत्वेनान्वेति तथेतिकर्तव्यताकाङ्क्षायां सोमस्येतिकर्तव्यतात्वेन भावनायामेवान्वयोऽस्तु, कृतं मत्वर्थलक्षणया इति चेत्—न। सोमेनेति तृतीयया करणत्ववाचिन्या सोमस्येतिकर्तव्यतात्वानभिधानात्। तत्र यदीतिकर्तव्यतात्वं लक्षणयोच्यते ततो वरं सोमपद एव प्रकृतिभूते मत्वर्थलक्षणा 'गुणे त्वन्याय्यकल्पनेति'न्यायात्।

विरोधात् विरुद्धत्रिकद्वयापत्तेः। तत्परिहाराय तन्त्रसंबन्धत्यागेनोभयसंबन्धस्वीकारे त्वाह—तदिति।

इदानीं न पदादपि यागीयतया भावनाप्रतीतिरित्याह—नचेति। एवेति। धात्वर्थक्रियावादिभिर्विशेषणगतविभक्तेः साधुत्वार्थतां स्वीकुर्वद्भिः परैर्यथा स्तोकं पचतीत्यादौ नामार्थधात्वर्थयोरभेदान्वयं स्वीकृत्यापि भेदेन नामार्थान्वयो विभक्त्यर्थद्वारक एव स्वीक्रियते तथोक्तोदाहरणेषु धात्वर्थादेरकारकस्य भावनायामभेदान्वयेऽपि भेदेन तदन्वयः कारकद्वारैव स्वीकार्यः। कुर्यादिति प्रतीयमानभावनया किं केनेति कारकद्वारेणैव धात्वर्थान्वयाकाङ्क्षणात्। तत्रान्योद्देशेन विधीयमानस्य करणत्वेनान्वयः, स्वोद्देशेनान्यविधावीप्सितकर्मत्वेन, उद्देश्यत्वविधेयत्वान्यतरनिर्णयात्प्रागीप्सितानीप्सितसाधारणविषयतात्मककर्मत्वेन। तस्मान्न यागीयतया प्रतीतभावनायां युगपद्गुणफलान्वय इत्याशयः।

आख्यातप्रतीते व्यापारसामान्ये हीत्थमित्यभेदान्वयित्वमितिकर्तव्यतात्वम्। ततश्चेतिकर्तव्यतात्वेनान्वेतीत्यस्याभेदेनान्वेतीत्यर्थः फलितः। नच सोमस्याभेदान्वय आख्यातार्थे संभवति कारकोपसर्जनत्वादित्याशयेनाह—नेति। ननु तृतीयैवाभेदं बोधयतु ततश्च ज्ञाप्यमानभावनानिरूपिताभेदतया भविष्यति सोमस्येतिकर्तव्यतात्वं तत्राह—सोमेनेतीति। इतिकर्तव्यतापदप्रवृत्तिनिमित्तस्य अभेदस्यानभिधानादित्यर्थः। ननु मत्वर्थलक्षणास्थानेऽभेदलक्षणैव स्वीकार्यात आह—तत्रेति। गुण इति। नावमिकमदः सूत्रम्। यथाऽदितिः पाशान्प्रमुमोक्त्वर्तिमन्त्रे प्राधा-

अथ 'वेदो वा प्रायदर्शनात्' इत्यधिकरणोक्तासंजातविरोधित्वन्याये-नान्त्ये प्रत्यय एव लक्षणेति चेत्, तथापि सोमस्येतिकर्तव्यतात्वे-

---

न्येन प्रकाश्यायाः पाशमोचनक्रियाया अग्नीषोमीये संभवत्प्रकाशनत्वादसंभवत्प्रकाशनमपि बहुत्वमवयवाभिप्रायेण गुणत्वान्नीयते एवं प्रत्ययार्थे प्रधानतया यथश्रुतमङ्गीकृत्य गुणभूतार्थबोधकप्रकृतौ मत्वर्थलक्षणाऽन्याप्यपि स्वीकार्येत्यर्थः।

ननु नैतद्युक्तम्। यतः सत्यामपि मत्वर्थलक्षणायां प्रत्यय एव तत्स्वीकरणमुचितं सोमकरणकेनेति। तथा सति तृतीयया सोमगतकरणत्वाभिधानात्सोमस्य श्रौताङ्गत्वसंभवात्। सोमवतेतिलक्षणायां तृतीयया यागगतकरणत्वाभिधानप्रसंगात्। उक्तं च संस्थाधिकरणे सोमस्य श्रौतमङ्गत्वं मिश्रैः सोमस्तावच्छ्रुत्या यागार्थ इति। एवं समानन्यायेष्वारुण्यैन्द्रीसूक्तवाकेषु श्रौताङ्गत्वमरुणाधिकरणादिषु निर्दिष्टं प्रत्यये मत्वर्थलक्षणायामेव संगच्छते। किंच प्रकृतिगतलक्षणायां पश्वेकत्वाधिकरणोक्तं पशुत्वलिङ्गसंख्यानामेककारकद्वारेण क्रियान्वयित्वं व्याहन्येत, 'गुणपक्षे विधेयत्वं संख्याकारकयोरपि' इत्युद्भिदधिकरणवार्तिकं च, मत्वर्थगतयोर्लिङ्गसंख्ययोर्विभक्त्याभिधानप्रसक्तेः। नच सर्वविशिष्टविधौ गुणवाच्युपपदेषु प्रकृतौ मत्वर्थलक्षणाश्रयणं संभवति, 'दण्डं ददाति, पदे जुहोति, अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरंति, अग्नयेप्रवमानाय निर्वपेत्' इत्यादिषु द्वितीयाद्यर्थकर्मत्वादेर्मत्वर्थेऽनन्वयात्। सोमवतेति यागसोमयोः संबन्धसामान्यावगमे सोमस्य देवतात्वेनाप्यन्वयप्रसङ्गश्च। अथ तु प्रत्यय एव मत्वर्थलक्षणोच्यते ततो वरमभेदलक्षणा, गुणानां च परार्थत्वादिति धात्वर्थव्यवधानमन्तरेण भावनान्वयौचित्यात्। सप्तमाद्ये प्रधानभावनान्वयोक्तेश्च। उक्तं च प्रयोगे पुरुषश्रुतेरित्यधिकरणे मिश्रैः—नच यागविशेषणत्वं गुणानां येन तस्यैकस्य विशष्टस्य विधानात् वाक्यभेदः परिहियेत। सर्वेषां भावनागामित्वादिति। तस्मान्मत्वर्थलक्षणा नोपपद्यत इत्याशयेन शङ्कते—अथेति। यथाहि त्रयो वेदा असृज्यन्तेत्युपक्रमानुरोधेनोच्चैर्ऋचा क्रियत इति विधौ जघन्ये प्रधानभूतेप्यृगादिपदे वेदलक्षणाङ्गीक्रियते ऋग्वेदविहितमुच्चैरिति; तथा प्रधानभूतार्थबोधके प्रत्ययेपि जघन्यत्वाल्लक्षणोचितेति भावः। पूर्वपक्ष्युक्तां प्रत्ययगतलक्षणोपपत्तिमभ्युपेत्येतिकर्त्तव्यतात्वलक्षणां निराचष्टे—तथापीति। वस्तुतो न प्रत्यये लक्षणा संभवतीति द्योतनायापिशब्दः। न तावत्सोमकरणकेनेति लक्ष-

---

१ वाचकपदेष्विति पाठः।

णायामपि सोमस्य यागं प्रति श्रौताङ्गत्वसिद्धिः, प्रोक्षिताभ्यामुलूखलमुसलाभ्यामित्यत्रं विधेयभावनानन्वयिकर्मत्वाभिधायिनिष्ठाप्रत्ययेनोलूखलमुसले प्रति प्रोक्षणस्येव विधेयभावनानन्वयिकरणत्वाभिधायिन्यापि तृतीयया सोमस्याङ्गत्वासिद्धेः। स्यादपि श्रुतविधिविधेयस्य प्रोक्षणस्य तत्सहकारिता निष्ठाप्रत्ययो विनियोजकः, नतु कल्प्यविधिविधेये सोमे श्रुतविधिसमभिव्याहृतायास्तृतीयाया विनियोजकत्वम्। तस्मात्प्रकृतौ प्रत्यये वा मत्वर्थलक्षणां वदता ततः प्राग्ज्ञायमानं तदुपजीव्यं सोमयागसंबन्धमपेक्ष्य सोमस्य श्रौताङ्गत्वव्यवहारो नेयः। यस्य ह्यबाधितं यदङ्गत्वं प्रत्यक्षया विभक्त्या अनधिगतं बोध्यते तस्य तदङ्गत्वं श्रौतं, सा विभक्तिरतत्परा तत्परा वेत्यन्यदेतत्। जायते च सोमेन यजेतेतिश्रवणात्सोमेन यागं कुर्यादिति प्रथमबोधः सर्वेषां, सर्वत्राख्यातसंबद्ध इति न्यायात्तृतीयाम्नानाच्च। नच प्रयाजशेषेण हवींषीत्यत्र प्रथमोत्पन्नस्य प्रयाजशेषाङ्गत्वबोधस्य बाधात्प्रयाजशेषं क्षारयेदिति लक्षणया प्रयाजशेषप्राधान्यकल्पनवत्प्रकृते मत्वर्थलक्षणया कल्प्यमानोऽपि विपरीतवाक्यार्थोऽमुष्य प्रथमबोधस्य बाधात्कल्प्यते, तद्बाधे शक्यासंबद्धस्य लक्षणानुपपत्तेः। तादृशबोधसिद्धये विध्यन्तरकल्पनाच्च। किंतु शास्त्रान्तराद्यागाप्राप्तिमालोच्य यागविधिपरत्वेन निर्णीतस्य वचसो यागमुद्दिश्य सोमविधिपरत्वबाधात्। इत्थं चैन्द्र्यादिष्वप्यूह्यम्। सोमवतेति लक्षणयापि च जायमानबोधे प्रथमावगतस्य लिङ्गादिविशिष्टकरणत्वस्य संबन्धविधयाभानात्सोमकरणकेनेतिलक्षणायामिव संभवति विधेयतावच्छेदकतया संख्याकारकयोर्विधेयत्वोक्तिः। सोमस्य देवतात्वाप्रसक्तिश्च। संभवति च प्रथमबोधमनुसृत्य लिङ्गसंख्याजातीनां कारकद्वारेण क्रियान्वयित्वव्युत्पादनं, नह्येकपुंपशुकरणकेनेति लक्षणायामपि लिङ्गादेः क्रियारूपभावनान्वयो लभ्यते। नच द्वितीयान्तादिगुणपदेषु प्रत्यये लक्षणा स्वीकृतेति सोमेनेत्यादिषु तथा स्वीकार्या। उद्भूतशक्त्यात्मनावगतस्य क्रियान्वययोग्यस्य करणत्वस्य यागान्वययोग्यन्यग्भूतशक्त्यात्मनोपस्थितिकल्पनागौरवात्। तादृशोपस्थितिपूर्वकं लक्षणोपस्थितयागान्वयकल्पनातोऽनुशासनसिद्धेत्थंभावार्थैत्वाश्रयणेन तदन्वयस्वीकारौचित्याच्च। त्रिवृता यूपं परिवीय, पृष्ठैरुपतिष्ठते' इत्यादौ त्रिवृत्करणकेन परिव्याणेन, पृष्ठकरणकेनोपस्थानेनेत्येवमर्थं स्वीकुर्वता परोपन्यस्तेत्थंभावार्थत्वपरिहाराय कारकविभक्तिबलीयस्त्वकथनानुपपत्तेश्च। उपपदविभक्तेर्हि ततो दौर्बल्यं, पदान्तरमपेक्ष्यार्थबोधकत्वादमुख्यार्थत्वादश्रुतक्रियागर्भान्वयबोधकत्वाद्वा। त्रिवृत्करणकेनेतिबोधयन्त्यां तृतीयायां च त्रयमप्येतदविशिष्टम्। अनुशासनासिद्धकल्पनाश्रयणं परम-

नान्वयानुपपत्तिः । सिद्धस्य वस्तुन इतिकर्तव्यतात्वाभावात्, क्रियाया एवेतिकर्तव्यतात्वात्, द्रव्यस्य केवलमङ्गत्वात् । अत एवेतिकर्तव्यतात्वाभावात् द्रव्यस्य प्रकरणादग्रहणम् । यथाहुः—

नावान्तरक्रियायोगादृते वाक्योपकल्पितात् ।
गुणद्रव्ये कथंभावैर्गृह्णन्ति प्रकृताः क्रियाः ॥ इति ।

धिकम् । द्वितीयान्तादिगुणपदेषु त्वगत्या प्रत्यये लक्षणाश्रयणं धातुनी करणतयोपस्थितस्य मत्वर्थस्य कर्मत्वाद्यनन्वयित्वात् ।

यदि च प्रकृतिसंजातबोधस्य पुंसः प्रत्ययश्रवणे विरोधबुद्धिर्जायेत तदा स्यादसंजातविरोधित्वन्यायेन प्रत्यये लक्षणा । यो हि जघन्यः शब्दः स्वतो मुख्यशब्दोत्थबुद्धिविरुद्धां बुद्धिमादधाति स लक्षणया नेयः, यथर्गादिः । यस्तु स्वतो मुख्यशब्दबोधितार्थान्वितमर्थं बोधयन्न विरुध्यते मानान्तरविरोधात्परं तस्मिंस्तन्मुख्ये वा लक्षणेति संदेहः, तस्य प्रधानभूतार्थत्वे गुणभूतार्थके मुख्य एव लक्षणा युक्ता । यथा सद्वेष्यापदे य इति विधिवाक्यापेक्षितविषयार्पकत्वेन गुणभूते, मुख्येपि तस्यैकहायनी गौर्दक्षिणेति वचोन्तर्गते दक्षिणाशब्दे । अत्र हि नोपक्रमोपसंहारयोः स्वतो विरोधाल्लक्षणाप्रसक्तिः किंतु ऋत्विगाचार्यौ नातिचरितव्याविति शास्त्रविरोधात् । तथा सोमेनेत्यत्र प्रकृतिप्रत्ययोर्न स्वतो विरोधः, यागविधायकप्रत्ययसमभिव्याहाराच्तु लक्षणाश्रीयमाणा प्रकृतावेव वक्तुमुचिता । यद्यपि प्रत्यये लक्षणा स्यात्तथापि प्रत्ययेन मत्वर्थलक्षणैवोचिता नाभेदलक्षणा, भावनानिरूपिताभेदायोग्यत्वात्सोमस्येत्याशयः ।

कथं तर्हि सोमादेः फलभावनान्वयित्वकथनं ग्रन्थेष्वत आह—क्रियाया इति । कल्पितविशेषणविधिबोधितायाः सोमकरणकक्रियायास्तदेकवाक्यतापन्नेन तत्प्रधानविधिना प्रधानभावनेतिकर्तव्यतात्वं बोधयता तद्द्वारेण करणीभूतसोमस्य फलभावनान्वयापादनान्नात्रोदाहृतग्रन्थविरोधः । उपपद्यते परमाधाराग्निहोत्राधिकरणगता सोमस्य फलभावनाकरणत्वोक्तिः, अभेदलक्षणायां सानुपपन्ना । स्यादित्यर्थः ।

ननु—यथारुणापदस्य लक्षणया द्रव्यप्रतिपादकत्वेपि तत्परतृतीययारुण्यनिष्ठमेव करणत्वं बोध्यते तथा सोमवतेतिलक्षणायामपि तृतीयायाः सोमनिष्ठकरणताबोधकत्वं स्वीकृत्योक्तग्रन्थगता भावनान्वयित्वोक्तिः श्रौताङ्गत्वोक्तिश्च किं नोपपाद्यतेऽत आह—द्रव्यस्येति । यथाह्यारुण्यं क्रयान्वयित्वादेकहायन्या सह शाब्दबोधे समप्रधानतयावगतमर्थादेकहायनीं प्रति परिच्छेदकतात्मकं गुण-

तदेतदग्रे वक्ष्यामः । किंच सोमेन यजेतेति हि यागस्योत्पत्तिवाक्यं नाधिकारवाक्यम् । 'ज्योतिष्टोमेन स्वर्गकामो यजेत'इत्यस्याधिकारवाक्यत्वात् । उत्पत्तिवाक्ये च नेतिकर्तव्यताकाङ्क्षा, इष्टविशे-

---

भावं प्रतिपद्यते नैवं शाब्दबोधे सोमस्य यागेन समप्राधान्यसिद्धिपूर्वकमर्थाद्यागे गुणत्वं वक्तुं शक्यं, समानपदोपात्ततया भावनाकरणत्वेनावगतं यागं प्रति सोमोऽङ्गत्वेनान्वेतीति भावार्थाधिकरणसिद्धत्वात् । एकहायनीमुष्ट्यादि प्रति आरुण्यैचतुष्ट्वादेरिव यागं प्रति सोमस्य तादर्थ्याभावप्रसङ्गाच्चेत्याशयः । यद्वा—किमिति प्रधानविधौ सोमकरणकभावनायाः फलभावनान्वयं पुरस्कृत्य ग्रन्था व्याख्यायन्ते प्रकृतविधावेव तादृगन्वयः स्वीक्रियतामत आह—द्रव्यस्येति । द्रव्यं हि केवलं श्रुतं मत्वर्थलक्षणयाङ्गत्वेन स्वीकर्तुमुचितं न तद्विशिष्टभावनेतिकर्तव्यतात्वेन तस्या अश्रुतत्वादध्याहाराच्च लक्षणाया ज्यायस्त्वादिति भावः । यद्वा यथाग्नेयोष्टाकपाल इत्यत्र विद्वद्वाक्यविहितयागानुवादेनाग्निविशिष्टद्रव्यविधिर्नाश्रीयते द्रव्यदेवतयोः संबन्धस्य प्रागसिद्धत्वात् , तथा सोमयागयोः संबन्धस्य प्रागसिद्धत्वान्न सोमविशिष्टस्य विधेयता संभवति । अतो यजेतेत्यस्योपव्ययत इतिवच्छुद्धकर्मविधित्वमङ्गीकृत्य सोमेनेत्यस्य कल्प्यविशेषणविध्यन्वयो वक्तुमुचितः । अलं तादृशपदयुक्तविधिकल्पनया मत्वर्थलक्षणया चेत्यत आह—द्रव्यस्येति । देवतोद्देश्यकत्यागकर्मतात्मको हि द्रव्यसमवायी देवतासंबन्ध एकयागभावनान्वयाधीनसिद्धिर्न द्रव्यदेवतयोर्यागभावनान्वयविधिपरे वाक्ये सिद्धवन्निर्देष्टुं शक्यते, शक्यते तु फलभावनान्वयितया यागविधिपरवाक्ये यागसोमसंबन्धस्य सिद्धवन्निर्देशः । अबाधितप्रथमबोधादेव सोमादेर्विधेययागफलभावनान्वयमनपेक्ष्य यागाङ्गत्वसिद्धेः । नच श्रुतेन यजेतेत्यनेनान्वयं प्राप्य निराकाङ्क्षं सोमेनेतिपदं कल्प्यपदान्तरान्वयं प्रापयितुमुचितं, विशिष्टविध्युत्तरकालं तु समापतन्ती न्निशेषणविधिकल्पना न दोषाय फलमुखत्वादित्याशयः ।

अग्रे—प्रकरणनिरूपणावसरे । ननु माभूत्सिद्धसोमस्येति कर्तव्यतात्वं तदनुरक्तप्रत्ययार्थस्य तु दध्यनुरक्तकारकस्य फलभावनाकरणत्ववत्संभवति फलभावनेतिकर्तव्यतात्वमत आह—किंचेति । न तावत्प्रत्ययवाच्यकारकस्येतिकर्तव्यतात्वसंभवः क्रियासाधनात्मना तृतीययाभिहितस्य क्रियायामभेदान्वययोग्यत्वादिति दर्शयितुं प्रकृतस्यापि सोमवाक्यस्य निर्देशपूर्विका हिशब्दोक्तिः । यदि प्रत्ययलक्षिता सोमकरणिका भावना तत्त्वेनान्वेतीत्युच्येत तन्निराकरणायाह—नाधिकारेति । उत्पत्तिवाक्ये तन्मात्रपरे वाक्ये । आकाङ्क्षेत्यनन्तरं तदन्वयमाक्षिप-

षाकाङ्क्षाकलुषितत्वेनेतिकर्तव्यताकाङ्क्षाया विस्पष्टमनुत्थानात्। तत्सिद्धं सोमस्य नेतिकर्तव्यतात्वेन भावनायामन्वयः। तस्माद्विशिष्टविधांन्नन्वयानुपपत्त्याऽवश्यं मत्वर्थलक्षणा वाच्येति।

नन्वेवमपि सोमेन यजेतेयत्र न विशिष्टविधानम्, गौरवात्, मत्वर्थलक्षणापाताच्च। किं तु दध्ना जुहोतीतिवद्गुणमात्रविधानमस्तु विधिशक्तेर्गुणे संक्रमात्। यथाहुः—

सर्वत्राख्यातसंबद्धे श्रूयमाणे पदान्तरे।
विधिशक्त्युपसंक्रान्तेः स्याद्धातोरनुवादता॥ इति।

न च यागस्याप्राप्तत्वान्न तदुद्देशेन सोमविधानमिति वाच्यम्। 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यनेन यागस्य प्राप्तत्वात्। न चास्याधिकारविधित्वेन नोत्पत्तिविधित्वमिति वाच्यम्। 'उद्भिदा यजेत पशुकामः' इतिवदेकस्यैवोभयविधित्वोपपत्तेः। एवं च सोमेन यजेतेत्यत्र न मत्वर्थलक्षणा। यदि ह्यत्र विशिष्टविधानं स्यात्तदान्वयानुपपत्त्या मत्वर्थलक्षणा स्यात्। 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यत्र तु यागविधाने कचिन्न मत्वर्थलक्षणा। न तावदेतस्मिन् वाक्ये, ज्योतिष्टोमेन यागेन स्वर्गं भावयेदिति सामानाधिकरण्येनैव नामपदस्यान्वयात्। नापि सोमेन यजेतेत्यत्र, यागोद्देशेन सोमविधानात् सोमेन यागं भावयेदिति।

तीति शेषः। ननूत्पत्तिवाक्यगतानामपि नाम्नामितिकर्तव्यतार्थकत्वं सप्तमान्त्येऽभ्यधायि तत्कथमसत्यां तत्र तदाकाङ्क्षायां स्यादत आह—विस्पष्टमिति। इतिकर्तव्यतान्वयाक्षेपकत्वेनेत्यर्थः। यथाहीष्टविशेषाकाङ्क्षा सत्यपि नोत्पतिवाक्ये तद्विशेषान्वयमाक्षिपति वाक्यान्तरादेव तल्लाभात्तथा यत इष्टविशेषलाभस्तत एव फलवदफलसंनिधिकल्पितवाक्यान्तरैकवाक्यत्वादितिकर्तव्यतान्वयलाभान्न सत्यपि तदाकाङ्क्षेतिकर्तव्यतान्वयमाक्षिपति यद्वशाल्लक्षणाश्रीयेत। अन्वयानुपपत्त्या त्वाश्रीयमाणा पूर्वोक्तनयेन त्वदुक्तदृष्टान्तेन च प्रकृतावेवोचिताश्रयितुम्। ज्योतिरादिनामस्वपि प्रकृतावेव धर्मलक्षणाश्रीयते ननु प्रत्ययेनोत्तरकालत्वादेः। प्रकृते च प्रकृतौ मत्वर्थलक्षणाया एव संभवात्तदाश्रयणमित्याशयः। सोमस्य सोमसंबंधिनः कारकादेः।

एवमपि विशिष्टविधौ मत्वर्थलक्षणाया आवश्यकत्वेपि। ननु विशिष्टविध्यभावेऽपि यागस्वरूपार्थतया विधावानर्थक्यादपूर्वसाधनात्मना तमुद्दिश्य सोमविधौ

नन्वनुवादेऽप्यस्ति मत्वर्थलक्षणा । अतएवोक्तम्—

विधाने वानुवादे वा यागः करणमिष्यते ।
तत्समीपे तृतीयान्तस्तद्वाचित्वं न मुञ्चति । इति ।

अतश्च विशिष्टविधाविव गुणविधावप्यस्त्येव मत्वर्थलक्षणेति चेत्, मैवम् । गुणान्वयानुपपत्त्या हि मत्वर्थलक्षणाऽङ्गीक्रियते । यदा तु भावनायां धात्वर्थस्य करणत्वेनान्वयस्तदान्वयानुपपत्त्या साङ्गीकर्तव्या । गुणविधौ च न धात्वर्थस्य करणत्वेनान्वयो मानाभावात् । न हि दध्ना जुहोतीत्यत्र होमस्य करणत्वं श्रूयते तद्वाचकतृतीयाद्यभावात् । कल्प्यते इति चेन्न । गुणस्य तत्र विधित्सितत्वेन साध्याकाङ्क्षायां साध्यत्वकल्पनाया एवोचितत्वात् । दध्ना होमं भावयेदिति ।

भवेदेव मत्वर्थलक्षणा यद्यागेनापूर्वं कुर्यात्तत्सोमवतेतीत्यत आह—नापीति । लक्ष्यमाणापि साधनता न यागविशेष्यतया लक्ष्यते गौरवात्किंतु विशेषणतया, ततश्च सोमेनापूर्वसाधनं भावयेदिति विनैव मत्वर्थलक्षणया वाक्यार्थसंभव इत्याशयः ।

स्यादेतत् । नापूर्वसाधनमुद्दिश्य विहितानामपूर्वार्थत्वं सिध्येत्, विशिष्टोद्देशेन विहितस्य विशेषणाङ्गत्वेऽर्थज्ञानमुद्दिश्य विहिताध्ययनस्यार्थाङ्गत्वापत्तेः । अतोऽपूर्वार्थतामिच्छतोक्तविधवचनव्यक्त्याश्रयणेन मत्वर्थलक्षणामाश्रित्यापूर्वोद्देशेन सोमविधानं स्वीकार्यमिति शङ्कते—नन्विति । तद्वाचित्वं तत्प्रतिपादकताम् । न वयमुद्देश्यतावच्छेदकरूपप्रवेशेनापूर्वार्थतां धर्मेषु ब्रूमः, किंतु साधनतयोद्दिश्य विहितानां साध्यार्थत्वनियमात् । दृश्यते चेक्षणसाधनसंस्कारस्याञ्जनादेरीक्षणार्थत्वव्यवहारः । साधनता तु फलोपधानात्मिका भाव्यशरीरनिक्षिप्ता न वेत्यन्यदेतत् । त्वन्मते परमुलूखलतत्प्रोक्षणयोरिव व्रीहिद्रव्यस्य स्विष्टकृदादिकर्मणश्चापूर्वार्थत्वाविशेषान्न व्रीह्यनुरोधेन प्रतिपत्तिलोपः स्यात् । तस्मात् सोमेनापूर्वसाधनं भावयेदिति विनैव मत्वर्थलक्षणया वाक्यार्थोपपत्तिरित्याशयेनाह—मैवमिति । ननु न व्रीहीणामिव यागस्य कर्मत्वं श्रूयते येनोक्तविधवाक्यार्थः स्यात् । यजेतेतिपदात्तु भावार्थाधिकरणन्यायेन भावनायां यागस्य करणत्वेनैवान्वयप्रतीतिरिति मत्वर्थलक्षणाया आवश्यकत्वमत आह—गुणेति । गुणस्येति । एवेति शेषः । उभयोर्गुणधात्वर्थयोरप्राप्तत्वे प्राप्तत्वे वा भावार्थाधिकरणन्यायः, यथा सिद्धान्ते सोमवाक्ये ऐन्द्रवायवाग्रान्ग्रहान्गृह्णीयादित्यत्र वा । गुणमात्रस्याप्राप्तत्वे तु फलश्रवणे तदश्रवणे च फलमुद्दिश्य धात्वर्थमुद्दिश्य वा गुणस्यैव विधित्सितत्वान्न धात्वर्थस्य करणत्वेनान्वय इति भावः । ननु प्रकृत्यर्थान्वितस्वार्थाभिधा-

न चायमस्ति नियमो भावनायां धात्वर्थस्य करणत्वेनैवान्वयो न प्रकारान्तरेणेति, षष्ठाद्यपूर्वपक्षानुत्थानापत्तेः ।

षष्ठाद्ये हि यजेत स्वर्गकाम इत्यादौ प्रत्ययवाच्यायां वक्ष्यमाणार्थभावनायां समानपदश्रुत्या यागस्य भाव्यत्वमाशङ्क्यापुरुषार्थत्वेन परिहृतम् । यदि च धात्वर्थस्य करणत्वेनैव भावनायामन्वयस्तदा भाव्यत्वशङ्कैव नोदेतीति व्यर्थं षष्ठाद्यमधिकरणमापद्येत ।

किं च वाजपेयाधिकरणे तन्त्रसंबन्ध आशङ्क्य परिहृतः । धात्वर्थस्य करणत्वेनैवान्वये तन्त्रसंबन्धशङ्कैव न स्यात् । तन्त्रसंबन्धशङ्कापरिहारौ च व्याख्यातौ ।

किंच धात्वर्थस्य न करणत्वेनैवान्वयः । गुणकामाधिकरणे आश्रयत्वेन धात्वर्थान्वयस्योक्तत्वात् । तथाहि—दध्नेन्द्रियकामस्य जुहुयादित्यत्र न तावद्धोमो विधीयते तस्य वचनान्तरेण विहितत्वात् । नापि होमस्य फलसंबन्धः, गुणपदानर्थक्यापत्तेः । नापि गुणसंबन्धं विधत्ते, फलपदानर्थक्यापातात् । नाप्युभयसंबन्धं विधत्ते प्राप्ते कर्मण्यनेकविधाने वाक्यभेदापत्तेः । यथाहुः—

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः ॥ इति ।

अत्र च कर्मपदवद् गुणेत्युपलक्षणम्, एकोद्देशेनानेकविधाने वाक्यभेदात् ।

नशक्तिः प्रत्ययगामिनी भावार्थाधिकरणन्यायेन करणत्वान्वयनियामिका वाच्या अन्यथानेकविधान्वयविषयत्वे तस्या गौरवादत आह—नचेति । व्यर्थमिति । शब्दशक्तिमहिम्ना हि करणत्वान्वयावगमे पदश्रुत्या भाव्यत्वान्वयशङ्काया असंभवात्तन्निराकरणं व्यर्थमित्याशयः । सत्यपि प्रकृत्यर्थान्विताभिधायित्वे प्रत्ययानामीप्सितानीप्सितसाधारणविषयताया एव शक्यान्वयत्वाभ्युपगमान्न गौरवापत्तिः ।

ननु भूतभव्यन्यायात् शब्दशक्तिसिद्धमपि करणत्वमपहाय भाव्यत्वान्वयः कल्प्य इति शङ्कां निराकर्तुं षष्ठाद्यमत आह—वाजपेयेति ।

शब्दशक्त्यनभिज्ञस्यैव कस्यचित् संभवत्यास्तन्त्रसंबन्धशङ्कायाः संभवति परिहारोऽत आह—धात्विति । आश्रयत्वेन फलभावनाकरणीभूतगुणावच्छेदकरूपनिरूपकत्वेन । ततश्च भावनान्वयित्वमपि नास्ति नतरां तत्करणत्वमित्यर्थः ।

एकोद्देशेनति । प्राप्तस्यैकस्यानेकसंबन्धविधान इत्यर्थः । अन्यथा होममुद्दि-

अतएव ग्रहैकत्वाधिकरणे ग्रहं संमार्ष्टीत्यत्र ग्रहोद्देशेन एकत्वसंमार्गविधौ वाक्यभेदाद् ग्रहैकत्वमविवक्षितमित्युक्तम् ।

रेवत्यधिकरणे च 'एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत', इत्यत्र वारवन्तीयस्य रेवतीसंबन्धे अग्निष्टोमसामसंबन्धे फलसंबन्धे च विधीयमाने वाक्यभेदाद्भावनोपसर्जनं भावनान्तरं विधीयते इत्युक्तम् । तस्मात्प्राप्ते होमे नोभयविधानं संभवति, नापि होमान्तरं विधीयते, गौरवात् । प्रकृतहानाप्रकृतकल्पनाप्रसङ्गात्, मत्वर्थलक्षणाप्रसङ्गाच्च ।

नापि दध्येव केवलं करणत्वेन विधीयते इति युक्तम् । केवलस्य व्यापारानाविष्टस्य करणत्वानुपपत्तेः, कर्तृव्यापारव्याप्यत्वनियमात्करणत्वस्य । किं तर्हि विधीयते इति चेत् दध्नेति तृतीययोपात्तं दधिकरणत्वं फलभावनायां करणत्वेन विधीयते प्रत्ययार्थत्वेन दध्नोऽपि तस्य प्राधान्यात् । एवंच दधिकरणत्वेनेन्द्रियं भावयेदिति वाक्यार्थः । करणत्वं च किंप्रतियोगिकमित्यपेक्षायां सन्निधिप्राप्तो होम आश्रयत्वेन संबध्यते । ततश्च सिद्धो धात्वर्थस्याश्रयत्वेनान्वयः ।

श्येन्द्रियस्य विधानाभावेन प्रकृतासिद्धेः । अत एव कर्मग्रहणस्योपलक्षणत्वादेव। गुणग्रहणोपलक्षणत्वस्य प्रकृतादन्यत्रापि फलमाह—रेवतीति ।'त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसीम कृत्वा ब्रह्मवर्चसकामो यजेत' इति यागं विधाय पठिते हि'एतस्यैव'इति वचसि वारवन्तीयगुणस्य फलसंबन्धशङ्कायवाक्यभेदेन परिहारोऽभ्यधायि । नचात्रानेकगुणानां विधित्सितत्वं, पशूनां फलत्वात्, स्तोत्रस्याश्रयत्वात् । ननु रेवत्यधिकरणत्वमेव दधिकरणत्ववत्फलोद्देशेन विधेयं भवतु, तन्निरूपकत्वेन च वारवन्तीयमग्निष्टोमसामकार्यमितिपूर्ववाक्यांस्थवारवन्तीयान्वयान्न विधेयान्तरापत्त्या वाक्यभेद इति चेत्, न । प्रधानविधिशेषभूतेन पूर्ववचसा प्रधानयागशेषत्वेनोपस्थापितस्य वारवन्तीयस्याश्रयत्वेनान्यान्वयासंभवात् सप्तम्यभिहिताधिकरणत्वस्य तृतीयांतैतच्छब्देन परामर्शासंभवाच्च । गौरवं प्रकटयति—प्रकृतेति ।

करणत्वविशिष्टं दध्येव फले विधीयतां तत्राह—दध्नोऽपीति । ततश्चेति । यद्यपि संनिधिवशादेव होमस्याश्रयत्वं सिद्धं तथापि समभिव्याहृतधातुर्यथाप्राप्ति होममनुवदन्नाश्रयत्वेनैव तं बोधयतीति न भावनायां करणत्वेन स्वार्थबोधकत्वनियमो धातुषु संगच्छत इत्याशयः ।

प्रकृतमनुसरामः। तत्सिद्धं धात्वर्थस्य न करणत्वेनैवान्वय इति। किं तर्हि क्वचित्करणत्वेन क्वचित्साध्यत्वेन क्वचिदाश्रयत्वेनेति। गुणविधौ साध्यत्वेनैवान्वयः संभवतीति न मत्वर्थलक्षणायाः प्रयोजनम्। किंच गुणविधौ मत्वर्थलक्षणायां गुणस्य धात्वर्थाङ्गत्वे किं मानमिति वक्तव्यम्। न तावच्छ्रुतिः। मत्वर्थलक्षणायां तृतीयाश्रुतिर्मत्वर्थस्यैवाङ्गत्वे मानं स्यात्, न गुणस्याङ्गत्वेऽपि। समभिव्याहारात्मकं वाक्यमिति चेत्तर्हि स्वतन्त्रमेव मानमुत लिङ्गश्रुती कल्पयित्वा। नाद्यः, बलाबलाधिकरणविरोधात्। तत्र हि वाक्यं लिङ्गश्रुती कल्पयित्वाऽङ्गत्वे मानमित्युक्तम्। द्वितीये प्रत्यक्षां श्रुतिमुत्सृज्य श्रुत्यन्तरकल्पने तस्या एव वा आवृत्तिकल्पने व्यर्थः प्रयासः समाश्रितः स्यात्। विशिष्टविधौ चागत्या तदाश्रयणम्।

किंच भवतु श्रुत्यन्तरकल्पनम्। तथापि तत्सहकृतः प्रत्यक्ष एव विधिर्धात्वर्थाङ्गत्वेन गुणं विधत्ते, उत कल्पितं विध्यन्तरम्। कल्पितमिति चेन्न, श्रुतविधेर्व्यर्थतापत्तेः। नहि तेन तदा गुणो विधीयते, कल्पितविध्यन्तराङ्गीकारात्। नापि धात्वर्थः। तस्य वचनान्तरेण विहितत्वात्।

अथ श्रूयमाण एव विधिः कल्पितश्रुतिसहकृतो धात्वर्थाङ्गत्वेन गुणं विधत्ते इति चेत् तर्हि तत्र कथं धात्वर्थस्यान्वयः करणत्वेनेति चेन्न, अन्वयानुपपत्तेः। नहि संभवति दध्ना होमेनेति चान्वयः। साध्यत्वेनैवान्वयः—दध्ना होमं भावयेदिति चेत्—न। तथा सत्यनुवादेऽपि धात्वर्थः करणत्वेनैवान्वेतीत्येतदुपेक्षितं स्यात्। विवक्षितवाक्यार्थश्च विनैव मत्वर्थलक्षणयाङ्गीकृतः स्यात्। तस्मान्न गुणविधौ मत्वर्थलक्षणा।

यत्तु 'विधाने वानुवादे वा' इति वार्तिकं, तत्प्रतीतिमवलम्ब्य,

नतावदिति। मत्वर्थलक्षणातः पूर्वं यागकर्मकभावनाकरणत्वेन दध्न उपस्थितिं कुर्वन्ती विभक्तिः सिद्धान्तन्यायेन श्रौताङ्गत्वव्यवहारं प्रवर्तयतीति न वक्तुं शक्यं, जुहोतीतिपदशक्तिमहिम्ना होमकरणिकाया एव भावनायाः प्रतीतेरित्याशयः। नचारुण्यन्यायोऽत्रेत्याह—मत्वर्थेति। विलक्षणानुपूर्वीकल्पनमभिप्रेत्य श्रुत्यन्तरेति। श्रुतजातीयाकल्पनमभिप्रेत्य तस्याइति।

तर्हि तत्रेति। कल्पितश्रुत्यर्थान्वितविधिबोधावसरे किं करणत्वेनैवान्वयं वदसि

न वस्तुगतिम्। तथाहि—यावद्धि अग्निहोत्रं जुहुयादिति वाक्यं नालोच्यते, केवलं दध्ना जुहोतीति वाक्यमालोच्यते, तदा षष्ठाद्यन्यायेन होमस्याभाव्यतां जानतां प्रतिपदाधिकरणभावार्थाधिकरणवासनावासितान्तःकरणानां भवत्येतादृशी मतिः, यद्दधिमता होमेनेष्टं भावयेदिति। प्रतिपदाधिकरणे हि सोमेन यजेतेत्यादिषु किं गुणधात्वर्थयोः फलभावनाकरणत्वेनान्वयः, उत एकस्यैवेति संदिह्य प्रधानसंकल्पलाभाद्, विनिगमनाविरहाच्च सर्वेषां फलभावनाकरणत्वेनान्वयमाशङ्क्य लाघवादेकस्यैव फलभावनाकरणत्वमित्युक्तम्। भावनाकरणत्वं हि भावनाभाव्यनिर्वर्तकतया, भाव्यं च स्वर्गादि नादृष्टमन्तरेणेति अनेकेषां करणत्वेऽनेकादृष्टकल्पनाप्रसङ्गात्। तस्मादेकस्यैव करणत्वम्।

यदाप्येकस्य तदापि किं द्रव्यगुणयोः फलभावनाकरणत्वम्, उत धात्वर्थस्येति भावार्थाधिकरणे संदिह्य द्रव्यगुणयोरेव भावनाकरणत्वम्, 'भूतं भव्यायोपदिश्यते' इति न्यायादित्याशङ्क्य धात्वर्थस्यैव भावनाकरणत्वम्, पदश्रुतेर्बलीयस्त्वादित्युक्तम्। अतश्च सिद्धमेतद्वाक्यान्तरानालोचनदशायां गुणविधावपि धात्वर्थस्य करणत्वाशङ्कायां गुणपदे मत्वर्थलक्षणेति।

अन्यथा वेत्यर्थः। अनेकादृष्टेति। यद्यपि सिद्धान्ते द्रव्यादिनियमादृष्टकल्पनादनेकादृष्टकल्पना तुल्या तथापि दृष्टार्थद्रव्यादिविधानेन पर्यवसिते तद्विधौ द्रव्यादिकार्याश्रितनियमस्य फलत्वेनादृष्टकल्पना पूर्वपक्ष्यभिमतद्रव्यादिजन्यतत्कल्पनातो लघीयसी, विधिपर्यवसानाय कल्प्यमानस्य तस्य शाब्दबोधविषयत्वकल्पनाधिक्यादिति ज्ञेयम्। यत्तु नियमानुपपत्त्या नियम्यमानद्रव्यादिजन्यत्वेनैव कल्पितमदृष्टं नियमादृष्टमियांस्तु पूर्वपक्ष्यभिमतादृष्टाद्विशेषोऽस्य यन्नोद्देश्यतया कल्प्यते। इत्थंचानुषङ्गिकमदो न कृष्णलचरौ स्वार्थमवघातमनुष्ठापयतीति शक्यते वक्तुमिति। तन्न। अधिकरणनियमादृष्टात्मकसंस्काराय प्रतिहविः प्रयाजशेषाभिघारणानावृत्त्यापत्तेः 'अवदानाभिघारणासादनेषु' इति पाञ्चभिकाधिकरणविरोधात्। स वै ध्रुवामेवाग्र इत्यस्यानुपपत्तेश्च। विद्यमानसोमेन यजमानेन नियमादृष्टाय क्रयाकरणप्रसक्तेः षाष्ठन्यायविरोधात्। कर्तृनियमादृष्टात्मकसंस्कारलाभाय मैत्रावरुणस्य दशमाध्यायगतसप्तमपादस्थन्यायसिद्धभागकल्पनानापत्तेश्च। पवमानेष्टिष्वग्निहोत्रहवण्या निर्वापेणेवोद्देश्येनाप्यदृष्टेन कृष्ण-

यदा त्वग्निहोत्रं जुहोतीति होमविधायकं वाक्यान्तरमालोच्यते तदा होमस्य वाक्यान्तरेणैव विहितत्वात्तदुद्देशेन गुणमात्रं विधीयते इत्यालोचनान्न मत्वर्थलक्षणेति। अतएवोक्तं पार्थसारथिमिश्रैराघाराग्निहोत्राधिकरणे 'फलतो गुणविधिरयं न प्रतीतितः' इति।

यद्वा एतद्वार्तिकमधिकारविध्यभिप्रायम्। उद्भिदा यजेतेत्यादीनामधिकारात्। तत्र हि यागो विधीयताम्, उत्पत्तिवाक्यसिद्धो वानूद्यताम्, उभयथापि धात्वर्थस्य करणत्वेनान्वयात् तृतीयान्तस्य तद्वाचित्वम्। अन्यथान्वयानुपपत्तेरिति। तस्माद् गुणविधौ विनापि लक्षणामन्वयोपपत्तेर्न मत्वर्थलक्षणेति। अतश्च सोमेन यजेतेत्यत्र न विशिष्टविधानम्, किंतु गुणमात्रविधानम्, यागस्तु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यस्मिन्वाक्ये विधीयते इत्येव युक्तम्। अन्यथा मत्वर्थलक्षणापत्तेरिति।

अत्रोच्यते। यद्यपि यागोद्देशेन सोमविधौ न मत्वर्थलक्षणा,

लचरौ नियमाप्रयुक्तिः सत्यपि प्रयोजकसंभवे प्रयोज्यासंभवेनैवोपपन्ना। यदनुपपत्त्या चादृष्टं कल्प्यते तदुद्देश्यत्वेनैव तकल्पनमुचितमिति न नियमानुपपत्तिकल्पितस्य द्रव्यादिजन्यत्वसंभवः। नचोक्तद्रव्यविशेषविशिष्टयागात्मना फलापूर्वजनकतास्वीकरणादेव नियमोपपत्तेरलमदृष्टान्तरकल्पनया तज्जनकविशेषचिन्तया चेति शङ्क्यं, यागसमवायिसाधनताभिन्नसाधनताशालितयावगतस्य यागसमवायिसाधनतावच्छेदकत्वकल्पनायोगात्। विशिष्टस्य फलसाधनताश्रयत्वे विशेष्ययागस्येव विशेषणद्रव्यस्याप्यावश्यकत्वेन प्रतिनिधयसंभवापत्तेश्च, यथायोग्यं व्यवहिताव्यवहितोत्तरक्षणसंबन्धेन प्रयाजादिवैशिष्ट्यस्यापि यागगतसाधनतावच्छेदकत्वसंभवेन तेष्वप्यदृष्टकल्पनानापत्तेश्च।

ननु विधानेवेतिवार्तिकमुद्भिदधिकरणसिद्धान्तस्थं तत्र गुणविधिगतापातवोधोपन्यासस्य न प्रकृतोपयोगं पश्यामोऽतआह—यद्वेति। अधिकारादिति। उद्भिद्वाक्यस्य प्रकृतत्वात्तत्समानन्यायानि विध्यन्तराण्येवामुना ग्रन्थेन विषयीक्रियन्त इत्यर्थः। अधिकारविधिग्रहणं च स्वरूपेण धात्वर्थमनुवदतां करणत्वेन तदन्वयं बोधयतां 'पौर्णमास्यां पौर्णमास्या यजेत, वाजपेयेन यजेत' इत्यादीनामुपलक्षणार्थम्।

तत्रैव वाक्ये कर्मोत्पत्तिपरतोचिता यस्य तत्परताग्राहकशब्दान्तराद्यन्यतरत्संभवति। न च प्रकृताग्नीषोमीयादित्यागेनापूर्वयागविधायकं ज्योतिष्टोमवाक्य-

तथापि यागस्याप्राप्तत्वात्सोमेन यजेतेत्यत्र न यागोद्देशेन सोमविधानं संभवति । न च 'ज्योतिष्टोमेने'त्यादिना यागस्य प्राप्तत्वात्तदुद्देशेन गुणमात्रं विधीयत इति वाच्यम् । तस्याधिकारविधित्वेनोत्पत्तिविधित्वानुपपत्तेः । कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः, तेन च विहितस्य कर्मणः फलविशेषसंबन्धमात्रमधिकारविधिना क्रियते । फलविशेषसंबन्धबोधकस्याधिकारविधित्वात् । यथा आग्नेयोऽष्टाकपालो भवतीत्येतद्विहितस्य कर्मणः फलविशेषसंबन्धमात्रं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्यं विधत्ते इति तस्याधिकारविधित्वं, नोत्पत्तिविधित्वम् ।

स्यादेतत् । दर्शपूर्णमासाभ्यामित्येतस्य नोत्पत्तिविधित्वं संभवति, आग्नेयोऽष्टाकपाल इत्यादिवाक्यानर्थक्यापत्तेः । नहि तदा तेन कर्म विधीयते, तस्य दर्शपूर्णमासाभ्यामित्यनेन विहितत्वात् । नापि गुणविधानं संभवति, प्राप्ते कर्मणि अनेकगुणविधाने वाक्यभेदापत्तेः ।

मित्यत्र किंचिन्मानम् । सोमवाक्ये तु पश्वाद्यवरुद्धेषु यागेषु अनिविशमानस्य गुणस्य संभवत्यपूर्वकर्मपरताग्राहकत्वम् । अतो न ज्योतिष्टोमवाक्यप्राप्तकर्मानुवादेन सोमविधिरित्याशयेन समाधत्ते—अत्रेति । तस्येति । प्रकृतयागानामेव फलसंबन्धपरतया संभवद्गतिकस्य नापूर्वकर्मविधित्वं संभवतीत्याशयः । कर्मेति । तत्स्वरूपबोधकतामात्रं ह्युत्पत्तिविधित्वमिति योजना । तच्चोक्तन्यायेन सोमवाक्ये एव संभवतीति भावः । अथ सोमवाक्ये दूरस्थाविहितद्रव्यकविश्वजिदाद्यनुवादेन संभवद्विधेरुपादेयसोमगुणस्य न स्ववाक्ये कर्मोत्पत्तिपरताक्षेपकत्वं संभवति, संभवति त्वनुपादेयफलसंबन्धपरे ज्योतिष्टोमवाक्ये विश्वजिदाद्यविपरिवृत्त्या तद्भिन्नकर्मोत्पत्तिपरत्वमनन्यथासिद्धानेकवैकृतलिङ्गवशेनाग्नीषोमीयादीनां फलसंबन्धाभावनिर्णयात् ।

अभ्युपगम्यते हि लिङ्गवशादेव स्वरसामस्वतिदेशनिर्णयः । न त्वाग्नेयादिवचोभिः क्वापि गुणविधिसंभव इत्याशयेनाह—स्यादेतदिति । न विश्वजिदाद्यविपरिवृत्तिमात्रवशेन ज्योतिष्टोमवाक्यस्योत्पत्तिपरत्वं यावत्स्वान्यशास्त्रविहितकर्मानुवादत्वबाधं विना तत्परताया अनिर्णयात् । प्रकृते च प्रकृतफलाकाङ्क्षयागानामेव फलसंबन्धप्रतिपादनसंभवात् । न च लिङ्गविरोधः । यत्र नित्यानुवादवचनानीति संभवद्गतिकत्वात् । प्रभवति तु सोमाख्यो गुणः स्ववाक्ये संनिहितकर्मानुवादतां दूरीकर्तुं भवितव्यं च प्रथमतरं तद्दूरीकरणेन । अनुवादानां

अतः आग्नेयोऽष्टाकपाल इत्यस्योत्पत्तिविधित्वं दर्शपूर्णमासाभ्यामित्यस्य चाधिकारविधित्वं युक्तम्। ज्योतिष्टोमेनेत्यस्य तु अधिकारविधेरुद्भिदा यजेत पशुकाम इत्यादिवदुत्पत्तिविधित्वेऽपि स्वीक्रियमाणे न कस्यचिदानर्थक्यम्। सोमेन यजेतेत्यस्य गुणविधित्वाद्यागोद्देशेन सोममात्रविधानाच्च न वाक्यभेद इति चेत्—मैवम्। यद्यपि सोमेन यजेतेत्यत्र न वाक्यभेदः, तथापि ज्योतिष्टोमेनेत्यस्मिन्वाक्ये कर्मस्वरूपे तस्य च फलसंबन्धे विधीयमाने गौरवलक्षणो वाक्यभेदोऽस्त्येव। सोमेन यजेतेत्येतद्वाक्यविहितकर्मणः फलसंबन्धमात्रविधाने तदभावात्। उद्भिदा यजेतेत्यत्र तु वचनान्तराभावेनागत्या तदाश्रयणम्।

नच सोमेन यजेतेत्यत्रापि कर्मणः स्वरूपे गुणे च विधीयमाने वाक्यभेदः स्यादिति वाच्यम्। श्रूयमाणेन विधिना गुणस्याविहितत्वात् विशेषणविधेरार्थिकत्वात्। सर्वत्र हि विशिष्टविधौ विशेषणविधिरार्थिकः। ज्योतिष्टोमेनेत्यस्य तूत्पत्तिविधित्वे कर्मस्वरूपं फलसंबन्धश्चेति उभयं श्रूयमाणेनैव विधिना विधातव्यमिति दृढो गौरवलक्षणो वाक्यभेदः। यथाहुः—

श्रौतव्यापारनानात्वे शब्दानामतिगौरवम्।
एकोत्त्यवसितानां तु नार्थाक्षेपो विरुध्यते॥ इति।

सन्निहितगामिताया औत्सर्गिकत्वात्। न च विश्वजिदाद्यनुवादेन सोमविधिसंभवः तथा सति तद्वाक्येन सोमद्रव्यकर्कतयावगतानां यागानां संनिहितानां सिद्धान्तरीत्या ज्योतिष्टोमपदाभिधेयत्वेन फलसंबन्धप्रसक्तौ य एतेनानिष्ट्वाथान्येनेत्यस्य निष्फलत्वापत्तेः। ज्योतिष्टोमभिन्नसोमयागाभावात्। अतो विश्वजिदादिभिन्नस्यावश्यं स्वीकर्तव्योत्पत्तिः सोमवाक्य एव स्वीकर्तुमुचितेति परिहरति—मैवमिति। ज्योतिष्टोमेन स्वर्गकाम इति वाक्ये कर्मोत्पत्तिं वदता च 'सर्वेभ्यः कामेभ्यो ज्योतिष्टोमो, वसन्ते ज्योतिष्टोमेन यजेत, वसन्ते ज्योतिषा यजेत' इत्येतेषु विनिगमकाभावात्काम्यत्वेनोत्पन्नस्य नित्यत्वज्ञापने नित्यानित्यसंयोगविरोधात्सर्वेषु कर्मोत्पत्तिपरताभ्युपेया ततश्चानेककर्मकल्पनापत्तिरिति गौरवं दर्शयितुं विषयभेदकृततात्पर्यभेदात्मकेऽपि वाक्यभेदे गौरवलक्षणत्वोक्तिः।

अविहितत्वादिति। नन्वेवमेकादशप्रयाजानित्यादिवचःसु श्रौतविधानलिप्सया विशिष्टविधितामाशङ्क्य विशिष्टविधौ वाक्यीयविधानस्यावर्जनीयत्वाद्वरं

न च सोमेन यजेतेत्यस्योत्पत्तिविधित्वे यद्यपि न वाक्यभेदः तथापि मत्वर्थलक्षणा स्यादेवेति वाच्यम् । तस्याः स्वीक्रियमाणत्वात् । लक्षणातो वाक्यभेदस्य जघन्यत्वात् । लक्षणा हि पददोषो वाक्यभेदस्तु वाक्यदोषः । पदवाक्ययोर्मध्ये पदे एव दोषकल्पनाया उचितत्वात् । 'गुणे त्वन्याय्यकल्पना' इति न्यायात् ।

अत एव 'जातपुत्रः कृष्णकेशोऽग्नीनादधीत' इत्यत्राधानानुवादेन जातपुत्रत्वकृष्णकेशत्वविधाने वाक्यभेदात्पदद्वयाभ्यामवस्थाविशेषो लक्ष्यत इत्युक्तम् । तस्माद्वाक्यभेदप्रसक्तौ लक्षणैव स्वीकार्या । तस्मात्सोमेन यजेतेत्ययमेवोत्पत्तिविधिर्न ज्योतिष्टोमेनेत्ययम् । गौरवलक्षणवाक्यभेदापत्तेः ।

किंच सोमेन यजेतेत्यत्र यागविधाने श्रुत्यर्थविधानं गुणविधाने तु वाक्यार्थविधानम् । तच्च श्रुत्यर्थविधानसंभवेऽयुक्तम् । यथाहुः—

वाक्यार्थविधिरन्याय्यः श्रुत्यर्थविधिसंभवे । इति ।

वाक्यार्थः, पदान्तरार्थ इत्यर्थः । ज्योतिष्टोमेनेत्यत्रापि फलोद्देशेन यागस्यैव विधानान्न वाक्यार्थविधानम्, तदुत्पत्तिविधित्ववादिनापि तदङ्गीकाराच्च । तस्मात् ज्योतिष्टोमेनेत्ययमधिकारविधिरेव ।

गुणविधिरिति दाशमिकोक्तिर्व्याहन्येत गुणस्याविधेयत्वे वाक्यीयविध्यप्रसक्तेरिति-चेन्न, विधेयतावच्छेदकवैशिष्ट्यस्य वाक्यलभ्यतामभिप्रेत्य तत्संभवात् । एवेति । उत्पत्त्यादिविधिव्यापारेषु द्वित्रिचतुःसंख्यव्यापारकर्तृत्वेन तत्तद्विधीनां सांप्रदायिकैर्व्यवस्थापनान्नार्थिकोत्पत्तिविधिकल्पना भवतीत्याशयः । द्वयाभ्यामिति जातपुत्रकृष्णकेशपदयोः प्रत्येकमनेकपदात्मकताशयम् ।

किंचेति । धात्वर्थस्य विशिष्टरूपेण विधाने हि विधेयतावच्छेदकस्य वाक्यलभ्यत्वेऽपि विधेयं श्रुत्या लभ्यते गुणविधौ तु विधेयतावच्छेदकविधेययोरुभयोरपि वाक्येनैव लाभ इत्याशयः । ईदृगपि श्रौतविधानमनेकविधिकल्पनया यद्यप्येकादशप्रयाजानित्यादौ नाश्रितं तथाप्युक्तन्यायेनानेकवाक्येष्वनेकयागविधिकल्पनाद्वरमेकवाक्येऽनेकविधिकल्पनामभ्युपेत्य श्रौतविधानमिति बोध्यम् । ननु ज्योतिष्टोमवाक्ये प्राप्तयागोद्देशेनाप्राप्तफलविधानेन श्रौतविधिरत आह—तदुत्पत्तीति । तस्य फलत उद्देशस्य यस्मिन्प्रीतिरितिन्यायेन परेणाप्यभ्युपगमादित्यर्थः ।

---

१ द्वयेनेति पाठः । २ न्यायकणिकादिषु ।

अपि च कर्मस्वरूपविधिस्तत्र स्वीकार्यो यत्र कर्मणो रूपमुपलभ्यते । यागस्य च द्वे रूपे, द्रव्यं देवता चेति । सोमेन यजेतेत्यत्र यद्यपि देवता नोपलभ्यते सोमयागस्याव्यक्तत्वात्, अव्यक्तत्वं च स्वार्थचोदितदेवताराहित्यम्, न तु देवताराहित्यमात्रम्, ऐन्द्रवायवं गृह्णातीत्यादिवाक्यविहितग्रहदेवतानां सत्वात्, ग्रहणार्थाभिरपि देवताभिः प्रसङ्गतो यागोपकारस्य क्रियमाणत्वात्, तथापि द्रव्यमुपलभ्यत एव । तेनापि यागत्वरूपं ज्ञातुं शक्यमेव । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र न द्रव्यं देवता वा श्रूयते । अतस्तस्योत्पत्तिविधित्वे यागविशेषज्ञानं यागसामान्यस्याविधेयत्वात् विशेषस्यैव विधेयत्वादित्यादिक्लेशेन स्यादतो नायं कर्मोत्पत्तिविधिः ।

नन्वेवमपि अग्निहोत्रं जुहोतीत्ययमपि होमोत्पत्तिविधिर्न स्यात् रूपाश्रवणात् । तच्छ्रवणाच्च दध्ना जुहोतीत्ययमेवोत्पत्तिविधिः स्यात् । तथा चाघाराग्निहोत्राधिकरणविरोधः । तत्र हि अग्निहोत्रं जुहोतीत्यस्योत्पत्तिविधित्वं दध्ना जुहोतीत्यादीनां च गुणविधित्वमुक्तमिति चेत्—सत्यम् । अग्निहोत्रं जुहोतीत्यत्र यद्यपि रूपं नोपलभ्यते, अग्निहोत्रशब्दस्य तत्प्रख्यन्यायेन नामधेयत्वात्, तदेतदग्रे वक्ष्यामः, तथापि तस्योत्पत्तिविधित्वं स्वीक्रियते, अन्यथानर्थक्यापत्तेः । दध्ना जुहोतीत्यस्य च नानर्थक्यं गुणविधित्वात् । अतः अग्निहोत्रं जुहोतीत्ययं कर्मोत्पत्तिविधिरिति युक्तम् । ज्योति-

---

यदि भूयस्त्वेनोभयश्रुतीतिन्यायेन रूपवति वाक्ये यागोत्पत्तिरुचितेति विवक्षसि हंत सोमवाक्ये देवताया अश्रवणादैन्द्रवायवादिवाक्येषु द्रव्यदेवतोभयश्रवणात्तेष्वेव यागोत्पत्तिराश्रीयतामिति शङ्कां निराकुर्वन्नाह—यद्यपीति । नह्यैन्द्रवायवादिवाक्येषु यागार्थतया देवताः प्रतीयन्ते येन तत्र यागविधिराशङ्क्येत, अतः सोमवाक्ये देवताश्रवणाभावो यागार्थदेवताभावात्, न वाक्यान्तरविहितदेवताकत्वादित्याशयवानाह—अव्यक्तत्वादिति । ननु देवतानामभावे यागानुष्ठानासंभवाद्यागमनुमाय तदनुवादेन तेषु देवताविधिराश्रयणीयः, पेषणस्येव पूषा प्रपिष्टभाग इत्यत्रात आह अव्यक्तत्वं चेत्यादिना । ग्रहणार्थतया विहितदेवतानां यागाकाङ्क्षायां यागस्य देवताकाङ्क्षायां यागार्थत्वं विनापि यागोपकारकत्वस्य देवतासु कल्पनासंभवान्नानेकवाक्येषु यागकल्पनोचितेत्यर्थः ।

ष्टोमेनेत्यस्य च नानर्थक्यमधिकारविधित्वोपपत्तेः । अतः किमर्थं संभवति रूपवति वाक्ये कर्मविधाने तद्रहिते तत्स्वीकार्यम् ।

किं च दध्ना जुहोतीत्यस्य कर्मोत्पत्तिविधित्वे पयसा जुहोत्यनेनैतत्कर्मानुवादेन न पयो विधातुं शक्यते, उत्पत्तिशिष्टदध्यवरोधात्। उत्पत्तिशिष्टगुणावरुद्धे हि न गुणान्तरं विधीयते, आकाङ्क्षाया उत्पत्तिशिष्टेनैव निवृत्तत्वात् । अतस्तेनापि विशिष्टं कर्मान्तरं विधेयम् । तथा चानेकादृष्टकल्पनागौरवम् । अग्निहोत्रं जुहोतीत्यस्य तु उत्पत्तिविधित्वे एतद्वाक्यविहितस्य कर्मणो द्रव्याकाङ्क्षायां युगपदेव खले कपोतन्यायेन 'दध्ना जुहोति', 'पयसा जुहोति' इत्यादिवाक्यैर्गुणा विधीयन्त इति नानेकादृष्टकल्पनागौरवम् ।

अतोऽग्निहोत्रं जुहोत्ययमुत्पत्तिविधिः, पयसा जुहोतीत्यादयस्तु गुणविधय इति युक्तम् । सोमेन यजेतेत्यत्र तु रूपवति वाक्ये कर्मोत्पत्तिविधाने स्वीक्रियमाणे न किंचिद्दूषणं, पक्षद्वयेऽप्येकस्यादृष्टस्य तुल्यत्वात् । तस्माद्युक्तं सोमेन यजेतेत्ययमेवोत्पत्तिविधिरित्यलमनया अप्रसक्तविधिनिरूपणानुगतप्रपञ्चनिरूपणचिन्तया । प्रकृतमनुसरामः । तत्सिद्धं विधिः प्रयोजनवन्तमप्राप्तमर्थं विधत्त इति ।

स च विधिश्चतुर्विधः । उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति । तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः । यथाग्निहोत्रं जुहोतीति । उत्पत्तिविधौ च कर्मणः करणत्वेनैवान्वयः, होमेनेष्टं भावयेदिति । न तु होमं कुर्यादिति साध्यत्वेन । तथा सति साध्यस्य साध्यान्तरान्वयायोगेनाधिकारवाक्यावगत-

---

पक्षद्वयेपीति । यद्यपि परमतेऽनेकादृष्टकल्पनास्ति तथापि स्वमते समापतन्त्यदृष्टकल्पना तावत्परमते तुल्यैवाधिका तु पूर्वमुक्तैवेत्याशयः ।

प्रयोगेति । यद्यप्याकरे चतुर्थपञ्चमाभ्यां प्रयोगविधिं निरूप्य षष्ठेऽधिकारविधिनिरूपणमकारीति प्रयोगविधेः पूर्वनिपात उचितस्तथाप्यधिकारिणं प्रति साङ्गप्रधानप्रयुक्तेः प्रयोगविधिना कर्तुं शक्यत्वादधिकारिनिरूपणानन्तरं तद्व्यापारनिरूपणमुचितमित्याशयेनेदम् । कृतं चाकरेपि प्रकृतिविकृतिसंबन्धि[विधि]त्रयनिरूपणान्ते प्रयोगविधिव्यापारनिरूपणमेकादशद्वादशाभ्यां प्रयोज्यपरिमाणाधीननिरूपणत्वादधिकारिणस्तन्निरूपणात्प्राक्प्रयोज्यनिरूपणं तु न दोषायेति बोध्यम्।

फलसंबन्धो न स्यात् । करणत्वेन त्वन्वये होमेनेष्टं भावयेत् । किं तदिष्टमित्याकाङ्क्षायां फलविशेषसंबन्धो घटते ।

न च उत्पत्तिविधाविष्टवाचकपदाभावेन कर्मणा इष्टं भावयेदिति कथं वाक्यार्थ इति वाच्यम् । विधिश्रुतेरेवेष्टबोधकत्वात् । सा हि पुरुषार्थे पुरुषं प्रवर्तयन्ती कर्मणः फलसंबन्धमात्रं बोधयति । तस्मादुक्तमुत्पत्तिविधौ कर्म करणत्वेनान्वेतीति । अत एवोद्भिदा यजेतेत्यादौ तृतीयान्त उद्भिच्छब्द उपपद्यते, उद्भिदा यागेन इष्टं भावयेदित्यन्वयोपपत्तेः । येषामपीष्टसाधनत्वं लिङर्थस्तेषामपि तृतीयान्तानां कर्मनामधेयानामन्वयोऽनुपपन्न एव । न हि संभवति याग इष्टसाधनमुद्भिदेति । तृतीयोपात्तस्य कारकस्य लिङ्गसंख्यान्वयायोग्यस्य क्रियायैवान्वयात् ।

ननु तवाप्यग्निहोत्रं जुहोतीत्यादिषु कर्मोत्पत्तिविधिषु द्वितीयान्तानां कर्मनामधेयानामन्वयोऽनुपपन्नः । न हि संभवति होमेन भावयेदग्निहोत्रमिति । सत्यम् । श्रूयमाणा तावद्द्वितीयाऽर्थाक्षिप्तसाध्यत्वानुवादः, होमस्य हि करणत्वेनान्वयात् । असाधितस्य च करणत्वानुपपत्तेः । तस्याश्चानन्वयोपस्थितौ सा सकून् जुहोतीतिवत् तृतीयार्थं लक्षयति । अग्निहोत्रेण होमेनेष्टं भावयेदितीत्युक्तं पार्थसारथिमिश्रैः । अतश्च द्वितीयान्तानां कर्मनामधेयानामन्वयो नानुपपन्नः । तत्सिद्धमुत्पत्तिविधौ कर्म करणत्वेनान्वेतीति

अङ्गप्रधानसंबन्धबोधको विधिर्विनियोगविधिः । यथा दध्ना जुहोतीति । स हि तृतीयाप्रतिपन्नाङ्गभावस्य दध्नो होमसंबन्धं विधत्ते दध्ना होमं भावयेदिति ।

एतस्य च विधेः सहकारिभूतानि षट् प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि । एतत्सहकृतेन विधिनाङ्गत्वं परोद्देशप्रवृत्तकृतिव्याप्यत्वरूपं पारार्थ्यापरपर्यायं ज्ञाप्यते । तत्र निरपेक्षो रवः श्रुतिः । सा च त्रिविधा विधात्री अभिधात्री विनियोक्त्री चेति ।

तत्रेति । मात्रशब्दो भिन्नक्रमः कर्मस्वरूपबोधकतामात्रमुत्पत्तिविधित्वमित्यर्थः । बोधस्य चानन्यसाध्यस्यैव फलत्वसंभवादज्ञातबोधकत्वमिति लभ्यते ।

अस्य च विधेः सहकारीणि मानानि प्रदेशभेदेन कृतकरिष्यमाणसूचन-

तया मूलकृतेङ्गेपेक्षितान्यपि सुखबोधाय प्रदर्शयामः—तत्रोत्पत्तिविधेर्द्वे कार्ये कर्मोत्पत्तिः कर्मभेदशक्तिश्च। शब्दांतरमभ्यासः संज्ञा गुणः प्रकरणान्तरमित्येतानि साक्षात्प्रथमकार्ये तत्प्रणाडिकया द्वितीये च सहायतां भजन्ते। संख्या तु तेषामन्यतमेन कर्मोत्पत्तिपरतां गते विधौ तदुत्पाद्यकर्मणि पृथक्त्वनिवेशस्वाभाव्येनानेकत्वं बोधयन्ती द्वितीय एव सहायतां भजते। यदि तु क्वचित्कर्तृकपालादिगता संख्या वाजिनवत्कर्मोत्पत्तिपरतां विधेरापाद्य कर्म भेदयति तत्र गुणत्वेनैव भेदकता न संख्यात्वेन पृथक्त्वनिवेशस्वाभाव्यानपेक्षणादिति बोध्यम्।

कर्मेति चात्र भावनोच्यते न धात्वर्थः। तेन कस्यचिद्धात्वर्थभेदकत्वाभावेऽपि कर्मभेदकत्वव्यपदेशो नानुपपन्नः। तत्रापर्यायधात्वन्तरनिष्पन्नाख्यातपदात्मकं शब्दान्तरं प्रसिद्धभेदधात्वर्थोपस्थापनपूर्वकं तदनुरक्तभावनां प्रतिपादयत्तद्भेदभिन्नामेव प्रतिपादयति, यथा सोमेन यजेत हिरण्यमात्रेयाय ददातीत्यत्र। यद्यपि न गुणभूतधात्वर्थानुरोधेन प्रधानभूतभावनायामाख्यातैक्यवशेनाभिन्नतया प्रतीयमानायां भेदकल्पनमुचितम्। नचैकादृष्टकल्पनयोपपत्तावनेकादृष्टकल्पनं भावनाभेदनिबन्धनं तथापि प्रतियोग्यधीननिरूपणस्याभावस्य प्रतियोगिभेदेनेव विषयाधीननिरूपणस्य ज्ञानस्य विषयभेदेनेव धात्वर्थाधीननिरूपणाया भावनाया धात्वर्थभेदेन भिन्नाया एवं प्रतीतेरनेकादृष्टकल्पनागौरवं प्रमाणमुखत्वान्न दोषाय। यदि समस्ताग्नीषोमप्रातिपदिकादुत्पन्नतद्धितवदरुणादिपदेभ्यः पृथग्भूतक्रीणातिवदनेकधात्वनिष्पन्नं तेभ्यः पृथग्भूतं वाख्यातपदं श्रूयेत स्यान्नदासमूहालम्बनज्ञानवद्द्वित्वावच्छिन्नाभाववद्वानेकधात्वर्थविशिष्टमेकं भावनातत्त्वम्। इहत्यैकैकधातुनिष्पन्नाख्यातेन निरपेक्षप्रातिस्विकप्रकृत्यर्थानुरक्ततया प्रतीयमानं भावनास्वरूपमग्नये कृत्तिकाभ्य इत्यत्र देवताकारकवन्नैकमवगन्तुं शक्यम्। अथ ज्योतिष्टोमवाक्ये यजिश्रवणं यागानुवादत्वेन स्वीकृत्य केवलभावनाविधानमुच्येत तदनुवादेन चोक्तवाक्ययोर्धात्वर्थानुरागविधिराश्रीयेत तन्न फलवाक्यस्योत्पत्तिपरतायाः प्रागेव निरासात्। धात्वर्थाधीननिरूपणाया भावनायास्तदन्वयमन्तरेणानुवदितुमयोग्यत्वात्। अत एव शब्दान्तरगुणयोर्भेदकतायां विशेषसिद्धिः। गुणो हि पूर्वगुणाननुरक्तरूपेण संभवदनुवादेऽपि यागादौ निराकाङ्क्षत्वादिना निवेशमलभमानो भेदको भवति। शब्दान्तरं तु धात्वर्थाननुरक्तरूपेणासंभवदनुवादां भावनां धात्वर्थानुरक्तरूपेण बोधयन्पूर्वनयेन भेदयतीति। वस्तुतस्तु ज्योतिष्टोमवाक्यविहितभावनानुरञ्जकत्वेन वाक्यान्तरयोर्शाप्यमानौ धात्वर्थौ करणत्वेनान्वयं प्राप्नुत इति वाच्यं, विधेयत्वात् तत्तद्वाक्ये

निरपेक्षकरणतयावगतयोश्च ज्योतिष्टोमवाक्यगतयजिना लक्षणया युगपदुपादानात्करणयोः फले समुच्चय इति वाच्यम्। नच करणभेदो भावनाभेदमन्तरेण संभवति सैव हि भावनेत्युच्यते यद्यापारव्याप्यतां प्रतिपन्नं करणत्वाभिमतं करणतां प्रतिपद्यते। दृश्यते च करणभेदे तदनुग्राहकव्यापारभेदो लोके। एवं च ज्योतिष्टोमवाक्येपि भावनाभेदः स्यात्। एवं च निराकाङ्क्षेऽन्वयासंभवस्य गुणशब्दान्तरयोस्तुल्यत्वात्किमिति मानान्तरत्वव्यवहार इति न शङ्क्यं, स्वरूपेणाविधेयाया भावनाया एकहायनीपिङ्गाक्षीशब्दयोस्तत्तद्रूपेण द्रव्यस्येव धात्वर्थानुरक्तरूपेण विधेयत्वस्योभयत्र संभवे केन नैराकाङ्क्ष्यमित्यत्र विनिगमकाभावाच्च। यद्धि परान्वयमपेक्ष्य विधिर्गोचरयति संभवति तस्य बहुष्वपि वधूषु बहून्वयमपेक्ष्य विधिना बहुकृत्वो विधयीकरणम्। यत्र तु चतुरवत्तं जुहोतीत्यादौ सत्यपि शब्दान्तरे प्रकृतयागीयहविःसंबन्धेन जुहोत्यर्थे यागांशे प्रकृतबुद्धिर्नापैति तत्रापि प्रक्षेपभावनायाः प्रकृतभावनाभ्यो भिन्नायाः विधेयत्वादस्त्येव कर्मभेदः। अपूर्वभेदः परं नास्ति। यैस्तु द्रव्यं चिकीर्ष्यत इतिन्यायेन प्रक्षेपस्य गुणकर्मत्वात्।

गुणाद्यसंक्रान्तविधिशक्तिकं समानार्थधातुनिष्पन्नमाख्यातान्तरमभ्यासः। स च धात्वर्थभावनयोरुभयोर्भेदं बोधयति अन्यथावैयर्थ्यापातात् यथा समिधो यजति तनूनपातं यजतीत्यत्र। नचात्र समिदादिदेवतासु विधिशक्तिसंक्रमः शङ्क्यः सति यागभेदे क्रमविनियुक्तमन्त्रप्रख्यापितदेवतासंबन्धं निमित्तीकृत्य समिदादिपदानां नामत्वेन गतिसंभवे धात्वर्थविधिं परित्यज्य गुणविधेरन्याय्यत्वात्। नच वसंतमृतूनामित्यादिमन्त्रलिङ्गेन वसन्तादिदेवतानामपि प्राप्तेर्न समिदादीनामेव देवतात्वप्राप्तिरिति शङ्क्यं, सत्यपि देवतान्तरे समिद्देवतासत्त्वस्त्रात्रेण समित्पदस्य नामत्वोपपत्तेः। अन्यथाग्निहोत्रपदेप्यनुपपत्तेः। वस्तुतस्त्वाज्यस्थ्यंत्विति-प्रदेयहविःसंबन्धित्वेन समिधां प्रकाशनाद्यथा देवतात्वं प्रतीयते नैवं वसन्तस्य प्रीतेर्देवतात्वं विनापि संभवात्। यथाच विहितानुवादिवाक्यं विध्यनुसारेण नेतुमुचितमेवं कृतानुमन्त्रणमंत्रः करणमन्त्रानुसारेण नेतुमुचित इति समिदादीनामेव देवतात्वकल्पनमुचितम्। अत एव प्रयाजानुमन्त्रणानामदृष्टार्थत्वेन समुच्चयमङ्गीकृत्य पञ्चमे क्रमनियमः सिद्धान्तितः। तस्माद्युक्तो भेदः यागयोः। भेदव्यवहारश्च प्रयोगकृतः स्वरूपकृतो जातिकृतो वेत्यन्यदेतत्। यत्र त्वभ्यासेन कल्प्यमानकर्मान्तरस्य न रूपलाभस्तत्र प्रकृतानुवाद एव स्वीक्रियते यथा 'य एवं विद्वान्पूर्णमास्यां यजते य एवं विद्वानमावास्यां यजते' इति विद्वद्वाक्ययोः।

यद्यपि औवमसंयुक्तोत्पन्नमुपांशुयाजेनैवैतद्वचोविहिताभ्यां कर्मभ्यामपि लभ्येत तथापि न देवतालाभः, तद्विशेषसाधकमानाभावात्। नच 'वार्त्रघ्नी पूर्णमास्यामनूब्येते बृहद्वती अमावास्यायाम्' इत्यत्र पूर्णमास्यमावास्यापदाभ्यामिमे कर्मणी अनूद्य मंत्रविधानान्मान्त्रवर्णिकदेवतालाभः शङ्क्यः, आज्यभागयोरनुवाक्यान्तरकल्पनाक्लेशापत्तेः। अनयोश्च कर्मणोर्याज्याकल्पनापत्तेः। आसामृचामन्यतमयोर्याज्यात्वकल्पनेऽनुवाक्यासमाख्याविरोधापत्तेः। द्वयोर्द्वयोरनुवाक्ययोरेकैकस्मिन् कर्मण्यन्याय्यविकल्पापत्तेश्च। लिङ्गक्रमाभ्यामाज्यभागाङ्गत्वेन प्रतीयमानानां वाक्येनान्यत्र विनियोगाच्च। आज्यभागाङ्गत्वेन प्राप्तानां मन्त्राणां पूर्णमास्यमावास्ययोः कालयोः कर्मणोर्वा व्यवस्थापनेन नियमविधित्वे संभवति तदङ्गत्वबाधेनान्याङ्गत्वापूर्वविधेरन्याय्यत्वाच्च। अथ यदाग्नेयादिवाक्येष्विमे अनूद्य द्रव्यदेवताविधानाद्भूपलाभ इत्युच्येत तन्न, प्राप्तकर्मानुवादेनानेकगुणविधाने वाक्यभेदात्। आग्नेयवच्चस्युद्देश्यद्वयनिमित्तस्य वाक्यभेदस्यावर्जनीयत्वाच्च। अथ सर्वेभ्यः कामेभ्यो दर्शपूर्णमासावित्यत्र दर्शपूर्णमासपदनिर्दिष्टयोर्विद्वद्वाक्यस्थकर्मणोश्चतुर्थ्या सर्वे कामा देवतात्वेनोच्यन्त इतिचेत्। न। एकैकस्मै कामायान्ये यजक्रतव इत्युपक्रमगतश्रुत्यनुसारेणास्याश्चतुर्थ्यास्तादर्थ्यचतुर्थीत्वेन देवतापरत्वासंभवात्। अथासंयुक्ताज्यस्योक्तन्यायेनैतयोः कर्मणोर्हविष्ट्वेनावगतस्यानुवादेन सर्वस्मै वा एतद्यज्ञायेतिवचसि चतुर्थ्या सर्वयज्ञात्मकदेवताज्ञापनान्नानुपपत्तिरिति चेन्न। तथासत्युपांशुयाजेपि चतुर्थीसमर्पितदेवतया मान्त्रवर्णिकदेवताबाधे सति 'विष्णुरुपांशु यष्टव्यः' इत्यादिनिर्देशानुपपत्तेः। जौहवौपभृतवचःसु प्रयाजानुयाजपदोत्तरचतुर्थीवदिहापि चतुर्थ्यास्तादर्थ्यपरत्वौचित्याच्च। अथाव्यक्तत्वसामान्येन सौमिकविध्यन्तातिदेशादनयोरुद्भिदादिवद्भवतु देवतालाभ इतिचेन्न, दर्शविधिगतविध्यन्तेन निराकाङ्क्षीभवद्भिर्दीक्षणीयादिभिर्विशिष्टां भावनां विदधतः सोमविधेर्विध्यन्तेन निराकांक्षीभवद्भ्यां कर्मभ्यां विशिष्टां भावनां विदधति दर्शविधौ परस्पराश्रयापत्तेः। तादृशभावनाया ऐष्टिकप्रातःकालेऽनुष्ठानानुपपत्तेश्च 'प्रतिपद्यप्रविष्टायां यदि त्विष्टिः समाप्यते। पुनः प्रणीय कृत्स्नेष्टिः कर्तव्या'इति वचोवैयर्थ्यापत्तेश्च।

नचैवमपि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेतिवाक्ये स्वर्गकामपदं सार्वकामवाक्यप्राप्तावनुवादमाश्रित्य दर्शपूर्णमासाभ्यामित्येतद्भवत्यनयोर्देवतासमर्पकं चतुर्थ्यंतस्याप्येवंरूपत्वसंभवादिति वाच्यम्। तथासति हि प्रयाजादिविधेः सार्वकाम्यविध्येकवाक्यत्वकल्पनेनैव प्रयाजादीनां दर्शाद्यङ्गत्वं सिध्येत्। नच सन्निहितगोदोहनादिविध्येकवाक्यतया नैराकाङ्क्ष्यसंभवे दूरस्थेनैकवाक्यत्व-

कल्पना घटत इति तेषां तदङ्गत्वं न स्यात् यदि वा स्यात् विद्वद्वाक्यविहितयागाङ्गत्वमेव स्यात्। सार्वकाम्यवाक्यगतदर्शपूर्णमासपदस्य तत्प्रख्यन्यायेन तन्मात्रनामत्वात्। तथासत्याग्नेयविकारे प्रयाजदर्शनानुपपत्तिः। अतस्तृतीयान्तचतुर्थ्यन्तयोस्तुल्यरूपत्वेपि प्रकृते तृतीयान्तत्वमेव वक्तुं युक्तम्, तस्मान्न यागविधिः संभवतीत्युत्पत्त्यवगतपूर्णमास्यमावास्यासंबन्धानां यजीनां समुदायावाभ्यां वचोभ्यामनूद्येते। नच वैयर्थ्यम्। एतद्वाक्यावगतसमुदायद्वित्वाभिप्रायेण निर्ज्ञातार्थके दर्शपूर्णमासाभ्यामितिपदे सति तत्समानाधिकरणेन यजिनाग्नेयादीनां केषांचिदेव फलसंबन्धसिद्धेः। अन्यथाह्युत्पत्तौ कालयोगिषु द्विवचनासंभवाद्विद्वत्वयोगिषु चाज्यभागादिषु प्रादिपदिकासंभवादनिर्ज्ञातार्थके तस्मिन्यजिना संनिहितानां सर्वेषामेषां फलसंबन्धः स्यात्। नच यागान्तरव्यावृत्तेन नित्यवद्द्विदेवत्यत्वैकादशकपालद्रव्यकत्वात्मकैकोपाधिनाग्नीषोमीयैन्द्राग्नयोर्द्वित्वव्यपदेशार्हत्वात्तयोरेव स्यादिति शंक्यम्। ततोऽप्येकविधदेवताहविरन्वयिनोराग्नेययोर्भेदमते झटिति तदर्हत्वप्रतीतेः। स्यात्तर्हि तयोरेव फलसंबन्ध इतिचेन्न। यतो द्वित्वान्वयिनोरपि कालसंबन्धं निमित्तीकृत्य प्रातिपदिकाभिधेयत्वं कल्प्येत क्लृप्तं तु तद्विद्वद्वाक्यविहितयोस्तद्वतयोरसन्नम्यन्तयोः पूर्णमास्यमावास्यापदयोर्नामत्वेनैवाग्निहोत्राद्याधारवत्प्रतीतेः। संभवति च तयोर्विद्वत्पदोपाधिनैव द्वित्वान्वयित्वम्। भवेदनयोरेव तर्हि प्राधान्यमितिचेन्न। यतोऽनयोः प्रातिपदिकप्रकृतौ क्लृप्तायामपि द्विवचननिर्देशो विधिवाक्यद्वारकं विद्वत्पदसंबन्धं निमित्तीकृत्य कल्प्यः। आज्यभागयोश्च द्वित्वान्वये क्लृप्तेऽनुवाक्याद्वारककालसंबन्धं निमित्तीकृत्य कर्मधारयेन प्रातिपदिकप्रवृत्तिः कल्प्येति विनिगमकाभावः। भवेत्तर्हि स्ववाक्ये वाक्यान्तरे वावगतकालसंबन्धानामेव यागानां फलसंबन्धः। तत्र प्रातिपदिकसंभवात्। नच द्विवचनानुपपत्तिः, समुदायगतस्येव कालगतस्य द्वित्वस्योक्तिसंभवात्। समुदायकालयोर्गुणत्वाविशेषादिति चेत्। न। समुदायसमुदायिनोरनतिभेदेन समुदायगतसंख्यायाः समुदायिगतत्वोक्तिसंभवात्। कालस्य त्वतिभेदात्। नन्वतिभिन्ननिष्ठस्येवानतिभिन्ननिष्ठस्यापि धर्मस्य नान्यत्र संभवः, षष्ठे द्रव्यभेदेऽपि क्रियाभेदाभावोक्तेः रूपभेदेन संभवासंभवयोरुपपादने विशेष्यतावच्छेदकीभूतरूपावच्छेदेनान्यत्र दृष्टः संख्यान्वयः प्रकृतेनुपपन्नः नहि समुदायसमुदायिनोरभेदेऽपि समुदायरूपेणान्वययोग्या संख्या यागरूपेणान्वेतीति वक्तुं शक्यम्। तस्माद्विशेष्यभूतप्रकृत्यर्थगतत्वायोगे सत्यानर्थक्यतदङ्गन्यायेन विंशतिर्गाव इत्यत्र विंशतिपदोत्तरविभक्त्यभिहितैकत्वद्वित्वमपि विशेषणे समुदायेऽन्वेतीति वाच्यं, तुल्यं

च विशेषणत्वं कालेऽपीति किमिति न तद्गतसंख्याभिधानमितिचेत् न; यतो न वयमनतिभेदात्समुदायगतसंख्यायाः समुदायिषु संभवं ब्रूमः, किंतु राजसूयेन यजेतेत्यादौ विशेषणान्वयिसंख्याया विशेष्यान्वयोक्तिदर्शनात्प्रकृतेऽपि विशेषणगतसंख्याया विशेष्यान्वयं स्वीकुर्वतः केन संसर्गेण विशेषणतत्संख्यादेर्विशेष्येन्वय इति शङ्कायां संख्याश्रयतादात्म्येनेति वक्तुमनतिभेदमुदाहरामः।

नचेत्थमितिभिन्नकालादिगतसंख्यादेरन्यान्वयित्वं क्वचिद्व्युत्पन्नं, यदुपपादनाय स्वाश्रयवृत्तित्वादिः संबन्ध आश्रीयेत। समिधो यजतीत्यत्र तु यजिसामानाधिकरण्याय समित्पदोत्तरविभक्त्या यागलक्षणामाश्रित्य विभक्त्यभिहितबहुत्वस्य मन्त्रदृष्टदेवतान्वयबाधाय विभक्त्यन्तस्यैव यागनामत्वाङ्गीकाराच्च संख्याया यागान्वयित्वम्। नचैवं दर्शपूर्णमासपदेपि शक्यं केवलदर्शपदस्य तत्पर्यायस्य चैकवचनान्तस्य तत्र तत्र कर्मणि प्रयोगदर्शनेन प्रातिपदिकस्यैव कर्मनामतायास्तत्र वक्तुमौचित्यात्। तत्सिद्धमाग्नेयादीनां केषांचिदेव फलसंबन्धाय समुदायानुवादाविति। नन्वेवं विष्णुरुपांशु यष्टव्य इत्यादिवाक्यत्रयेण यागत्रयस्य विधिप्रतीतेरुपांशुयाजमन्तरा यजतीत्यत्रत्ययागान्तरस्य रूपाभावः, विष्ण्वादिलिङ्गकयाज्यानुवाक्यायुगलत्रयस्य यागत्रयेण लिङ्गक्रमाभ्यामन्वयात्। अतोऽन्तरालवाक्यं समुदायानुवादेनान्तरालविधायकमनुवादमात्रं वा स्यादितिचेन्न। जामित्वोपक्रमेण जामित्वोपसंहारेण च प्रतीयमानैकवाक्यातायां विधित्रयाङ्गीकारे बाधप्रसंगात्। उक्तोपक्रमेण पुरोडाशान्तराले किंचिद्विधित्सितमिति निर्णीते किंतदित्याकाङ्क्षायामन्तरालसंबद्ध एव वचसि यागविध्यौचित्याच्च। नच तथापि दध्यादिवाक्यप्राप्तहोमसमुदायानुवादत्वमग्निहोत्रवाक्ये स्यादैन्द्रवायवादिवाक्यप्राप्तयागसमुदायानुवादत्वं च सोमयागवचसि स्यादिति शङ्क्यम्। मूल एवोभयेषां वचसां होमयागविधायकत्वस्य प्राङ्निरासात्।

प्रकृतकर्मनाम्नः पर्यायत्वेन तदेकदेशत्वेन वा प्रतीयमानं वाक्यान्तरगतं नाम संज्ञेत्युच्यते। तद्धात्वर्थभेदज्ञापनमुखेन भावनाभेदं बोधयति यथायैष ज्योतिरित्यत्र पूर्वज्योतिष्टोमाज्ज्योतिःसंज्ञया कर्मान्तरसिद्धिः। नच दर्शामावास्याशब्दयोरन्वारम्भणीयावाक्यशेषेणैव ज्योतिर्ज्योतिष्टोमशब्दयोः केनचित्पर्यायत्वं ज्ञायते, नापि वसन्ते वसन्ते ज्योतिषेत्यत्र ज्योतिष्टोमप्रकरणपंठिते वचसि सत इवात्रत्यस्यापि ज्योतिःशब्दस्य ज्योतिष्टोमनामैकदेशत्वम्; अधिकारार्थेनाथशब्देन ज्योतिष्टोमाधिकारनिवृत्तेः, तदधिकारानुवृत्तौ हि नामैकदेशे नामग्रहणमिति वक्तुं युक्तं नान्यत्र। नचायैष भूर्वैश्वदेव इत्यत्र भूर्वैश्वदेवशब्दयोरिवैतयोरेकवाक्ये

निर्देशोऽस्ति येन सामानाधिकरण्यादेकार्थत्वं स्यात्। अनुभूयते च लोके देवदत्ताय घृतं देहि अथ देवाय गव्यमित्यादौ संज्ञाभेदानुसार्यर्थभेदः।

ज्ञाप्यभेदप्रतियोगिनि कर्मणि निवेशानर्हो गुणोपि संज्ञावत्कर्मभेदको भवति। अनर्हत्वं च द्वेधा—तस्य कर्मणो विरोधिबलवद्गुणावरुद्धत्वात्, विधीयमानगुणस्यैव वाक्यभेदाद्यापादकत्वात्। आद्योदाहरणं 'वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इति। अत्र हि वाजमन्नमामिक्षाख्यं विद्यते येषामिति व्युत्पत्त्या संभवदनुवादानपि विश्वान्देवाननूद्य न पूर्वयागे वाजिननिवेशो वक्तुं शक्यते अनुवादोपजीव्यप्राप्तिकारिण्युत्पत्तिवचसि ज्ञातयामिक्षायैव पूर्वयागस्य नैराकाङ्क्ष्यात्। यत्र तूत्पत्तिशिष्टद्रव्यावरुद्धापि क्रिया स्वकार्यनिर्वाहाय द्रव्यान्तरमपेक्षते न तत्रोत्पन्नशिष्टमपि द्रव्यान्तरं भेदकम् यथा गवा क्रीणाति वाससा क्रीणातीत्यादाविति केचित्। द्वितीयोदाहरणं यस्योभयं हविरार्तिमार्च्छेदैन्द्रं पञ्चशरावं निर्वपेत्; वषट्कर्तुः प्रथमभक्ष इति। अत्र पूर्ववाक्ये विनष्टद्रव्यकतया द्रव्यान्तरमभिलषत्यपि सांनाय्ययागे पञ्चशरावो न विधीयते महेन्द्रेण सह विकल्प्यमानतया प्राप्तस्यैन्द्रस्यापि विधेयत्वेन वाक्यभेदापत्तेः। द्वितीये च न भक्षानुवादेन प्राथम्यविधानमेकप्रसरताभङ्गापत्तेः। नचैवं दर्शेन्द्रियकामस्य जुहुयादित्यत्र प्राप्तहोमानुवादेन फलगुणसंबन्धविधाने वाक्यभेदापत्तेः कर्मान्तरं स्यादिति शङ्क्यम्। इह गुणस्यैव फलोद्देशेन विधानात्। उपपादितं चैतन्मूले तदपवादश्च रेवतीवाक्यगोचरो दर्शितः।

नचैवमपि 'यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदियात्स त्रेधातन्डुलान्विभजेद्येमध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं ये क्षोदिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुम्' इति प्राप्तिदर्शानुवादे ये मध्यमाद्यनेकगुणविधौ वाक्यभेदात्कर्मान्तरापत्तिः। स्यादेतत्। त्रेधातण्डुलानित्यत्र न मध्यमादिरूपेण विभागो विधीयते अग्निमविनियोगवशादेव तत्सिद्धेः। किंतु तण्डुलग्रहणेन प्रकृतं हविर्लक्षयित्वा विभजेदिति पूर्वदेवताभ्योऽपनीयते। 'ये मध्यमाः' इत्यादिवचोभिश्च तण्डुलदधिपयसामपनीतपूर्वदेवताकानां पूर्वयागान्वयिनां देवतान्तरसंबन्धो विधीयते। दात्रादिशब्दानां च यौगिकानामग्न्यादिशब्दसमानाधिकरणतयैकदेवताकारकप्रतिपादकत्वान्नानेकदेवताविधिनिमित्तो दोषः। एतत्प्रकरणान्नातेन 'सह श्रपयति' इति वचनेन संप्रतिपन्नदेवताकयोः सहश्रपणविधानाच्च प्राप्तं दधिपयसोरधिकरणत्वं चरुत्वं चानूद्यते। तस्माद्वाक्यभेदप्रसंगाभावान्न कर्मान्तरविधिरितिचेन्न। तण्डुलपदस्य हविर्मात्रलक्षकत्वं तावन्न संभवति।

चमसाधिकरणविरोधापत्तेः। मध्यमादिसंबद्धयच्छब्दैस्तण्डुलपरामर्शसंभवापत्तेश्च बर्हिषिहवींषीत्यत्रेवाङ्गहविषामपि ग्रहणे सति तेषामपि देवतापनयापत्तेश्च। नच तेषां देवतान्तरविध्यभावान्न पूर्वदेवतापनय इति शङ्क्यम्। उपांशुयाजाज्यवदपनयमात्रस्यैव वक्तुं शक्यत्वात्। कश्च विभजेदित्यस्यार्थो भवतो मतः? न तावन्मल्लयोरिव द्रव्यदेवतयोर्विभागः संभवति, अथ ताभ्यो न दद्यादित्यर्थो विवक्ष्यते ततः शास्त्रप्राप्तनिषेधे विकल्पः स्यात्। व्यर्थश्चैव विभागविधिर्बलवन्नैमित्तिकदेवतावज्ञादेव पूर्वदेवतापनयसिद्धेः। नह्यपच्छेदवति प्रयोगे नैमित्तिकसर्वस्वदानादिशास्त्रव्यतिरेकेण द्वादशशतनिषेधोऽभ्यर्थ्यते। त्वाष्ट्रं पात्नीवतमित्यत्र तद्धितभेदेनेव चतुर्थीभेदेन देवताकारकभेदप्रतीतेश्चावर्जनीयस्तदुभयविधिनिमित्तो वाक्यभेदः। सह श्रपयतीत्यत्र च सत्यपि साहित्यविशिष्टश्रपणविधाने मध्यमेषु नानेन श्रपणप्राप्तिः, द्रव्यान्तरसाहित्यासंभवात्। भवति हि श्मश्रुसाहित्याभावेन केशवपनाप्राप्तिः पत्न्याम्, नच नित्यप्रयोगगतश्रपणविधिना श्रपणप्राप्तिः, चित्रेष्टाविव देवतासंबन्धितया निर्दिश्यमानतण्डुलेषु तेन श्रपणाप्राप्तेः। अतश्चाष्टाकपालत्वानुवादासंभवः। अत एव च स्थविष्ठदध्नोरुभयोः श्रपणं विधेयं, क्षोदिष्ठपयसोश्च पयःश्रपणानुवादेन तत्साहित्यविशिष्टं क्षोदिष्ठश्रपणं विधेयमिति वैरूप्यापत्तिः। सत्यपि श्रपणविधौ चरुपदप्रवृत्तिनिमित्तपाकविशेषाप्राप्तिः। स्थविष्ठदध्नोरुद्देशेन देवताविधाने चोद्देश्यानेकत्वनिमित्तो वाक्यभेदः। अभ्युपगम्यतेऽयमिति चेत्। न। यतः कोऽस्य वाक्यभेदस्य पञ्चशरावगतवाक्यभेदाद्विशेषो यदयं न कर्मभेदक आसीत्। यत्तु दध्यधिकरणकचरुविशिष्टयागान्तरविधाने सहश्रपयतीत्यस्यानर्थक्यात्तदर्थवत्त्वाय स्वीक्रियमाणो वाक्यभेदो वेदानुमतत्वान्न दोषायेति तत्तुच्छम्। दध्नोऽधिकरणतया प्रतीयमानचरुगुणत्वमात्रत्यागेन दधिचरूभयविशिष्टयागान्तरविधाने वाक्यभेदपरिहारस्य तदर्थवत्त्वस्य च संभवात्।

किंचास्य देवतान्तरयुक्तस्य प्रयोगस्य फलमिति विवेचनीयम्। न तावद्याचज्जीवविधिबोधितम्। द्वैतीयन्यायेन जीवनस्य निमित्तत्वे सिद्धे षाष्ठन्यायेन च पौर्णमास्यादेस्तदवच्छेदकत्वे सिद्धे पर्वावच्छिन्नजीवनाभावे प्रारब्धप्रयोगस्य तदनुष्ठाप्यताया वक्तुमशक्यत्वात्। नाप्यारब्धं विहितं कर्मावश्यं समापनीयमिति कल्पितविधिबोधितम्। अकाले कर्मणो विहितत्वाभावेन तस्य प्रयोगस्य तद्विध्यविषयत्वात्। नच प्रकरणादस्य दर्शाङ्गत्वं, सर्वप्रयोगगतताद्दङ्गत्वे नैमित्तिकत्वविरोधात्। चिकीर्षितानन्तरं दर्शाङ्गत्वे च प्रकरणस्यामानत्वात्। तस्मादेवतान्तरसंयोगं विदधतैव वचसा तस्य तत्संबद्धप्रयोगस्य वा फलविशेषसंबन्धोऽपि

बोधनीय इति तन्निमित्तोपि वाक्यभेदः। नच विशिष्टभावनाविधानेन सकृत्वाक्यभेदपरिहारः शङ्क्यः, पञ्चशरावावाक्येपि तथापत्तेः। यथाचापनीतदेवताकानां यागानां देवतान्तरसंयुक्ताभिर्भावनाभिः संभवति संबन्ध इत्युच्यते तथा विनष्टद्रव्यकस्यापि द्रव्यान्तरसंयुक्तभावनया संबन्ध उच्यताम्। अपनयविनाशयोराकाङ्क्षोत्थापकतायास्तुल्यत्वात्। सान्नाय्यतण्डुलविशिष्टायाश्च भावनाया असन्नयन्तं प्रति विधातुमशक्यत्वाद्विशिष्टभावनाविधिपक्षेऽसन्नयतोऽभ्युदयनैमित्तिकाभावापत्तिः। अनादृतश्चैष पक्ष आकरे। तस्मात्कर्मान्तरमेवोचितमिति।

अत्रोच्यते—यत एव प्रारब्धानामपि यागानां चन्द्रोदये सति त्वदुक्तरीत्या निष्फलत्वेनाकर्तव्यतापत्तिः, अतएव विभजेदित्यनेन तादृशयागाङ्गत्वेन विभागविध्यनुपपत्त्याऽपनीतपूर्वदेवताकपूर्वयागकर्तव्यतापरत्वमस्यैव विधेराश्रीयते। तत्र च क्षामवत्यादिवत्फलालाभः। प्रधानयागकर्तव्यतायां च तदाक्षेपेणैवाङ्गानुष्ठानसिद्धेर्नास्य विधेरङ्गयागकर्तव्यतापरत्वमिति कर्तव्यतया ज्ञाप्यमानयागेषु विशेषणीभूतदेवतापनयस्य नाङ्गयागेषु प्रसक्तिः। यथा मिलितानां कर्तव्यतावगता प्रधानानां तादृश्या एव प्रतिप्रसवकरणाच्च सर्वप्रधानविशेषणत्वेन देवतापनयज्ञापने तण्डुलग्रहणस्याप्युपलक्षणत्वसिद्धेर्लक्षणयोपस्थापिते हविःसामान्ये तन्दुलानामप्यन्तर्भावाच्च मध्यमादिपदान्वयिभिर्यच्छब्दैः संभवति तन्दुलपरामर्शः। अपगतहोतृवरणकविध्यन्तकर्तव्यतायामिवापगतदेवताकयागकर्तव्यतायां च ज्ञाप्यमानायां न विकल्पापत्तिः। अपनीतपूर्वदेवताकानां कर्तव्यताया देवतान्तरसंबन्धं विनानुपपत्तेरगत्योत्तरवाक्येषु वाक्यभेदमुद्देश्यभेदादापतितमभ्युपेत्यापि देवताविधिराश्रीयते। न चोत्तरवाक्यसिद्धस्य मध्यमाद्यात्मनतण्डुलविभागस्य तण्डुलवाक्येऽनुवादमङ्गीकृत्य वाक्यभेदपरिहाराय कर्मान्तरविधिराश्रयितुं युक्तः, तथासति फलीकृतैस्तण्डुलैरुपासीतेत्यस्य विधित्वकल्पनानिमित्तवाक्यभेदापत्तेः। प्रयोगमध्ये विभागस्य नित्यवदनुष्ठानाप्राप्त्या विभागवाक्यविधित्वस्यावश्याभ्युपेयत्वात् द्रव्योद्देश्यत्वनिर्देशेन तात्पर्यवृत्त्योद्देश्यतया विवक्षितानां प्रकृतयागानां प्रधानत्वेन तदनुरोधेन प्राप्तस्य विधेयतया गुणभूतदेवताविधानार्थविध्यावृत्तिलक्षणवाक्यभेदस्यौचित्येन स्वीकार्यत्वात्। पञ्चशरावावाक्ये तु विधेयगुणानुरोधेन प्रधानयज्यावृत्तेरन्याय्यत्वात्। अमुनैव चाशयेन वाक्यभेदापादकगुणस्यैव कर्मभेदकत्वं व्यवहृतमाकरे नोद्देश्यस्यापि। देवतान्तरविधितः संभवत्प्राप्तिकस्यापि पूर्वदेवतापनयस्य विधिमन्तरेणदेवतान्तरविध्यपेक्षितायाः पूर्वयागकर्तव्यताया उन्नयनासंभवादाग्नेयमष्टाकपालं निर्व-

पेद्रुकाम इति वाक्ये द्रव्यदेवतयोरिव देवतापनयस्यापि न विधिवैयर्थ्यं शङ्क्यम्। नच उत्तरवाक्येष्वेव यागविध्युन्नयनं शङ्क्यं, वाक्यत्रेय प्रत्येकं फलपदाध्याहारेण प्रयोगत्रयकल्पनेन चातिगौरवापत्तेः।

ननु सत्यपि पूर्ववचसि देवतापनये देवतान्तरसंबन्धाभावेनोपांशुयाजो लुप्यते तद्वत्सर्वेषामपि लोपोस्तु, आस्तां च कर्मान्तरविधिरितिचेन्न। यद्यप्युपांशुयाजे देवतापनयविशिष्टकर्त्तव्यताबुद्धिः प्रथमोदितापि तद्धविषो वाक्यान्तरे देवतान्तरसंबन्धाविधानाद्विलीयते तथापि तादृशकर्त्तव्यताबुद्धेः संभवति यागान्तरेषु सावकाशत्वम्। यदि त्तूत्तरवाक्येषु कर्मान्तरविधिमाश्रित्य केषामपि प्रकृतहविषां देवतान्तरसंबन्धो नाश्रीयेत निर्विषयत्वमेव तदा तादृशबुद्धेरापद्येतेति सैव कर्मान्तरकल्पनं प्रतिबध्नन्ती देवतान्तरपरत्वमुक्तवचसामापादयतीति बोध्यम्। वस्तुतोऽपनीतपूर्वदेवताकयागकर्तव्यताबोधनाय प्रवृत्तो विधिरप्रकृतदेवतासंबन्धं विना तद्बोधनासंभवात् सामान्यत आक्षेपोपस्थापिताऽप्रकृतदेवताविशिष्टतत्कर्तव्यतां बोधयन्नुपांशुयाजस्याप्रकृतदेवतासंबन्धं कृतवानिति हविरन्तरवत् व्यवस्थिततत्संबन्धाभावेऽपि विनिगमनाविरहेण तिस्रोऽप्यप्रकृता उद्दिश्य तदनुष्ठानमुचितम्। स्वीकृतं चेत्थमेव मनुः पुत्रेभ्यो दायं व्यभजदितिवदुक्तवाक्यार्थवर्णनपक्षोऽप्याकरे।

यद्यपि न्चाग्नये दात्र इत्यत्र चतुर्थ्यौ भिन्ने वर्तेते तथापि न ते तद्धितवद्देवतात्वं शक्त्या वदतः। लक्षणया तु तत्प्रीतिपाद्यत्वेन कल्प्यमानं देवतात्वं समानाधिकरणप्रकृतिद्वयोक्ताभिन्नार्थान्वयानुरोधेनाभिन्नमेव कल्प्यत इति न तद्भेदनिमित्तो दोषः। त्वाष्ट्रं पाल्नीवतमित्यत्र तु तद्धिताभ्यां श्रुत्यैव देवतात्वाभिधानान्न तावद्देवताद्वस्य कल्प्यत्वम् येन लाघवादभिन्नं कल्प्येत। नच प्रकृत्यर्थाभेदप्रतीत्यनुरोधादभिन्नदेवताकारकाभिधायित्वं तद्धितयोरिति शङ्क्यं, प्रातिपदिकजन्यप्रतीतिगतमुख्यविशेष्यताभाजोरेवाभेदान्वययोग्यत्वेनातादृशयोस्त्वष्टृपत्नीवतौरभेदाप्रतीतेः। नहि भवति देवदत्तीयं ब्राह्मणगृहमित्यत्र देवदत्तब्राह्मणयोरभेदान्वयबोधः। भवति तु तत्र गृहयोः। प्रकृते च हविषोस्तादृशयोस्तद्बोधः। यथा चासति शास्त्रान्तरीयकर्माभेदप्रत्यये स्ववाक्यश्रुतं कर्म विषयीकुर्वन्विधिः शास्त्रान्तरीयाद्विनश्यति, एवमालभेतेतिविशिष्टविधिरर्थाद्विशेषणेषु व्याप्रियमाणोऽप्रतीयमानाभेदे देवताकारके प्रत्येकं विषयीकुर्वस्तयोर्भेदमाक्षिपतीति ध्येयम्।

यस्तु तण्डुलवाक्ये यागेभ्यो द्रव्यदेवतापनयविधिमङ्गीकृत्योत्तरवाक्येषु विशिष्टभावनाविधिरुक्त आकरे यश्च तण्डुलवाक्ये मनुः पुत्रेभ्यो दायं व्यभजदिति-

वदप्रकृतदेवताभ्यः प्रकृतहविषां विभागविधिं स्वीकृत्योत्तरवाक्येषु तद्विशेषविधिरितिपक्षस्तत्रैवोक्तः, तदुभयमपि प्रौढिमात्रं पूर्वोक्तदोषानतिलङ्घनात्। नच चित्रेष्टितण्डुलेष्विव प्राकृतश्रपणविधितो मध्यमादिषु श्रपणाप्राप्तिः, तत्रत्यतण्डुलश्रवणस्य तण्डुलावस्थं हविरिति ज्ञापनेनैवार्थवत्त्वात्। मध्यमादिश्रवणानां त्वपरित्यक्तप्रागवगतयागसंबन्धानि हवींष्युद्दिश्य देवतान्तरसंबन्धविधिपरत्वात्। यागीयहविःप्रकृतिभावमनुभवन्तश्च तन्दुलाः पूर्वदेवतासंबन्धिन आसन्निति तथैवाप्रकृतदेवताभिः संबध्यन्तोऽनुमन्यन्त एव प्राग्विहितं श्रपणम्। एवं च सह श्रपयतीत्यत्रौषधश्रपणाङ्गत्वेन संप्रतिपन्नदेवतांकहविस्साहित्यं विधीयतइति दध्नोऽपि साहित्यसिद्धयर्थं श्रपणसिद्धिः। यागप्रयुक्तसान्नाय्योपजीवनेन तत्साहित्यं विदधानो विधिर्नासंनयन्तं प्रति तद्विधत्त इति न तेन विनाऽसंनयतोऽनधिकारापत्तिः। दधिपयोभ्यां सहश्रपणस्य चोखायामेव संभवात्कपालनिवृत्तौ सहश्रपणे पिण्डासंभवाच्च संयवनपेषणादिनिवृत्तौ हविर्विनाशापादकत्वे चावखावणनिवृत्तौ संभवति चरुत्वप्राप्तिः। असंनयतश्च सत्यप्यैन्द्राग्नतन्दुलानामपि देवतान्तरसंबन्धे उभयेषां सहश्रपणस्य कर्त्तव्यत्वात्कपालसंख्याद्वयानुग्रहासंभवान्मुख्योपस्थिताष्टत्वसंख्याया एवानुग्राह्यत्वेन संभवत्यष्टाकपालत्वस्य नित्यवदनुवादः। इयांस्तु भेदः—संनयतो मध्यमाष्टाकपालेनाग्नेयमात्रानुष्ठानं चरुभ्यां तु तेन सह दधिपयोयागयोः। असंनयतस्तु त्रिभिः पुरोडाशैराग्नेयैन्द्राग्नयोस्त्रिभिः सहानुष्ठानं चरुत्वस्य च पाक्षिकानुवादत्वं वाक्यभेदवदङ्गीक्रियत इत्यलं पल्लवितेन।

यथाच कर्मस्वरूपानुबन्धी द्रव्यादिगुणः पूर्वकर्मण्यनिविशमानः कर्मभेदको भवति एवं प्रयोगानुबन्धी कर्त्रधिकार्यादिः पूर्वप्रयोगेऽनिविशमानः प्रयोगभेदको बोध्यः। अतएव 'यदि ब्राह्मणो यजेत' इत्यत्र राजसूयान्तर्गतराजकर्तृकावेष्टिप्रयोगाद्भिन्नो ब्राह्मणकर्तृकोऽवेष्टिप्रयोगो विधीयते, यावज्जीवमग्निहोत्रं जुहुयादित्यत्र च काम्यप्रयोगाद्भिन्नो नित्यप्रयोगः। प्रकृतकर्माविपरिवृत्तिरूपं प्रकरणान्तरमपि प्रायो धात्वर्थभावनयोर्भेदकं भवति। सत्यां हि प्रकृतकर्मप्रत्यभिज्ञायां तया कर्मणि प्रतिबद्धशक्तिको विधिर्गुणे संक्रामति। असत्यां तु तस्यां श्रुत्या कर्म विषयीकुर्वन् विहितविधानायोगात्प्रकृतादस्मिन्भेदमाक्षिपतीति यथा मासमग्निहोत्रं जुहोतीत्यत्र। अविपरिवृत्तिसंरक्षणायैव च सति नाम्नि तस्याभेदकत्वाभिमताख्यातपारतन्त्र्यं सति चोपपदे कथंचिद्विध्यन्वयार्हतदर्थस्यानुपादेयत्वमपेक्ष्यते। अस्ति च प्रकृते तदुभयं मासस्यानुपादेयत्वात् अग्निहोत्रनाम्नश्चाख्यात-

परतन्त्रत्वात्। यत्र तूपपदार्थ उपादेयो भवति यथा यदाहवनीये जुहोतीत्यादावाहवनीयादिः, स हि स्वरूपेणाधानान्निष्पन्नोऽपि तत्र होमकाले विहरणादिव्यापारेण तत्तद्धोमानुष्ठानयोग्यात्मना संपादनीय इत्यनेन विधिनानुष्ठाप्यते; तत्र तद्विधानावधित्वेन यज्जुहोतीत्येवमात्मार्थमर्पयता धातुनैव दूरस्थहोमविपरिवृत्तेर्न प्रकरणान्तरसंभवः। यत्र वा नाम्नो नोक्ताख्यातपारतन्त्र्यं यथा—य इष्ट्वा पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेतेत्यत्र यच्छब्दोपबद्धपूर्वाख्यातान्वयिनामिष्ट्यादिपदानां—तत्रापि तदुपस्थापितान्येव कर्माणि जघन्याख्यातपदान्तर्गतधातुनाऽनूद्य पर्वसंबन्धविधानान्न तत्संभवः। एतेन स यद्यग्निहोत्रोच्छेषणाल्लभमाद्येत पुनरग्निहोत्रं जुहुयादिति बोधायनीयकर्मान्तरसूत्रे यद्भवस्वामिनोक्तं हूयमानमपि तन्नैवाग्निहोत्रं स्यात् तस्मादप्रमादतात्पर्यकमेवेदमिति तन्निरस्तं, निमित्तवाक्यान्तर्गताग्निहोत्रशब्देन विपरिवर्तमानाग्निहोत्रस्य संयोगपृथक्त्वन्यायेनोक्तनिमित्ते कर्माङ्गत्वेनानुष्ठापनसंभवात्।

यां तु शारीरके भामत्यां च 'वेधाद्यर्थभेदात्' (३।३।१४) इत्यधिकरणे वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यत्र संयोगपृथक्त्वन्यायेन प्रसिद्धबृहस्पतिसवस्य वाजपेयाङ्गत्वेन विध्युक्तिः सा धात्वर्थभेदमभ्युपेत्योक्तिरिति व्याख्येया। व्याख्याता च तथा कल्पतरुकारेण। नह्यस्य विधेः प्रसिद्धबृहस्पतिसवविधिसांनिध्यमस्ति नवा.तदुपस्थापकं किंचन वचोन्तरमिहाम्नायते। नच बृहस्पतिसवनाम्नैव तदुपस्थितिः, अग्निहोत्रनामवद्विधिपरतन्त्रेण तेन भिन्नप्रसरतया दूरस्थकर्मोपस्थापनासंभवात्। स्यादेतत् पदजन्यपदार्थोपस्थितिवेलायां गृहीतसंगतिकेन नाम्ना संभवति पूर्वकर्मविपरिवृत्तिः। वाक्यार्थबोधवेलायां च शक्यं विधिपारतन्त्र्यमप्यनुभवितुमिति विपरिवर्त्तमानस्य तस्यैव कर्मणोऽन्याङ्गत्वेन विधिरस्तु कथमन्यथा गृहमेधीयप्रकरणाम्नाते 'आज्यभागौयजति' इति वचसि प्रसिद्धाज्यभागप्रत्यभिज्ञानं, नहि तत्र तत्प्रत्यभिज्ञापकं वचोन्तरमस्ति नापि चोदकः, चोदकलोपाङ्गीकारात्। तस्मादिह पदवेलायां प्रत्यभिज्ञानं वाक्यवेलायां विधानमंगीकार्यं तथा च बृहस्पतिसववाक्येपि क्वयसंभवः। नचैवं मासाग्निहोत्रवाक्येपि कर्मान्तरभावापत्तिः। इष्टापतेः। दृश्यते हि शतपथे दर्शपूर्णमासप्रकरणे गृहमेधीयप्रकरणे च समाम्नाते 'यवाग्वैतां रात्रिमग्निहोत्रं जुहोति' इतिवाक्येऽग्निहोत्रशब्दस्य प्रत्यभिज्ञापकत्वम्। एतेन पूर्वापरीभूततया धातुना प्रतीतस्य न नाम्ना प्रत्यभिज्ञेति निरस्तम्। धात्वर्थोपस्थापकत्वाभावेऽग्निहोत्रशब्दस्य तन्नामत्वानुपपत्तेश्च। विधिश्च प्रसिद्धबृह-

स्पतिसवादेरेव वाजपेयांगत्वेन पुनर्विधिसंभवात् भेदाभेदोदासीनः सन् नाम्नः प्रसिद्धार्थतायां च विशेषतस्तत्परतन्त्रोऽनुमन्येतैव कर्माभेदम् । प्रकरणान्तरस्य भेदकत्वं तु भावनायामुपपन्नम् । या तूक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यादित्युक्तिः सा नित्याग्निहोत्रप्रकरणेऽग्निहोत्रपदस्य निमित्ताभिव्यक्तिं मासाग्निहोत्रवचसि च तदनभिव्यक्तिमभिप्रेत्य व्याख्येया । तस्याग्निहोत्रशब्दस्यान्यत्र श्रुतौ येन विधिना कर्मणि दृष्टप्रवृत्तिकोऽग्निहोत्रशब्दस्तेनैव लिधिनान्यप्रदेशेऽपि तत्प्रवृत्तिर्ज्ञेयेति । तस्मान्न बृहस्पतिसवादेर्भेद इति ।

अत्र ब्रूमः—विधिस्तावच्छ्रुत्या संनिकृष्टं कर्मैव विषयीकुर्वंस्तेनैव शब्देन कर्मणोऽपसारयितुं शक्यते यो विधेः प्राक् पूर्वकर्मविपरिवृत्तौ गृहीततात्पर्यको भवति, नचाग्निहोत्रादिशब्दस्तथा, किंहि प्रायणीयादिवद्विधित्सितकर्मान्तरेऽपि लब्धप्रवृत्तिनिमित्तको यन्नामत्वेन प्रयुक्तो भवेत्, उत तेष्वग्निहोत्रमधिश्रयेदितिवद् द्रव्यपरो भवेत्, उत प्राणाग्निहोत्रतूष्णीमग्निहोत्रादाविव स्तुत्यर्थं प्रयुक्तो भवेत्, उतामी पिष्टपिण्डाः सिंहाः क्रियन्तामितिवदतिदेशार्थो भवेदित्यनेकधोपप्लवमानतात्पर्यकमग्निहोत्रादिपदं कथं स्वजन्यस्मृतिमात्रवशेन विधितात्पर्यमन्यथाकर्तुं शक्नुयात् । शक्नोति तु विधिरुक्तविधया कर्म विषयीकुर्वन्नाकाङ्क्षयाग्निहोत्रपदतात्पर्यं व्यवस्थापयितुम् । आज्यभागवाक्येऽपि न नामवशेन प्रकृतकर्मग्रहणं ब्रूमः, किंतु सर्वत्राविहितेतिकर्त्तव्यताकेषु उपमितलक्षितप्रापणेनेतिकर्त्तव्यतालाभ इति तावदष्टमाद्येऽभिहितं गृहमेधीयोपि निर्वपत्यादिसामान्येन दर्शमुपमापयति, स च स्वविध्यन्तं लक्षयति लक्षिते च तस्मिन्विपरिवर्तमानावाज्यभागावादाय गृहमेधीयाङ्गत्वेन नियुञ्जानं प्रत्यक्षं वचोऽतिदेशाख्यप्रापणकल्पनां प्रतिबध्नाति । यत्र तु यदङ्गमाम्नातं क्वचित्कृतोपकारमपि नोपमितलक्षितविध्यन्तान्तर्गतत्वेन विपरिवर्त्तमानतां नेतुं शक्यम् । नैव तत्र तद्विधिनिमित्तमपूर्वत्वमाश्रीयते, प्रकरणान्तरन्यायेन कर्मान्तरविधिरेव तु तत्राकरे व्यवह्रियते । यथा वरुणप्रघासेषु अवभृथमभ्यवयंतीत्यत्र । यस्मिन्हि सौमिके विध्यन्तेऽवभृथोन्तर्गतस्तस्योपमितलक्षणेन न वरुणप्रघासचोदनायां विपरिवृत्तिः शक्या वक्तुं, परमते तु नाम्नाज्यभागावभृथविपरिवृत्तेस्तुल्यत्वादैष्टिकसौमिकविध्यन्तान्तर्गतत्वेनोभयोः कृतोपकारतायाः साम्यच्च गृहमेधीयवत् वरुणप्रघासानामपूर्वत्वं स्यात् । नच तदभिमतं मिश्राणां सातमिकाधिकरणादौ वारुण्या निष्कासेनेत्यादिवाक्यस्य प्रकरणान्तरात्प्रधानकर्मभूतयागान्तरविधिपरत्वं निरूपितवताम् । नाप्यभिमतं न्यायसुधाकृतां प्रकरणान्तराधिकरणे यज्ञिशून्यत्वेनासनोपयिचोदनासदृशस्य तद्वाक्यस्य तद्वदेव भावनान्तरविधा-

यित्वमंगीकृत्य तुषनिष्कासससंस्कारार्थतया नाम्नोपस्थापितस्य सौमिकावभृथयागस्य विधानार्थत्वमुक्तवताम्। नच तन्मते संस्कारकर्मभूतावभृथात्प्राकृतोपकारालाभान्नापूर्वत्वमित्यपि शङ्क्यं, त्यागांशेन प्राकृतस्यैवोपकारस्य ज्ञापनात्। तस्मिन्सत्येव सोमलिप्तप्रतिपत्तेरिव तुषादिप्रतिपत्तेः संभवात्। सोमलिप्तवैलक्षण्येन तुषादिप्रतिपत्त्यङ्गीकारे अस्यावभृथयागस्य प्रधानकर्मत्वसमर्थनार्थैकादशाध्यायस्थाधिकरणविरोधात्। यौ तु शातपथौ विधी उपन्यस्तौ तत्र यवाग्वा वाग्यमस्य चोपादेयत्वात्तद्विध्यर्थं प्रसिद्धहोमानुवादयोर्धात्वोर्विशेषणीभूतावग्निहोत्रशब्दौ प्रसिद्धं होममुपस्थापयत इति नाश्चर्यम्। मासमग्निहोत्रं जुहोतीत्यादौ तु विधिविशिष्टेन धातुना कर्त्तव्यत्वेनोपस्थाप्यमानस्य होमस्य नाग्निहोत्रशब्दादुपस्थितिस्तद्रूप्येणेति न तद्बलेनानुवाद्यत्वम्। नचैवं नामत्वानुपपत्तिः। तदर्थनामता हि तद्गतप्रवृत्तिनिमित्तावगममात्रेण भवति, तदनुवादत्वप्रयोजकतदर्थोपस्थापकता तु तस्यैव संभवति यस्तत्प्रकारेणैव तदर्थमुपस्थापयति। यथाहि बालं श्रीकृष्णं ध्यायेदित्यत्र बालावस्थे नामत्वेन प्रवर्तमानोपि कृष्णशब्दो न बालपदस्यानुवादत्वमापादयितुमलं बाल्यावस्थानुपस्थापकत्वात्, तथाग्निहोत्रशब्दो होममुपस्थापयन्नपि न कर्तव्यतयोपस्थापयतीति नाख्यातमनुवादतां नेतुमलम्। यथा चासत्यां प्रकृतकर्मविपरिवृत्तौ प्रापकशास्त्रान्तरालोचनसापेक्षत्वनिरपेक्षत्वाभ्यां गुणविधानधात्वर्थविधानयोर्धात्वर्थविधाने विधिः प्रवर्तते, तथा धात्वर्थगोचरयोरपि विनियोगोत्पत्त्योस्ताभ्यामेव हेतुभ्यामुत्पत्तौ स्वारस्येन प्रवर्तमानो विधिर्न शक्यते भेदाभेदोदासीनत्वेन वक्तुम्। इदमेव हि विधेर्भेदकत्वं यदुत्पत्तिपरत्वमन्यत्र शाखान्तरात्। तत्र ह्यध्येतृभेदात्संभवत्येकस्यापि कर्मणः शाखाभेदेन द्विरुत्पत्तिः। नचागृहीततात्पर्यकनामपारतन्त्र्यं विधौ शक्यं वक्तुं, नाम्ना धात्वर्थोपस्थितिवच्च धात्वर्थेन भावनोपस्थितिसंभवान्न भावनाभेदकत्वमपि प्रकरणान्तरस्थं स्यात्। समस्तं च नामातिदेशनिरूपणमसति धात्वर्थभेदेऽनर्थकतामापद्यमानं न कुशकाशावलम्बनेन शक्यं सफलीकर्त्तुम्। तत्सिद्धं बृहस्पतिसवधर्मककर्मान्तरं वाजपेयाङ्गत्वेन विधीयत इति।

नन्वेवं 'यस्योभावग्नी अनुगतौ अभिनिम्लोचेदभ्युदियाद्वा पुनराधेयमेव तस्य प्रायश्चितिः' इत्यत्र प्रकरणान्तरादाधानान्तरमेव विधेयं स्यात् तस्य च सहिताग्निजनकत्वानवगमान्न नैमित्तिकस्वभावानुरोधेन निमित्तगतोभयत्वविवक्षा षष्ठोक्ता सिध्येदितिचेन्न, अभ्यासार्थेन पुनःशब्देनानुष्ठिताधानस्यैवानुष्ठानप्रतीतेः। यद्यपि तस्य पुनः प्रायश्चित्तिराधेयमेवेति पुनःशब्दान्वये तस्य नाभ्यासार्थत्वं

प्रतीयते तथाप्येवकारस्यैवाभ्यासार्थत्वात्तेनैव कर्मान्तरत्वधीप्रतिबन्धः। दृश्यते हि तस्याभ्यासार्थत्वं पयसा भुक्त्वा पयसैव भुङ्क्ते इत्यादौ। अथ सर्वेभ्यः कामेभ्यो दर्शपूर्णमासावित्यत्र कथं न कर्मान्तरं विधिकल्पनात्प्रागगृहीततात्पर्येकेन नाम्ना कृताया अपि विपरिवृत्तेः प्रकरणान्तराविघटकत्वादितिचेदास्तां तस्यास्तदविघटकत्वं, तथापि तत्संनिधावाम्नातस्य 'सर्वेभ्यः कामेभ्यो ज्योतिष्टोमः' इत्यस्य शेषे 'एकैकस्मै कामायान्ये यज्ञक्रतव आह्रियन्ते' इत्यस्मिन्श्रुतेन यज्ञक्रतुशब्देन विधेयज्योतिष्टोमभिन्नक्रतूपस्थापनपरतया निर्णीतेन दर्शपूर्णमासविपरिवृत्तेः। नच ज्योतिष्टोमस्य दर्शपूर्णमासयोश्च सर्वफलकत्त्वात् एकैकस्मैकामायाहियमाणत्वेन न तयोर्विपरिवृत्तिः, किंत्वन्येषामेवेति शङ्क्यम्। आरब्धं वैदिकं कर्मावश्यं समापनीयमिति 'यज्ञेन दानेन विविदिषन्तीति, वेदोदितानि कर्माणि कुर्यादीश्वरतुष्टये' इति च सर्वकर्मणामनेकफलत्वेन वाक्यशेषस्य निर्विषयतापत्तेः। स्तुतिमात्रतात्पर्यकत्वे च इतरेषामिवानयोरपि विपरिवृत्त्यभंगादित्यादि स्वयमूह्यम्। यत्तु भवदेव एतद्विधिशेषस्थान्यशब्दोपात्तभेदनिरूपकत्त्वेन तयोर्विपरिवृत्त्या प्रकरणान्तरविघटनमाह तन्न। विधिगतदर्शपूर्णमासपदेन यदुक्तं तद्भिन्नप्रतिपादनमर्थवादस्थेनान्यशब्देन कार्यम्, यद्भिन्नत्वं चान्यशब्देन प्रतिपाद्यं तद्विधिगतेन तेन पदेन वाच्यमिति परस्पराश्रयात्। तदेवं सिद्धः प्रकरणान्तरप्रमाणको भेदः सापवादः।

उक्तपंचमानान्यतरेणोत्पत्तिपरतयावधारिते वचसि प्रतीता कर्मगता तत्कल्पकदेवतासंबन्धगता वा संख्या धात्वर्थभेदद्वारेण भावनाभेदिका भवति। यथा सांग्रहणीष्टिं प्रकृत्य श्रुते तिस्र आहुतीर्जुहोतीत्यत्र, वाजपेयं प्रकृत्य श्रुते सप्तदशप्राजापत्यान्पशूनालभेतेत्यत्र च। प्रथमवाक्ये तावच्छब्दान्तरेण प्रकृत्यागान्यकर्मोत्पत्तिपरतयावधारिते श्रुतत्रित्वसंख्या पृथक्त्वनिवेशस्वाभाव्यात् धात्वर्थभेदं बोधयन्ती तन्मुखेन भावनामपि भिन्नां बोधयति। नन्वेकप्रकृतिपदिकोपात्तानेकाग्नीषोमविशिष्टदेवताकारकवदेकधातूपात्तानेकहोमविशिष्टं भावनातत्त्वमेकमेव प्रत्ययेन वक्तुं युक्तम्। नच करणताभेदो न भावनाभेदिकेति शब्दान्तरविषये निर्दिष्टन्यायाद्भावनाभेदसिद्धिः। अत्रैवोत्पद्यमानानां होमानां करणतायाः अभिन्नाया अपि वक्तुं शक्यत्वात् निरपेक्षोत्पन्नानां हि कर्मणां नाभिन्ना करणता फलवाक्येन बोधयितुं शक्यते। अतएव षष्ठे 'अहर्गणे कस्मिंश्चिदहन्युद्वात्रपच्छेदे तन्मात्रस्य पुनः प्रयोगः, साधननिवेशित्वाद्धर्माणां तन्मात्रस्य च साधनत्वात्' इत्युक्तम्, तस्मान्न संख्याया भावनाभेदकत्वमिति चेत्। न। वेदे हि वेदिरसीति

त्रिर्वेदिं प्रोक्षतीति क्वचिदभ्यासार्थसुच्प्रयोगेनैकस्यैव कर्मणोऽभ्यासो विधेयतया प्रतीयते, क्वचिच्च तिस्र आहुतीरिति कर्मत्रित्वम्। विधानगतविशेषस्य च प्रवृत्तिविशेषजननेनैव फलवत्त्वे वाच्ये प्रकृतवाक्ये होमानां प्रत्येककरणतांगीकारेण विना न तद्वक्तुं शक्यं, मिलितानां करणत्वेहि साधनरूपनिवेश्यामानमस्येतिमन्त्ररूपो धर्मः सकृदेव प्रयोक्तव्यः स्यात्। वेदिप्रोक्षणेऽप्येकादशन्यायेन सकृदेव मन्त्रः प्रयुज्यते, प्रत्येकं करणत्वे तु साधनरूपभेदात्प्रधानभेदान्मन्त्रावृत्तिः सिध्यतीति कर्मत्रयविधेः प्रवृत्तिविशेषकरत्वानुरोधेन करणताभेदे सिद्धे तद्वशेन भावनाभेदो निर्दिष्टन्यायादेवं सिद्धः। द्वितीयेपि वचसि गुणात्प्रकृतयागान्यायागोत्पत्तिपरतयावधारिते तद्धितोत्तरविभक्त्या तद्धितोक्तदेवतासंबन्धविशिष्टद्रव्यान्विततयोक्ता बहुत्वसंख्या तावद्देवतासंबन्धानुपपत्त्या कल्प्यमानयागानामपितावत्त्वं बोधयति। यद्यपि प्रातिपदिकार्थगतविशेष्यमात्रान्वयिन्यपि संख्या विभक्त्या क्वचिदुच्यते द्वाविति, विशिष्टान्वयिनी च क्वचित् शुक्लाविति, तथाप्यतिदेशप्राप्तायाः पशुगतैकत्वसंख्याया अबाधाय प्रतिपशु यागभेदसिद्धयै विशिष्टान्वयितयैव संख्याभिधानं प्रकृत आश्रीयते, संदिग्धार्थे विधौ वाक्यशेषभूतातिदेशानुरोधेन निर्णयौचित्यात्। यत्रापि वसन्ताय कपिंजलानालभेतेत्यादौ शुद्धद्रव्यान्विता संख्या विभक्त्योच्यते तत्राप्युक्तनीत्यातिदेशानुरोधेन प्रत्येकं देवतासंबन्धमाश्रित्य तावत्संख्या यागाः कल्प्यन्त इति संख्ययैव भेदसिद्धिः तदेवमुक्तः षट्प्रमाणकः कर्मभेदः।

एषां च मानानामेकविषयोपनिपातेऽपि विरोधाभावान्न बलाबलान्वेषणं कार्यम्। एकस्मिन्नपि ह्यामनहोमे प्रकृतयागप्रतियोगिकभेदमामनहोमान्तरप्रतियोगिकभेदमहिदेशप्राप्तनारिष्टप्रतियोगिकभेदं च ज्ञापयतां शब्दान्तरसंख्यागुणानां संभवति प्रामाण्यम्। एकत्रैकप्रतियोगिकं भेदं बोधयतोरपि मानयोरेकस्य प्रामाण्यमनधिगतार्थबोधकत्वेन नापरस्येत्येतावान् भेदो नतु विरोधः। बोधकत्वे तुल्ये सत्येकमेवानधिगतबोधकमित्यत्र किं विनिगमकमिति चेत् शृणु। विधिरेव तावच्छक्त्या धात्वर्थभावनान्वितोऽप्रवृत्तप्रवर्तनास्वाभाव्यात्तदुत्पत्तिपरः सन्कर्मभेदे मुख्यं प्रमाणम्। तस्य तु कर्मोत्पत्तेरन्यत्र शक्तिसंक्रमप्रयोजकपदान्तरसमभिव्याहारः प्रकृतकर्मसंनिधिसहकृतो भवति कर्मभेदप्रमायां प्रतिबन्धकः। अतएव दध्ना जुहोति, सायं जुहोतीत्यत्र न कर्मभेदः, दधिसायंकालविनियोगे संक्रान्तशक्तिकाभ्यां विधिभ्यां विशिष्टविधिगौरवभिया स्वपदे संनिधिप्राप्तहोमतद्भावनानुवादताया अभ्यनुज्ञानात्। तादृशप्रतिबन्धकाभावसंपादनेन चाभ्या-

सप्रकरणान्तरे कर्मभेदप्रमायां विधेः साहाय्यमाचरतः। तत्राभ्यासोदाहरणे विशेष्याभावकृतो विशिष्टाभावः, प्रकरणान्तरोदाहरणे तु विशेषणाभावकृत इति विवेकः। सत्यपि विशिष्टे प्रतिबन्धके समभिव्याहृतपदार्थगतं वाक्यभेदापादकत्वं बलवद्विरोध्यवरुद्धे पूर्वकर्मणि निवेशानर्हत्वं वा संज्ञान्तरं शब्दान्तरं वा बलाद्विधेः कर्मोत्पत्तिपरतामापादयन्तीति गुणसंज्ञाशब्दान्तराणि विधेरुत्तेजकविधया कर्मभेदप्रमायां साहाय्यमाचरन्ति। एवं चाभ्यासप्रकरणान्तरयोरेभिर्यथासंभवं क्वचित्संनिपाते तयोरेव भेदकत्वं नैतेषाम्, असति प्रतिबन्धके साधनादेवोत्तेजकानपेक्षात्कार्यसिद्धेः। अतएव प्रकरणान्तराधिकरणे समानप्रकरणस्थानामपर्यायधातुनिष्पन्नानामाख्यातानामुदाहरणत्वमवादि सांप्रदायिकैः। 'उद्भिदा यजेतपशुकामः' इत्यत्र च संज्ञया कर्मभेदं स्वीकृत्याभ्यासोदाहरणे संज्ञात्वेनाङ्गीकृतानामपि समिदादीनां न भेदकत्वमाश्रितम्। 'वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति' इत्यत्र च सत्यपि भेदके गुणे प्रकरणान्तरमेव भेदकमिति सप्तमे व्यवहृतम्।

अभ्यासप्रकरणान्तरयोः संनिपाते तु प्रकरणान्तरमेव भेदकं, प्रकृतकर्मावियोगनिवृत्तेः स्वरूपसत्या एव सहायत्वात्। अनन्यपरतात्मकाभ्यासस्य तु ज्ञातस्यैव विपक्ष आनर्थक्यप्रसञ्जनमुखेन भेदकत्वात् विप्रकर्षात्।

शब्दान्तरस्य गुणसंज्ञाभ्यां संनिपाते तु तस्यैव भेदकत्वं धात्वर्थभेदमुखेन भावनाभेदं प्रमापयतोस्तयोर्लोकप्रसिद्धधात्वर्थभेदे प्रमाण्यकुण्ठीभावे सति भावनाभेदप्रामाण्यस्य सुतरामसंभवात्। अतएवोक्तशब्दान्तरोदाहरणस्थले सतोरामिक्षावाजिनसमानयोगक्षेमयोरपि सोमहिरण्ययोर्न भेदकत्वव्यवहारः।

गुणसंज्ञयोश्च सन्निपाते संज्ञाया एव भेदकत्वं, गुणस्य वाक्यभेदाद्यालोचनसापेक्षत्वात्' संज्ञायाः स्वभावत एव भेदकत्वात्। संख्यायास्तु भिन्नप्रस्थानतया न केनचित्संनिपात इत्यलमतिविस्तरेण।

केचिदुत्पत्तिमात्रपरे विधौ फलपदाश्रवणाद्धात्वर्थस्यैव भाव्यत्वेनान्वयं मन्यन्ते तान्प्रत्याह—उत्पत्तिविधाविति। तथासतीति। यदि सत्यपि विध्यन्वये भावनोत्पत्तिविधौ धात्वर्थं भाव्यत्वेन स्वीकुर्यात्, स्वीकुर्यात्तर्हि सत्यपि कामपदेऽधिकारवाक्यगतापि भावना समानपदश्रुत्या तमेव भाव्यत्वेन। भाव्यस्य च भाव्यान्तराकाङ्क्षाया असत्वेन पदान्तरस्य स्वर्गकामादेः षष्ठाद्यपूर्वपक्षन्यायेन कथंचिदन्वयः कल्प्येत ततश्च फलसंबन्धो न सिध्येदित्याशयः। यद्यपि स्वर्गशब्दस्य प्रीतिवाचित्वात्तस्याश्रान्यत्र शेषत्वायोगात् अग्निहोत्राधिकारवाक्ये समानपदोपात्तमपि धात्वर्थमुल्लंघ्य तस्या एव भाव्यत्वमित्युच्यते तथापि पशूनां

साधनत्वान्वयार्हत्वादुद्भिद्वचने यागस्यैव भाव्यत्वेनान्वयः स्यात्ततश्च तृतीयान्तोद्भिच्छब्दानन्वयप्रसंग इत्याशयेनाह—**अतएवेति**। विधीयमानधात्वर्थस्य करणत्वान्वयस्वीकारादेवेत्यर्थः। प्रसंगाल्लिङर्थेष्टसाधनताप्रकारकं धात्वर्थविशेष्यकं बोधं वदतां मतमपाकरोति—**येषामिति**। नन्वभेदार्थौ तृतीयामङ्गीकृत्योद्भिदभिन्नो याग इष्टसाधनमित्यर्थं ब्रूमः कानुपपत्तिरत आह—**उद्भिदेति**। **तृतीयेति**। न शाब्दकरणत्वेत्थंभावादाविवाभेदे तृतीया व्याकरणे स्मर्यते, कर्माङ्गत्वेन मन्त्राणामिव वेदाङ्गत्वेन व्याकरणस्मरणाच्च तदनुसार्यर्थे वैदिकशब्दस्य संभवति न तदननुसार्यर्थस्वीकरणमुचितम्। ततश्चोद्भिच्छब्दस्य द्रव्य इव यागेपि व्युत्पत्तेः कल्प्यत्वाविशेषाद्विभक्तौ प्रसिद्धार्थानुसरणायोद्भिच्छब्दो द्रव्यपर एव स्वीक्रियताम्। तथाच भवतां क्रियात्वाभिमते धात्वर्थे तृतीयार्थस्य विनैव मत्वर्थलक्षणयान्वयोपपत्तेर्नोद्भिच्छब्दस्य नामत्वं स्यात् नतरां भवदभिमतवाक्यार्थ इति भावः। **अन्वयादिति** अन्वयसंभवादित्यर्थः। ननु न धातूद्भिच्छब्दयोर्भवन्मतेपि समानविभक्त्यन्तत्वादेकार्थत्वं धातोर्विभक्त्यभावात्, साधनतात्मकैकार्थान्वयितया तु मयाप्येकार्थत्वं वक्तुं शक्यं, वैयधिकरण्याच्च सामानाधिकरण्यान्वयस्य युक्तत्वान्नामत्वसिद्धिरिति शंकां निराकर्तुं लिङ्गेति कारकविशेषणम्। लिङभिहितसिद्धावस्थसाधनतान्वयिनो धात्वर्थस्यासिद्धावस्थकारकान्वयिना नामार्थेन नु भवत्यभेदप्रत्यभिज्ञा, भवति तूभयोरेकरूपकारकान्वये सेत्याशयः।

परमते तृतीयान्तानामिव द्वितीयान्तनामप्यन्वयोऽनुपपन्नः, तद्वरं द्वितीयान्तेष्वेवानुपपत्तिस्वीकरणमित्याशयेनाह—**सत्यमिति**। वक्ष्यमाणलक्षणातः प्राक्तदुपयोगिशक्त्यार्थप्रतीतिरुपपाद्यत इति द्योतनार्थस्तावच्छब्दः।

अङ्गेति भूयप्रधानो निर्देशः, यद्गतमङ्गत्वं यो बोधयति स तस्य विनियोगविधिरित्यर्थः। अङ्गत्वं च पारार्थ्यवाचिलिङादिसमभिव्याहारात् तत्त्वेन बोधयतु तृतीयादिसमभिव्याहारात्साधनतादिसंबन्धज्ञापनमुखेन वा नात्र भेद इति कथनाय संबन्धशब्दः। ननु तृतीययैव संबन्धप्रतीतिसिद्धेः किं विधिनात आह—**सहीति**। न तृतीयादिविभक्तीनामङ्गत्वे स्वातन्त्र्यं सत्यामपि तृतीयायां प्रयाजशेषादेर्हविरभिधारणादौ शेषत्वाभावात्, असत्यामपि तस्यां सक्तनां होमशेषत्वात्। भवति हि प्रधानभूतविध्यनपेक्षितत्वाच्छक्यार्थेष्वपि तात्पर्यबाधः, सिध्यति चाशक्यार्थेष्वपि तदपेक्षितेषु तात्पर्यम्। अतस्तृतीयया प्रतिपन्नेपि साधनत्वे विध्यन्वयोऽपेक्ष्यत इत्यर्थः। नचैवं विधिनैव योग्यताद्यालोचनसहकृतेन विनियोगसिद्धेर्विभक्तीनामकिंचित्करत्वमिति शङ्क्यं, ययोः समभिव्याहारे फल-

वत्त्वादिना नैकत्र शेषत्वमवधारयितुं शक्यं तत्र विभक्तेरेव निनिगमकत्वात्। यथा मैत्रावरुणाय दण्डं ददातीत्यत्र। अस्तिह्यत्रोभयोर्दण्डमैत्रावरुणयोः प्रयोजनवत्त्वम्, अस्ति चैतदन्यतरार्थत्वे दृष्टप्रयोजनलाभः। चतुर्थीसामर्थ्यात्तु द्वितीयाप्राप्तमपि दण्डप्राधान्यं परित्यज्य मैत्रावरुणस्यैव तदाश्रीयते।

ननु किमेतदङ्गत्वम् अविनाभावनिरूपकत्वं वा प्रयोज्यत्वं वा अधिकपरिमाणत्वं वा विध्यंतविहित्वं वा उपकारकत्वं वा पारार्थ्यं वा। आद्यः, आग्नेयादीनां मिथोऽङ्गत्वापत्तेः। न द्वितीयः पुरोडाशकपाले तुषोपवापानङ्गत्वापत्तेः। न तृतीयः, कोटिहोमाङ्गानामनङ्गत्वापत्तेः। न चतुर्थः, विध्यादिविहितशाखाच्छेदादीनामनङ्गत्वापत्तेः। न पंचमः, आधानाध्ययनयोः कर्माङ्गत्वापत्तेः। न षष्ठः, पारार्थ्यं हि परोद्देशप्रवृत्तकृत्याश्रयत्वं वा स्यात्, तादृशकृतिकर्मत्वं वा; नाद्यः, यागादेरनङ्गत्वापत्तेः न द्वितीयः, पुरुषस्यानङ्गत्वापत्तेः। अत आह—**परोद्देशेति**। परोद्देशप्रवृत्तत्वं परोद्देशेनोपपादितत्वं, तच्च कृतिव्याप्यत्वस्य विशेषणम्। व्याप्यत्वशब्देन चोद्देश्यत्वानुद्देशत्वसाधारणं विषयत्वमुच्यते। ततश्च विध्यन्वयिन्यां कृतौ यद्विषयत्वानुपपत्तिर्यदुद्देश्यकत्वेन परिहियते तत्तस्याङ्गं तदर्थं चेत्युक्तं भवति। प्रसिद्धं ह्येतत् प्रेक्षावत्कृतावपुरुषार्थविषयत्वं तत्साध्यपुरुषार्थोद्देश्यकत्वमन्तरेणानुपपन्नमिति। भवति च वपनादिविषयत्वानुपपत्तिपरिहारः पुरुषोद्देश्यकत्वेन तदुद्देश्यकत्वानुपपत्तिपरिहारश्च क्रत्वपूर्वोद्देश्यकत्वेनेति वपनपुरुषयोः पुरुषक्रत्वङ्गत्वसिद्धिः। इत्थं यागस्वर्गयोः स्वर्गपुरुषौ प्रति शेषत्वमूह्यम्। भवति हि यागः किमर्थं कर्त्तव्य इत्याक्षेपे स्वर्गायेति समाधिः स्वर्गः स्वपरसाधारणः किमर्थमुत्पाद्य इत्याक्षेपे च स्वार्थमिति समाधिः। केचित्तु परोद्देशप्रवृत्तत्वं शेषत्वम्। प्रवृत्तिरिति च चेतनाचेतनकर्तृकव्यापारमात्रमभिधीयते। अस्ति च सर्वकारकाणां स्वव्यापारे कर्तृत्वं, संभवति चोद्देश्यतात्मिका विषयता तत्रापि प्रयोजनानां पाकाय काष्ठानि ज्वलन्ति धान्याय जलं स्रवतीत्यादिव्यवहारात्। व्यवजहार चाचेतनशब्दकर्तृकेऽप्यभिधाव्यापारे व्यक्तीनामुद्देश्यत्वं भवदेवः, प्रकृतिकर्तृकव्यापारे च प्रपञ्चोद्देश्यकत्वं कपिलः। ततश्च यदुद्देशेन यद्याप्रियते तत्तदङ्गमित्याहुः।

तत्रेति। यच्छब्दज्ञानमन्यव्यवधानमनपेक्ष्य यदर्थज्ञानं जनयति सा तस्मिन्नर्थे श्रुतिरित्यर्थः। नच विनियोजकमानप्रस्तावे विनियोक्त्र्यभिधात्रीसाधारणलक्षलक्षणकथनं तन्निर्देशश्चासंगताविति शङ्क्यम्। विधितद्विनियोज्योपस्थापनेन विधिसहकारित्वस्य तयोरपि तुल्यत्वात्। तत्त्वेनैव निरूपणीयतया तेषां प्रस्तुतत्वात्। साधारणोऽप्यभिधात्रीशब्दो ब्राह्मणपरिव्राजकन्यायेन विशेषपरो बोध्यः।

तत्र विधात्री लिङाद्यात्मिका। अभिधात्री व्रीह्यादिश्रुतिः। यस्य च शब्दस्य श्रवणादेव संबन्धः प्रतीयते सा विनियोक्त्री। सा च त्रिधा—विभक्तिरूपा समानाभिधानरूपा एकपदरूपा चेति। तत्र विभक्तिश्रुत्याङ्गत्वं, यथा व्रीहिभिर्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागाङ्गत्वम्।

नच उत्पत्तिशिष्टपुरोडाशावरुद्धे यागे कथं व्रीहीणामङ्गत्वमिति वाच्यम्। पुरोडाशप्रकृतितयोपपत्तेः। पशोरिव हृदयादिरूपहविष्प्रकृतितया यागाङ्गत्वम्। न च साक्षात्पशोरेवाङ्गत्वं किं न स्यादिति वाच्यम्, तस्य विशसनात्, अवदीयमानत्वाच्च हृदयादीनाम्। अवदीयमानं हि हविः। यथा पुरोडाशादिः। मध्यात्पूर्वार्धाच्चावद्यतीति वाक्यात्। हृदयादीनि चावदीयमानानि न पशुः, हृदयस्याग्रेऽवद्यतीति वाक्यात्। अतो हृदयादीन्येव हवींषि, पशुस्तु प्रकृतिद्रव्यम्।

पात्नीवतयागे तु साक्षात्पशुरेवाङ्गम्। तस्य जीवत एव 'पर्यग्नि-

---

यस्य चेति। शेषिशेषत्वाभिमतयोस्तत्तद्रूपेणोपस्थितयोः संबन्धबोधो व्यवधानमनपेक्ष्य यच्छब्दज्ञानेन जन्यते सा विनियोक्त्री। संबन्धश्चाङ्गत्वात्मना साधनत्वात्मना संबन्धात्मना वा प्रतीयतां न तद्विशेषो लक्षणेऽपेक्ष्यते। तेन लट्लट्तृतीयाषष्ठीपदश्रुत्यादीनां संग्रहसिद्धिरित्याशयः।

भवतूत्पत्तिशिष्टपुरोडाशसाधनत्वानुरोधेनोत्पन्नशिष्टस्य व्रीहिसाधनत्वस्य प्राणाडिकत्वम्। उत्पत्तिशिष्टं तु पशोः साधनत्वम्। अतस्तदनुरोधेन हृदयस्याग्रेऽवद्यतीत्यादिवच्चःसु चोदकप्राप्तावदानप्रदेशत्वेन मध्यादिवद्धृदयादिविधानमुचितं न तस्य प्राणाडिकत्वमत आह—नच साक्षादिति। न विशसनविशिष्टस्य हेतुत्वसंभव इत्यर्थः। युद्वा प्रशसा बाहू श्येनमस्य वक्षः षड्विंशतिरस्य वङ्क्रय इत्याद्यभिगुणा प्राशस्त्यश्येनाद्याकृतीयत्ताकथनेनाविकलतत्तद्धरणपर्यंतं विशसनमुपदिश्यमानं पशोः साक्षादङ्गत्वे व्यर्थं स्यादित्याशयः। भवतु तर्हि पशावसंभवतो देवतासंबन्धस्याविशेषेण सर्वतदवयवेष्ववतरणं तत्राह—अवदीयमानत्वादिति। प्रकृतिभूतपयोयागादतिदेशप्राप्तं हविःसंस्कारकमवदानं हृदयादिषु निर्दिश्यमानं तेषां हविष्ट्वं गमयति भक्षणमिव फलचमसस्य, तद्द्वारैव पशोः साधनतोपपत्तेर्नेतरेषां साधनत्वकल्पना युक्तेत्याशयः।

इत्थं च सर्वपशुयागेषु प्रसक्तोत्सर्गापवादमाह—पात्नीति। साक्षादेवेत्य-

कृतं पाल्लीवतमुत्सृजति' इत्युत्सर्गविधानात्। यत्र तु त्रिशसनं 'तत्र पशुः प्रकृतिद्रव्यमित्येव सिद्धम्।

एवं व्रीह्यादयोऽपि प्रकृतिद्रव्यतया यागाङ्गं तृतीयाश्रुत्येति। आरुण्यस्यापि क्रयाङ्गत्वं तृतीयाश्रुत्या। न चामूर्तस्य तस्य कथं क्रयाङ्गत्वमिति वाच्यम्। एकहायनीरूपद्रव्यपरिच्छेदद्वारा तदुपपत्तेः।

व्रीहीन्प्रोक्षतीत्यत्र प्रोक्षणस्य व्रीह्यङ्गत्वं द्वितीयाश्रुत्या। तच्च प्रोक्षणं न व्रीहिस्वरूपार्थम्, स्वरूपे आनर्थक्यात्, व्रीहिस्वरूपस्य प्रोक्षणं विनाऽनुपपत्त्यभावात्, किं त्वपूर्वसाधनत्वप्रयुक्तम्। यदि हि

न्वयः। इतिर्हेतौ। पर्यग्निकृतमितिवचसि विहितया क्लृप्तोपकारया पर्यग्निकरणान्ताङ्गरीत्या निराकांक्षेणे त्वाष्ट्रं पाल्लीवतमितियागविधिना जीवत एव पशोर्देवतोद्देशेनोत्सर्गविधानादित्यर्थः।

द्रव्यविनियोगं निरूप्य तदपेक्षं गुणविनियोगमाह—आरुण्यस्येति।

तृतीयावगतव्रीहिविनियोगोपजीवनेन द्वितीयाश्रुत्या प्रोक्षणविनियोग इत्याह—व्रीहीनिति। नन्वेवं प्रोक्षणस्य न प्रकरणात्कर्त्वङ्गत्वं सिध्येदित्याशंक्य श्रुतिरेवेयं प्रकरणसहकृता तदङ्गत्वे पर्यवस्यतीति वक्तुमाह—तच्चेति। आधानं प्रत्यग्नीनामिव प्रयोजनवतां व्रीहीणां भवेत्प्रोक्षणं प्रति शेषित्वमत आह—व्रीहिस्वरूपस्येति। अग्निगताहवनीयाद्यलौकिकरूपस्य तु शास्त्रगम्योपायकत्वान्न तत्रानर्थक्यमित्याशयः। भवतु तर्हि स्वगताद्दष्टविशिष्टाकारेण व्रीहीणां शेषित्वमित्याह—किंत्विति। नाहवनीयादिरूपवद्व्रीहिगताद्दष्टरूपं प्रयोजनवत्तया शास्त्रान्तरादवगतं यत्तदाकारेण व्रीह्यः शेषितां भजेयुः। अतः प्रकृतशास्त्रान्तरावगतमपूर्वसाधनरूपं व्रीहिपदेन लक्ष्यते तद्रूपशेषत्वेन च श्रुत्या प्रोक्षणं विनियुज्यत इत्याह—अपूर्वेति। ननु न स्वरूपयोग्यतात्मिकायां साधनतायां प्रोक्षणोपयोगः, तस्या लौकिकव्रीहिष्वपि सत्त्वात्। नापि फलोपधानात्मिकायां व्रीहिप्रोक्षणयोरुभयोरपि दण्डचक्रवत् सामग्र्यन्तःप्रवेशे तुल्येऽन्यतरफलोपधानेऽन्यतरप्रयोज्यताया वक्तुमशक्यत्वादत आह—यदि हीति। आग्नेयप्रयाजापूर्वयोः फलापूर्वसामग्रीप्रवेशे तुल्येऽपि शास्त्रवशादाग्नेयापूर्वस्य फलोपधाने यथा प्रयाजापूर्वोपयोगव्यवहारः, तथा प्रकृते व्रीहीणां फलोपधानं प्रोक्षणायत्तमित्ति शक्यं व्यवहर्तुम्। मास्तु वा द्विविधसाधनतायामपि प्रोक्षणोपयोगः, अपूर्वसाधनताया उद्देश्यतावच्छेदकत्वमहिम्नैव त्वपूर्वशेषत्वसिद्धेर्नानर्थक्यमित्याशयः। नन्वपूर्वसाधनमात्रस्योद्देश्यतायां स्रुवसान्नाय्यादिष्वपि प्रोक्षणापत्तिः, व्रीहित्वस्यापि विवक्षणे युगपद्वृत्तिद्वयविरोधो वाक्य-

व्रीहिषु प्रोक्षणं क्रियते तदा तैर्यागेऽनुष्ठितेऽपूर्वं भवति नान्यथेति। अतः प्रकरणसहकृतया द्वितीयाश्रुत्या तण्डुलनिर्वृत्तिप्रणाड्या यदपूर्वसाधनं तदङ्गत्वं प्रोक्षणस्योच्यत इति। एवं सर्वेष्वप्यङ्गेषु अपूर्वप्रयुक्तत्वं वेदितव्यम्।

एवमिमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्रापि द्वितीयाश्रुत्या मन्त्रस्याश्वाभिधान्यङ्गत्वम्। यत्तु वाक्यीयोऽयं विनियोग इति तन्न। तथा सति वाक्यालिङ्गस्य बलीयस्त्वेन यावद्वाक्यादश्वाभिधान्यङ्गं भवति तावल्लिङ्गाद्रशनामात्राङ्गत्वमेव स्यात्, स्योनं ते सदनं कृणोमीत्यस्येव सदनाङ्गत्वम्। श्रौतविनियोगपक्षे तु यावल्लिङ्गाद्रशनामात्राङ्गत्वं संभवति तावच्छ्रुत्या 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्र तृतीयाश्रुत्या ऐन्द्र्या ऋचो गार्हपत्योपस्थानाङ्गत्ववदश्वाभिधान्यां विनियोगः क्रियते इति युक्तं मन्त्रस्याश्वाभिधान्यङ्गत्वम्। तस्माच्छ्रौत एवायं विनियोगः।

भेदो यवेषु प्रोक्षणाप्राप्तिश्चेतिशङ्कां निराकुर्वन्नुपसंहरति—अतइति। यादृशप्रणाड्या यदपूर्वं प्रति साधनत्वं व्रीहिभिर्यजेतेत्यत्र व्रीहित्वैकार्थसमवाय्यवगतं तादृशसाधनत्वस्यैव लक्षणेति न सान्नाय्ये प्रसक्तिः। तस्यापूर्वान्तरसाधनत्वात्, नापि स्रुवादौ तस्य प्रणाड्यन्तरेण साधनत्वात्, भवति च यवेषु प्रसक्तिस्तादृशसाधनत्वादित्यर्थः। ननु विनियुक्तान्व्रीहीनुद्दिश्य विहितस्य भवत्वपूर्वार्थत्वं विनियुज्यमानविनियोक्ष्यमाणयोस्तु चमसाध्वर्युपयसोरुद्देशेन विधीयमानयोर्वरणदध्यानयनयोर्न तदर्थत्वं प्रागनवगतापूर्वसाधनत्वस्य लक्षयितुमशक्यत्वादत आह—एवमिति। वरणं तावद्दृतैश्चमसाध्वर्युभिरपूर्वं कुर्यादिति बोधयता वचनेन चमसाध्वर्युवदपूर्वभावनान्वयितया बोधितं विनैव लक्षणया भवति तदर्थं, दध्यानयनमपि सा वैश्वदेवीतिसर्वनाम्ना संस्कारविशिष्टं पयः परामृश्यापूर्वे विनियुञ्जतापूर्वे विनियुक्तं भवतीत्याशयः। विस्तरेण चापूर्वसाधनलक्षणोपपत्तिमग्रे वक्ष्यामः।

इतिकरणस्याश्रुतित्वं द्वितीयायाश्च क्रियामात्रनिरूपितप्राधान्यबोधकत्वमिति 'इमामगृभ्णन्' इत्यस्य वाक्येन विनियोगः कैश्चिदभ्यधायि तन्निराकर्तुमाह—इमामिति। यद्यपि नेतिकरणस्य श्रुतित्वं तथापि विशिष्टक्रियाया द्वितीयया बोध्यमानो विनियोगो विशेष्यांश इव विशेषणांशेऽपि भवति श्रौत इत्याशयः।

यदाहवनीये जुहोतीत्याहवनीयस्य होमाङ्गत्वं सप्तम्यश्रुत्या। एवमन्योऽपि विभक्तिश्रुत्या विनियोगो ज्ञेयः।

पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वम्। यजेतेत्याख्याताभिहितसङ्ख्याया भावनाङ्गत्वं समानाभिधानश्रुतेरेकपदश्रुत्या च यागाङ्गत्वम्।

न चामूर्तायास्तस्याः कथं यागाङ्गत्वमिति वाच्यम्॰। कर्तृपरिच्छेदद्वारा तदुपपत्तेः। कर्ता चाक्षेपलभ्यः। आख्यातेन हि भावनोच्यते। सा च कर्तारं विनाऽनुपपन्ना तमाक्षिपति।

विशिष्टविनियोजकविभक्त्या विशेषणविनियोगस्य श्रौतत्वव्यवहारमन्यत्राप्याह—यदिति। एवमिति। ज्ञाप्यते हि 'मैत्रावरुणाय दंडं प्रयच्छति' इत्यत्र चतुर्थ्या स्वप्रकृत्यर्थशेषत्वं दण्डदाने। अतएव मैत्रावरुणोऽपि दण्डप्रयोजक इत्युक्तं चतुर्थे। ज्ञाप्यते च वासिष्ठानां नाराशंस इत्यत्र षष्ठ्यापि द्वितीयप्रयाजाश्रितमन्त्रनियमस्य वासिष्ठाङ्गत्वम्। अतएव न वासिष्ठावासिष्ठानां सत्रे सहाधिकार इत्युक्तं षष्ठे। ज्ञाप्यते च पञ्चम्यापि स्वप्रातिपदिकार्थस्य परशेषत्वं मध्यात्पूर्वार्धाच्च हविषोऽवद्यतीति। अतएवावत्तनाशेऽवशिष्टान्न पुनरवदेयम्। अपादानतया तच्छेषस्य तत्कर्मत्वायोगादित्युक्तं षष्ठे। एवं विभक्त्यन्तरप्रमाणको विनियोगो ज्ञेय इत्यर्थः। यद्वा यया विभक्त्या प्रकृत्यर्थेऽन्यस्य प्रकृत्यर्थस्य चान्यत्र शेषत्वं बोध्यत इत्युक्तं तद्विपरीतोऽपि तत्प्रमाणको विनियोगः क्वचिद्बोध्यः। ज्ञाप्यते हि तप्ते पयसीत्यत्र द्विकर्मकधातुविशिष्टविधिनार्थिकव्याप्यमानत्वे गृहीततात्पर्यकया सप्तम्या पयसः शेषित्वम्। ज्ञाप्यते च हिरण्यंमात्रेयाय ददातीत्यत्र हिरण्यात्रेययोः शेषसंस्कारानर्हत्वेनेप्सितत्वरहितकारकमात्रे गृहीततात्पर्यकाभ्यां द्वितीयाचतुर्थीभ्यां प्रकृत्यर्थयोः शेषत्वम्। ज्ञाप्यते च 'एन्द्रवायवं गृह्णातीत्यादौ विशिष्टाभिधायिपदोत्तरया द्वितीयया विशेष्यगतमीप्सितत्वं प्रकरणलभ्यमनुवदन्त्या विशेषणदेवतायास्तद्द्वारकं क्रियासंबन्धं बोधयन्त्या ग्रहणाङ्गत्वमित्याशयः। कारकाङ्गत्वं तत्संबन्धः। यदि समानाभिधानश्रुत्या संख्याया भावनाङ्गत्वं तर्ह्याख्यातवाच्यः कर्तैवेति वदतां मते संख्यायाः क्रियाङ्गत्वं किं न सिध्येदत आह—पदेति। यागेतिधात्वर्थभूतक्रियोपलक्षणार्थम्। इयांस्तु भेदः तन्मते कर्तृद्वारैव संख्यायाः क्रियान्वयः स्वमते तु साक्षादिति। कथममूर्तस्य साक्षादन्वय इति चेत्तत्राह—नचेति। नन्वेवं क्रियायां विनियुक्तस्यैव कर्तुरेकहायन्या इव परिच्छेदसंभवादभिहितस्यैव शब्देन विनियोगसंभवात् स्वीकार्यमाख्यातवा-

ननु किमित्येवं वर्ण्यते आक्षेपलभ्यः कर्तेति। आख्यातवाच्य एव किं न स्यात्। आख्यातश्रवणे भावनाया इव कर्तुरपि प्रतिपत्तेः। न च भावनयैवाक्षेपसंभवे किमिति तद्वाचकत्वं कल्पनीयमिति साम्प्रतम्। तथा सति आख्यातवाच्यकर्त्रैव भावनाक्षेपसंभवे तद्वाचकत्वमपि न स्यात्। किं च भावनाया न केवलं कर्त्रैव संबन्धः, कारकान्तरेणापि संबन्धात्। अतः सा न झटिति कर्तारमेवाक्षिपेद्विशेषाभावात्। कर्ता तु भावनयैव संबद्धो न कारकान्तरेण, 'गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यात्' इति न्यायात्। अतः स झटिति तामाक्षिपेदिति स एवाख्यातवाच्यः,। भावना तु आक्षेपलभ्यैव किं न स्यात्। किंचैवं तृतीयादिविभक्तीनामपि करणादिवाचकत्वं न स्यात्, तेषामपि कर्तृवदाक्षेपलाभसंभवात्।

किंच यदि कर्ता न वाच्यः स्यात्कथमेकत्वं तेनान्वियात्। न हि शाब्दमशाब्देनान्वेतीति युक्तम्। अन्यथा ऊहादिलोपप्रसङ्गः।

च्यत्वमत आह—कर्ता चेति संभवत्यनभिहितस्यापि कर्तुराक्षेपादङ्गत्वबोधः, विवृद्धस्तोमकेषु क्रतुष्वागम्यमानानां मंत्राणामिवेत्याशयः।

वैयाकरणाः शङ्कते—नन्विति। तथासतीति। तत्तद्वाचकत्वं न स्यादित्यपि वचः स्यादिति योज्यम्। आक्षेपलभ्यैवेति। स्वीक्रीयते हि सिद्धांतिना यष्टा पक्तेत्यादिकृदंतेषु कर्तुः शक्यत्वं भावनायाश्चाक्षेपलभ्यत्वं तथैवाख्याते स्वीकर्त्तुमुचितम्। आख्यातवद्वा कृदन्तेष्वपि भावनाया एव शक्यत्वं वक्तुमुचितम्। अथ तत्र लिङ्गसंख्यान्वयाय कर्तुः शक्यत्वमङ्गीक्रियते तर्ह्याख्यातेऽपि संख्यान्वयायाङ्गीक्रियताम्। अथाख्यातस्थले कारकान्वयाय भावनाभिधानस्यावश्यकत्वात्कर्त्तुराक्षेपः, तर्हि काष्ठैः पक्वमित्यादिषु कारकान्वयाय कृदन्तेष्वपि भावनाभिधानापत्तिः। अथ कृदन्तेषु कर्त्रादेराख्यातेषु भावनायाः प्राधान्यप्रतीतेरभिधेयत्वव्यवस्थेत्युक्तं तन्न, जातिगुणशब्दजन्यप्रतीतिष्वनभिधेयानामपि व्यक्तीनां प्राधान्यानुभवादित्याशयः। तेषामपीति। शक्यते हि वक्तुं कर्तृकरणयोरित्याद्येकवाक्येन द्वेकयोरित्यादिना कर्तृकरणैकत्वादौ तृतीयैकवचनादि विधीयत इति।

अन्यथेति। तरसमयपुरोडाशेषु पेषणकाले प्रत्यक्षोपस्थितमांसान्वितक्रियाप्रकाशनं कुर्वता मन्त्रेण प्राकृतकार्यसिद्धेर्न मांसमसीत्यूहः स्यात् उपमितप्रकृतिविधिलक्षितप्राकृताङ्गोपकारविशिष्टां भावनां विदधतश्च विकृतिविधेर्नैरा-

किंच देवदत्तः पचतीति सामानाधिकरण्यं न स्यात्। न हि केवलं भावनावाचकस्याख्यातस्य देवदत्तपदेन सामानाधिकरण्यमुपपद्यते, एकार्थनिष्ठत्वाभावात्। कर्तृवाचकत्वे तूपपद्यत एव।

लः कर्तरीति व्याकरणस्मृतिविरोधस्तु कर्तुरनभिधेयत्वे स्पष्ट एव किं च कर्तुरनभिधेयत्वे देवदत्तेन पचतीति प्रयोगप्रसङ्गः। तृतीया हि अनभिहितयोः कर्तृकरणयोर्विहिता, आख्यातेन कर्ता नाभिहित इति कर्तृवाचिनी तृतीया स्यादेव। कर्तुरभिधाने तु अभिहितत्वादेव तृतीया न प्राप्नोति, तस्या अनभिहिताधिकारत्वात्। देव

काङ्क्ष्यसंभवेन नातिदेशवचःकल्पना स्यादित्याशयः। सामानाधिकरण्यमेकसंख्याभिधायकविभक्त्यन्तत्वं, तच्च तत्संख्यान्वये कार्याभिधानव्याप्तं देवदत्तः पक्तेत्यादावुभयदर्शनादिति भावः। उपलक्षणं चैतत्, मध्यमोत्तमादिव्यवस्थाप्रयोजकं युष्मदादिसामानाधिसामानाधिकरण्यमपि न स्यादिति बोध्यम्।

ल इति। कर्त्तरिकृदित्यस्मिन्सूत्रे हि कर्तरीतिपदं कृदभिधेयतया कर्तारं प्रतिपादयतीत्यविवादम्। तस्माच्च 'लः कर्मणि च भावे चाकर्मकेभ्यः' इति सूत्रे कर्तरीत्यनुवृत्त्या निष्पद्यमानमेव 'लःकर्तरीतिसूत्रं कर्तुर्लकाराभिधेयत्वं बोधयति। अबोधकत्वे वा तिङामिव शत्तृशानचोरपि लादेशत्वाविशेषेण तत्रापि कर्त्रनभिधानमापद्येत। ततश्च जक्षभ्यमानोऽनुब्रूयादितिविहितजपस्य न क्रतुयुक्तपुरुषधर्मत्वं स्यादित्याशयेन—स्पष्टइति। स्मृतिनिरूपितो विरोधस्तत्कृतो वा जक्षभ्यमानाधिकरणनिरूपितो विरोधस्तथोक्तः। नच कर्तरिकृदित्यनेन शत्रादेः कर्तृवाचित्वलाभसंभवः, तस्य स्थान्यर्थनिराकाङ्क्ष्णुलादिकृद्विषयत्वात्। सत्यपि तल्लाभे भावकर्मवाचित्वालाभेन क्रीयमाण इत्यादिप्रयोगानापत्तेश्चेत्याशयेनैवकारः। तस्या इति। अनभिहिताधिकारे कर्तृकरणयोस्तृतीयेत्यनेन विहितत्वादित्यर्थः। अथोच्येत लः कर्त्तरीत्यस्य तृतीयादिविधायकसूत्रस्य च द्व्येकयोरित्याद्येकवाक्यत्वेन कर्त्रादिसंख्यायां चैकवचनादि तृतीयैकवचनादिं च विधीयते ततश्चाधिकारप्राप्तमनभिहितत्वं संख्यायामन्वेति, विशेषणानां प्रधानगामित्वात्। अतः पचतीत्यनेन कर्तुरनभिधानेऽपि कर्तृसंख्याया अभिहितत्वान्न देवदत्तेनेति तद्वाचकविभक्तिप्रसक्तिरिति। तन्न। लकारस्यैकवचनाद्यनात्मकत्वेन लइत्यस्य द्विवचनैकवचने इत्यनेन सामानाधिकरण्यान्वयायोगात्। ङसन्तेन ल इत्यनेन निरनुबन्धलकारसामान्यग्रहणमंगीकृत्य वर्तमानेलडित्यादिविहितस्य लस्यादेशभूते द्विवचनैकवचने इत्यन्वयेऽपि द्विवचनादिसंज्ञावतो लादेशतिबादे-

दत्तः पचतीति प्रथमा तु प्राप्नोत्येव, प्रथमाया अभिहितकारकविभक्तित्वात्, प्रातिपदिकार्थमात्रवाचित्वाद्वा।

न च तदा प्रातिपदिकेनैवार्थस्योक्तत्वात्प्रथमावैयर्थ्यम्। लिङ्गसङ्ख्याप्रतिपत्त्यर्थं तस्या आवश्यकत्वात्। केवलप्रातिपदिकस्य प्रयोगा-

---

रेवार्थकथनापत्तेरतत्संज्ञारहितस्य शानजादेरर्थो न कथितः स्यात्, स्याच्चादेशपदाध्याहारन्निमित्तं गौरवम्। लकारवच्च तृतीयादेरपि कर्तृकरणाद्यनभिधायित्वे सत्यैन्द्र्येत्यादौ श्रुतित्वासंभवः। अतोऽसति लादिविधेर्द्वैकयोरित्यनेनैकवाक्यत्वे कर्तुराख्यातानभिधेयत्ववादिना न कर्तृगतसंख्याया आख्याताभिहितत्वं नियन्तुं शक्यम्, यत्किंचित्कारकं परिच्छिन्दंत्या अपि क्रियाङ्गत्वोपपत्तेः। नापि संख्याया अनभिहितत्वान्वयित्वं, प्राधान्येनोपस्थिते कर्त्रादावेव तदन्वयात्। तेन देवदत्तेन पचतीतिप्रयोगापत्तिः। भवतु वा संख्याविशेषणमनभिहितत्वं तथापि संख्यायाः कृत्तद्धितसमासाभिहितत्वमप्रसक्तमिति तिङनभिहितत्वमेव विशेषणं स्यात्। ततश्च देवदत्तेन पक्तेति प्रयोगापत्तिः। चैत्रो मैत्रश्च गच्छतः इत्यत्र च तिङाद्यनभिहितायां कर्त्रैकत्वसंख्यायां चैत्रेण मैत्रेणेति तृतीयापत्तिरिति। को देवदत्तो यः शुक्लवासा इत्यादौ विनैव क्रियां प्रथमान्तयोर्नैराकाङ्क्ष्याच्च प्रथमायाः कारकविभक्तित्वमित्यस्वरसादाह—प्रातिपदिकेति। यद्यपि 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इति पाणिनिनानेकार्थेषु प्रथमा विहिता तथाप्यलिङ्गनियतलिङ्गेभ्य उच्चैर्नादिशब्देभ्यः परस्याः प्रथमायाः प्रातिपदिकार्थमात्रवाचित्वोपगमात्प्रकृतदेवदत्तपदस्य च नियतलिङ्गत्वात्तदभिप्रायेण तन्मात्रवाचित्वोपन्यास इति बोध्यम्।

किं प्रकृतोदाहरणे प्रथमावैयर्थ्यमापाद्यते उत सर्वत्र? नान्त्यः अन्यत्र प्रथमायाः प्रयोजनान्तरसत्त्वादित्याशयेनाह—लिंगेति। लिंगं च संख्या च प्रतिपत्तिश्चेति विग्रहः। सिंहोऽस्तीत्याद्यौ लिंगमात्रार्था, घटावित्यादौ संख्यामात्रार्था, द्रोणो व्रीहिरित्यादौ च द्रोणपदोत्तरा परिमाणाभिधानेन व्रीह्यन्वयप्रतिपत्त्यर्था। भवति हि प्रातिपदिकार्थाभेदान्वयिनो विभक्त्यर्थपरिमाणसामान्यस्य परिच्छेदकत्वेन व्रीह्यन्वयप्रतिपत्तिः, नतु प्रातिपदिकार्थस्यैव साक्षात्, नामार्थयोरभेदेनैवान्वयात्। प्रतिपत्तिपदेन पदार्थान्तरान्वयप्रतिपत्तिरुच्यते। आद्य आह—केवलेति। प्रकृतिसाधुत्वसिद्धिरेवात्र फलमित्यर्थः। एतेन द्वौ त्रय इत्यत्रापि विभक्तिवैयर्थ्यं निरस्तम्। नन्वेवमपि क्रियाश्रयस्य कर्तृत्वात्तत्साध्यस्य कर्मत्वादाकृतिन्यायेन क्रियाया एव वाच्यत्वं युक्तं, कर्तृकर्मोभयवाचिनश्चाख्यातस्य कथं व्यवस्थयोभयबोध-

न च विनिगमनाविरहः। कृतिमान् हि कर्ता। एवं च कृतेरेव भावनापरपर्यायाया आकृत्यधिकरणन्यायेनाख्यातवाच्यत्वसंभवे न तद्वतः कर्तुर्वाच्यत्वं कल्पनीयम्, गौरवप्रसङ्गात्। न च भावना कारकान्तरेणापि संबद्धा तदुज्झित्वा न झटिति कर्तारमाक्षिपतीति वाच्यम्। सा हि यथा नियमेन कर्त्रा संबद्धा, न तथा करणादि-

---

सत्यमाक्षेपलभ्यस्य नाभिधेयत्वं, कर्त्रापि भावनाक्षेपसंभवेन विनिगमनाविरहात्तु कर्तृक्रिययोरभिधेयत्वं ब्रूमोऽत आह—नचेति। कर्तेत्यनन्तरं त्वयाऽऽख्यातपदवाच्यत्वेन स्वीकार्य इति शेषः। वः न इत्यादिपदद्दष्टान्तेन एऐ इत्यादिदृष्टान्तेन कल्पितप्रकृतिप्रत्ययविभागवर्णविभागपदगताभिधावादिना ह्युक्तन्यायेन विशिष्टाभिधाने स्वीकृते कृतिविशिष्टकर्त्रभिधानमेवाभ्युपेयं 'कर्तरि कृत्' इत्यस्माल्लविधावनुषक्तस्य कर्तरीत्यस्य स्वोपन्यस्ततुल्यार्थत्वनिर्वाहाय, तदनुरोधेन च भावप्रधानमाख्यातमित्यत्रौत्सर्गिकत्वेन प्रथमव्याख्यैवानुसर्तव्येत्यर्थः। ओमिति वदन्तं प्रत्याह—एवं चेति। आकृतिन्यायादेव विनिगमनालाभ इत्यर्थः। अथ प्रोक्षण्यधिकरणोक्तन्यायेन प्रकृतिप्रत्यययोस्तदर्थयोश्च भेदमाश्रित्य भावप्रधानमित्यस्यानुरोधेन प्रकृत्यर्थभावनाविशेष्यकमेव बोधमाख्यातपदे यदि वदामः, कर्तरीत्यनेन च तृजर्थमात्रवाच्यत्वसमर्पणं सूत्रद्वयेऽपि तुल्यं ब्रूमः, तदा कुतो हेतौर्विनिगमनालाभ इत्यत आह—गौरवेति। प्रकृतिप्रत्ययावर्थं सह ब्रूतस्तयोः प्रत्ययः प्राधान्येनेति पूर्वाचार्यस्मृतौ प्रकृत्यर्थप्राधान्यव्यवच्छेदप्रतीतेः प्रत्ययार्थं प्रति तस्य गुणत्वमेवेति प्रतीयेत। अभ्युपगतं चैतत्प्रामाणिकत्वेन 'प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रधानत्वात्' इति सूत्रे निर्दिष्टस्मृत्यर्थस्यांशिष्यत्वं वदतापि पाणिनिना, तद्वशेन च संभवत्परस्पराक्षेपयोः कस्य प्रत्ययार्थत्वमिति संदेहे प्रकृत्यर्थनिरूपितप्राधान्यभाज इत्यपि सिध्यति नियमः। न चैतस्य तिङन्तेषु वचनोपग्रहाद्यंशज्ञाप्यार्थान्तरविषयत्वेनान्यथासिद्धिः शङ्क्या, पाकनिरूपितप्राधान्यस्य तेषु कदाचिदप्यननुभवात्। ततश्च पचति पक्तेत्यत्र प्रकृत्यर्थतया निर्णीतपाकं प्रति कृतितदाश्रययोः प्राधान्यं स्वीकुर्वता तयोरेव प्रत्ययार्थत्वं स्वीकार्यं नाश्रयकृत्योरपि। अभिधान्तरकल्पनेऽतिगौरवात्। प्रत्ययार्थत्वमेव च तयोः स्वीकार्यं नतु कृतेः प्रकृत्यर्थत्वं, क्वचित्प्रकृत्यर्थप्राधान्यं क्वचित्प्रत्ययार्थप्राधान्यमिति व्युत्पत्तिभेदकल्पने स्मृतिसंकोचकल्पने च गौरवादित्याशयः।

कारकान्तरेण, तिष्ठतीत्यादिषु तया तदनाक्षेपात्। अतः प्रथमं सा कर्तारमेवाक्षिपति न कारकान्तरम्। अत एव चाख्याताभिहिता सङ्ख्या न कारकान्तरेण संबध्यते, तस्य प्रथममनुपस्थितेः।

अत एव तृतीयादिविभक्तीनां करणादिवाचित्वम्, भावनायास्तैः

तैः करणादिभिः। नन्वेवं पच्यत इत्यादावपि भावनाक्षिप्तकर्त्रा संख्यान्वयापत्तिः, तन्निवृत्त्यै कर्माभिधाङ्गीकरणेऽपसिद्धान्तः; न स्याच्च देवदत्तेनेति तृतीययाँ कर्त्रभिधानमिति चेत् न। यतो भवद्भिः शब्दशक्तिवैचित्र्यमहिम्ना यथा कर्तृकर्मणोरभिधानव्यवस्थाऽश्रीयते तुल्येऽप्याख्यातत्वे, तथाऽस्माभिस्तद्वशेनैव कर्तृकर्मणोर्लक्षणाव्यवस्थापि शक्यत आश्रयितुम्। तुल्यं च विकरणभेदेन शक्तिविशेषावधारणम्। आश्रीयते च शुक्लरूपशब्दयोर्गुणवाचित्वाविशेषेऽपि शक्तिवशेनैव द्रव्यलक्षणातदभावव्यवस्था। यथाहुः—

निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत्।
क्रियन्ते सांप्रतं काश्चित्काश्चिन्नैव त्वशक्तितः॥ इति।

नन्वेवं शक्त्यन्तरस्वीकारे परमतान्न विशेष इति चेत्परिहृतमेतद्भवदेवेन 'अभिधानशक्तेरेवाभिधेयाविनाभावोपस्थितार्थतात्पर्याया लक्षणाशक्तिशब्दार्थत्वात्' इति। लक्षणाव्यवस्थातश्च संख्यान्वयव्यवस्थासिद्धिः। यथाहुः—

यथैव क्वचिदुक्त्वापि कर्मान्यत्र न वक्ष्यति।
तथैव तस्य संख्यापि शब्दशक्तिर्व्यवस्थिता॥ इति।

यद्वोक्तन्यायेनाख्यातजन्यप्रतीतिविशेष्यव्यापाराश्रये संख्यान्वयनियमाङ्गीकरणात्तत्सिद्धिः। केचित्तु वत्सशोणशब्दाभ्यां गवाश्वावनभिधाय तद्गतवयोविशेषरूपविशेषाभिधानवत्कर्तृकर्मप्रत्ययाभ्यां तद्गतसंख्याभिधानमङ्गीकृत्य तन्महिम्नैव कर्तृकर्मप्रतीतिर्व्यवस्थामाहुः। तन्न। अनुभूयेते हि गवाश्वगतौ बाल्यरक्तत्वावान्तरभेदौ प्रत्यक्षेणेति संभवतस्तदभिधेयौ, नानुभूयते च संख्यावान्तरभेदः कर्तृकर्मणोः। यथाहुः—

न शोणत्वादिवत्संख्या जातिभेदेषु भिद्यते। इति।

नचाख्यातेन भावनाभिधाने यज्यादीनां क्रियानभिधायित्वादुक्तधातुलक्षणासंभवः। धात्वर्थस्य कारकान्वयित्वात्मकक्रियात्वाभावेऽपि व्यापारत्वात्मकक्रियात्वसत्त्वेन तदुपपत्तेः। स्वीकुर्मो वयं व्यापारफलोभयवाचित्वं धातूनां तदाश्रययोस्तु भावनाक्षेपलभ्यत्वेन न स्वीकुर्म आख्यातवाच्यताम्। इत्थं चौदनं पचतीत्यत्र धात्वर्थव्यापारविशिष्टभावनाश्रयलक्षकत्वमाख्यातस्य धात्व-

सह नियतसंबन्धाभावेन तया तेषां नियमेनानाक्षेपात्। आख्यात-श्रवणात्प्रागपि तृतीयादिविभक्तिश्रवणे करणादिप्रतीतेर्जायमान-त्वाच्च। नच शाब्दी सङ्ख्या कथमशाब्देन कर्त्रान्वेतीति वाच्यम्।

र्थफलाश्रयवाचकत्वं च द्वितीयायाः। पच्यत इत्यत्र तु फलाश्रयलक्षकत्वमाख्या-तस्य तादृग्व्यापाराश्रयवाचकत्वं च समभिव्याहृताया देवदत्तेनेतितृतीयाया इति परमताद्भेदः। फलस्य च गच्छति संयौति अवहन्ति करोतीत्यादौ तत्तत्संयो-गोत्पत्त्यादिभेदेनाभिधानात्तदाश्रयस्य प्राप्योत्पाद्यादिव्यपदेशः। ईप्सितानीप्सितभे-दस्तु द्वितीयादिशक्तिगम्यो मानान्तरगम्यो वेत्यन्यदेव। तत् सत्यपि धात्वर्थफला-श्रयवाचित्वे द्वितीयाया द्वितीयार्थस्य न धात्वर्थेऽन्वयः किं त्वाख्यातार्थशरीरा-न्तर्गतभवनाख्यप्रयोज्यव्यापारे। एकभावनान्वयिनोः परं कमकरणीभूतयो-रोदनपाकयोः पार्ष्टिकान्वयदशायामोदनादेर्धात्वर्थफलाश्रयत्वप्रतिपत्तेस्तदाश्रयवा-चित्वमोदनोत्तरद्वितीयायां व्यवच्छिद्यते। इत्थं हि पार्ष्टिकोऽन्वयः—फूत्करणादि-व्यापारेण विक्लित्तिविशिष्टात्मनौदनो भवतीति। संभवति च तादृशपचननिरूपि-ताश्रयताया ओदननिष्ठाया विक्लित्तिनिरूपितत्वम्। एतेन पच्यत इत्यत्र फलाश्रय-लक्षकत्वे सत्यपि न लक्षिताश्रयस्य फलेऽन्वय इति ध्येयम्। संगच्छते चैवं सति कारकाणां क्रियान्वयनियमः। यत्र त्वधात्वर्थफलशालिनो द्वितीयान्तेन निर्देशः यथा 'अग्निं चिनुते' इति तत्र न पार्ष्टिकान्वयदशायामपि फलान्वयित्वं किं तु फलाश्रयस्थण्डिलद्वारेण भाव्यत्वम्। सत्यपि तादृशफलशालिनि द्वितीयादिनि-र्दिष्टे यत्र कामशब्दादिना भावनाभाव्यावगतिस्तत्र तु लक्षणया द्वितीयार्थस्य धात्वर्थेऽन्वयः। अतएवेदृशस्थले मत्वर्थलक्षणाव्यवहारः प्राचामित्यलं पल्लवितेन।

भावनया कर्तुरिव कारकान्तराणामाक्षेपसंभवेऽप्युक्तनीत्याख्याताभिहितसं-ख्यायाः कर्त्तृकर्मणोरन्वयव्यवस्थोपपत्तिमभिप्रेत्य तृतीयादिविभक्तीनां करणा-दिवाचित्वे हेत्वन्तरमाह—आख्यातेति। अथाख्यातोपक्रमवाक्यानुरोधेनाशक्ता एव विभक्तयः किं न स्युरिति चेत्। अत्राहुः—

सत्यप्यव्याहृता शक्तिः कृतार्थत्वान्न दुष्यति।
असत्यास्तु फलं तस्याः प्रार्थितं दुर्लभं भवेत्। इति।

कथमिति। यद्यप्याक्षेपमात्रोपस्थापितकर्तृविशिष्टं संख्याभिधानं शक्यते कर्तु-माख्यातेन, यथाहुः—'विशिष्टग्रहणं नेष्टम्' इत्यादि, तथापि तादृक्संख्या-भावनयोर्युगपत्प्रतीत्यसंभवमभिप्रेत्येदम्। यत्तु भवदेवेन युगपदभिधानाभावेपि सूक्ष्मकालभेदस्य दुर्लक्ष्यत्वेन गोशब्दाभिधेयसामान्यविशेषयोरिव युगपत्प्रतीत्य-

कर्तुर्लक्षणाङ्गीकारात्। यथा च लक्षितं तीरं शाब्देन घोषेणान्वेति, एवं लक्षितः कर्ता एकत्वेनान्वेष्यति। अत एव देवदत्तः पचतीति सामानाधिकरण्यमुपपद्यते, कर्तुर्लक्षणात्।

नच मुख्ये संभवति किमिति लाक्षणिकत्वं स्वीकार्यमिति वाच्यम्। अनन्यलभ्यशब्दार्थत्वस्य व्यवस्थापितत्वात्। अन्यथा सिंहो देवदत्त इत्यपि सामानाधिकरण्यं मुख्यं स्यात्। किं च आख्यातवाच्यः कर्तेति वादिनोऽपि मते देवदत्तः पचतीतिसामानधिकारण्यं न मुख्यम्। तन्मते आख्यातेन तृतीयावन्निष्कृष्टशक्तिमात्ररूपकर्तृकारकाभिधानात्, शक्तिमद्द्रव्यस्याकृत्यधिकरणन्यायेनानभिधानात्, देवदत्तशब्देन च द्रव्यमात्राभिधानात्। अतश्च भिन्नार्थनिष्ठत्वात्तन्मतेऽपि न मुख्यं सामानाधिकरण्यम्, किं तु लाक्षणिकमेवेति न कश्चिद्विशेषः।

नच लः कर्तरीति व्याकरणस्मृतिबलादाख्यातवाच्यः कर्तेति वाच्यम्। नहि वाच्यवाचकभावो व्याकरणस्मृत्यधीनः, तस्य

व्यवसायोपपत्तिरित्युक्तम्, तत्तु शब्दस्य विरम्य बोधकत्वासंभवात् दृष्टान्ते च निरूढलक्षणया युगपत्प्रतीत्युपपत्तेरुपेक्ष्यमित्याशयः। पचतीतिप्रभृत्यर्थेनेतिकरणेन मध्यमादिव्यवस्थाप्रयोजकयुष्मदादिसामानाधिकरण्यसंग्रहः।

नहीति। उक्तंहि वैयाकरणैः—'शब्दैरर्थाभिधानं स्वाभाविकं न परिभाषितव्यमशक्यत्वाल्लोकत एवार्थावगतेः' इति। अतश्च 'कर्तरि कृत्' इति सूत्रे सप्तम्या वाच्यलक्ष्यसाधारणज्ञाप्यपरतामङ्गीकृत्य कर्तरीत्यनुषङ्गलब्धात्मना 'लः कर्तरि' इतिसूत्रेणासत्यपि कर्तुराख्यातवाच्यत्वे शक्यत एव पूर्वसूत्रैकरूप्येण स्वार्थो ज्ञापयितुम् 'कर्तरि ज्ञाप्ये लः साधुः' इति, घटाऽच्छिद्रत्वे ज्ञाप्येऽच्छिद्रोऽयमिति प्रयोज्यं जलाहरणसाधनमेष इति चेति वाक्यवत्। इत्थं च स्मृत्यार्थे ज्ञापिते लादेशानादेशकृतां कर्ता वाच्योऽवाच्यस्तु तिङामिति विवेको मानान्तरलभ्य इत्याशयः। यथाहुः—

वाच्यवाचकसंबन्धो नाचार्यैरुपदिश्यते।
अन्यथानुपपत्त्या हि व्यवहारात्स गम्यते॥ इति।

यद्वा भवतु वाच्यार्थकत्वं सप्तम्याः, न तावता लोकादौ प्रसिद्धाख्यातानां कर्तृवाचित्वसिद्धिरितिद्योतनाय हिशब्दः। संभवति हि 'वृद्धिरादैच्' इतिवत्कर्ता लकारवाच्य इति परिभाषाधचनम्। युक्ततरं चैतल्लादेशानामेव वाचकत्वं न

न्यायसहितान्वयव्यतिरेकगम्यत्वात्। भवतु वा स्मृतिगम्यः, तथापि नेयं स्मृतिः कर्तुराख्यातवाच्यत्वे प्रमाणम्, किंतु कर्तुरेकत्वे एकवचनात्मको लकारः, द्वित्वे द्विवचनात्मको बहुत्वे बहुवचनात्मक इत्यस्मिन्नर्थे प्रमाणम्, द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमित्यनेनास्याः स्मृतेरेकवाक्यत्वात्।

लकारस्येतिवदद्धिरभ्युपगन्तुम्। उपयुज्यते च देवदत्तः पचतीत्यादौ तृतीयाप्रतिबन्धो वस्तुतोऽनभिहितेऽपि पारिभाषिकमभिहितत्वमादाय तन्निवारणात्। यथाहुः—'शास्त्रेऽभिहितवदाश्रयणादनभिहिताधिकारविहिते विभक्ती न लप्स्येते' इति। नचैवं वाच्यावाच्यविवेकासिद्धिः, तस्य मानान्तरगम्यत्वादित्याशयः। तथापीति। इयमित्यनेन 'कर्तरि कृत्' इत्यन्या स्मृतिस्तु भवत्येव कर्तुर्वाच्यत्वे मानमिति सूच्यते। तेन वक्ष्यमाणरीत्या 'लः कर्तरि' इत्यनेन शतृशानजर्थकथनाभावेऽपि न दोषः, कृत्सूत्रेणैव तयोः कर्तृवाचित्वसिद्धेः। अभ्युपगतं चेत्थं कृत्सूत्रस्य द्व्येकादिसूत्रैकवाक्यत्वासंभवप्रदर्शनं वार्तिके 'कृदतिङ्' इतिसूत्रोदाहरणफलं वदता न्यायसुधाकृता। यदि न कर्तुर्वाच्यत्वे प्रमाणं तर्हि किं लोहितोष्णीषादिन्यायेन कृतिवाच्यत्वे प्रमाणमिति वदसीति पृच्छति—किंत्विति। द्व्येकादिसूत्रे संख्योपसर्जनत्वेनापेक्षितसंख्येयसमर्पणाभावे साकाङ्क्षत्वप्रसंगान्नैवमित्याशयेन प्रामाण्यविषयान्तरमाह—कर्तुरिति। उक्तेर्थे तात्पर्यग्राहकमाह—द्व्येकेति। अनेनेत्यनन्तरं सूत्रद्वयेनेति शेषः। अत्र हि द्व्येकादिशब्दा भावप्रधानतया संख्यापराः। अन्यथा द्व्येकेष्वित्यापत्तेः। बहुः समुद्रो बहुरोदन इत्यादौ प्रसिद्धवैपुल्यमहत्त्वात्मकबहुत्वपरिहारेण द्वित्वाधिकसंख्यात्मकबहुत्वे बहुवचनप्राप्त्यै परं बहुत्व इत्यस्य स्थाने बहुष्विति निर्दिदिक्षुस्तदैकरूप्याय द्व्येकयोरित्युक्तवान् सूत्रकारः। कस्य द्वित्वादावित्यपेक्षायां च लकारसूत्रैकवाक्यतया उक्तविधया कल्पनाद्भवति लकारसूत्रं संख्यावाच्यत्वग्राहकमित्यर्थः। नेदं पदैकवाक्यत्वमिति भ्रमितव्यम्। एतदेकवाक्यतोपन्यासावसरे वार्तिककृद्भिर्यावज्जीवमग्निहोत्रं जुहोति दीक्षितो न जुहोतीति उत्सर्गापवादयोर्वाक्यैकवाक्यताया दृष्टान्ततयोपन्यासात्। तद्व्याख्यानं कुर्वता च न्यायसुधाकारेण प्रकृते वाक्यैकवाक्यताया एव स्पष्टीकरणात्। एतैरपि केवललकारसूत्रं संख्यावाच्यत्वे मानमिति प्रतिज्ञाकरणात्। अतो लकारसूत्रे कर्त्रादिपदोत्तरविभक्त्या कर्त्रादिगतसंख्यासामान्यं लक्षयित्वा कर्त्रादौ तत्संख्यायां च लकारो विधीयते। तिबादिशत्रादीनां मध्ये कस्य लादेशस्य का० संख्या वाच्येत्यपेक्षायां साकाङ्क्षद्व्येकादिसूत्रेण वाक्यैकवाक्यत्वं

यत्तूक्तं कर्तुरनभिधाने देवदत्तेन पचतीति तृतीयाप्रसङ्ग इति तन्न। तृतीया हि कर्तुः प्रतिपत्त्यर्थं तद्गतसंख्याप्रतिपत्त्यर्थं वा। तत्र कर्ता तु भावनाक्षेपादेव लभ्यते इति न तत्र तृतीयापेक्षा। तत्सङ्ख्या तु आख्यातेनैव प्रतीयते इति न तत्राप्यपेक्षा। यथाहुः—

सङ्ख्यायां कारके वा धीर्विभक्त्या हि प्रवर्तते।
उभयं चात्र तत्सिद्धं भावनातिङ्विभक्तितः॥ इति।

यत्र तु नाख्यातेन तद्गता सङ्ख्योच्यते तत्र भवत्येव तृतीया। यथा देवदत्तेन ओदनः पच्यते इति। तस्मान्न कर्तुरनभिधाने

कल्प्यते। तेन च लकारे संख्यावाचित्वानुशासननेकवचनादिसंज्ञायोगितिबादिविषयमिति निर्णीते कर्त्रादिवाचित्वानुशासनांशस्यापि तद्विषयत्वे गौरवात् तादृशसंज्ञाहीनशत्रादिविषयत्वं तस्य भवति। ततश्च भावकर्मणोरपि शत्रादिर्लभ्यत इति क्रीयमाण 'इत्यादिप्रयोगोपपत्तिः। अन्यथा लकारसूत्रस्य संख्यावाचित्वमात्रपरत्वे कर्तरिकृदित्यनेन कर्तरि शत्रादिप्राप्तिसंभवेऽपि न भावकर्मणोस्तत्प्राप्तिः स्यात्। द्योतितं च लकारसूत्रस्य कर्तुराख्यातवाच्यत्वे प्रामाण्यप्रतिषेधोक्त्या शत्रादिवाच्यत्वे प्रामाण्यं तथापीति ग्रन्थे। नचैवमपि स्थानिवाचित्वमते कथमेकस्मिन्लकारे संख्यावाचित्वकर्तृवाँचित्वव्यवस्था स्यादिति शङ्क्यम्। पदोपस्थापितपदार्थेभ्य एव शब्दधीरिति नियमवदादेशविशेषेण स्थानितयोपस्थापितलकारादेवार्थविशेषधीरिति नियमसंभवात्। अतएव तिबादिस्मारितलकारस्यैकत्वादिवाचित्वेनैकवचनादिव्यपदेशसंभवाल्लकारस्य तत्तद्वचनात्मकत्वनिर्देशः सङ्गच्छते। शक्यते च वक्तुं 'तान्येकवचनद्विवचनबहुवचनान्येकशः' इति सूत्रमादेशेषु संज्ञा अन्वर्था विदधत्तत्स्थानिष्वपि ता एवाक्षिपतीति।

यत्त्विति। यद्यपि लकारसूत्रस्य 'लकारः कर्त्राद्यभिधायकः' इति परिभाषापरत्वेन व्याख्यायां नैतच्छङ्कावसरः, तथापीतरव्याख्ययोर्निर्दोषत्वसिद्ध्या एष उपन्यास इति बोध्यम्। नन्वनुशासनात् प्राप्नुवन्ती तृतीया न निष्प्रयोजनत्वेन निवारयितुं शक्या प्रथमाया अपि निवारणापत्तेः। प्रातिपदिकसाधुत्वार्थत्वस्य च प्रथमातृतीययोरविशेषादित्याशङ्क्यानभिहिताधिकारानुवृत्तस्यानभिहितपदस्य तात्पर्येण तिङाद्यप्रतिपादितत्वमर्थः। अनभिधानाख्यशब्दव्यापारवाचिनाभिदधातिना तदेकार्थसमवेततात्पर्याख्यशब्दव्यापारलक्षणोपपत्तेः। तच्च कर्त्रादेरेव विशेषणं न संख्यायाः। तेन देवदत्तः पचति पक्तेति वा चैत्रो मैत्रश्च गच्छत इत्यादिप्रयोगोपपत्तिरित्याशयेनोपसंहरति—तस्मादिति। यदि च

किंचिद्दूषणमित्यलमतिविस्तरेण । प्रकृतमनुसरामः । तस्मिंश्चतुर्विधः श्रुतिविनियोगः ।

सेयं श्रुतिर्लिङ्गादिभ्यः प्रबलं प्रमाणम् । लिङ्गादिषु हि न प्रत्यक्षो विनियोजकः शब्दोऽस्ति, किं तु कल्प्यः । यावच्च तैर्विनियोजकः शब्दः कल्प्यते तावत्प्रत्यक्षया श्रुत्या विनियोगस्य कृतत्वात्तेषां कल्पकत्वशक्तिर्विहन्यते इति श्रुतेः प्राबल्यम् ।

कर्ताऽऽख्यातवाच्यः स्यात् समिदादिषु संनिपातित्वलिप्सया कर्त्रर्थत्वेन विधिः स्यात् । भवत्विति चेत्स्थाणौ स्थाण्वाहुतिं जुहोतीति विहिताहुतिः कर्तुः संस्कारिकैव स्यान्न यूपस्य । यूपार्थत्वं हि तस्याः श्रुतिबलेनोक्तं दशमे । नापि दृष्टार्थत्वलिप्सया, किन्तु संनिपातित्वलिप्सयोक्तम् । वक्ष्यते चैतत् । तुल्यं च संनिपातित्वं यूपार्थत्वकर्त्रर्थत्वयोः । इयांस्तु कर्तरि यूपाद्विशेषो यदयं जुहोतीत्यभिहितः क्रियया च साक्षात्सम्बद्धः । नचास्तु यूपार्थत्वसिद्धान्तभङ्ग इति शङ्क्यम् । अतस्त्वं देव वनस्पते शतवल्शो विरोहेत्याहुतिमन्त्रे देवादिपदाभिहितयूपगतातिशयप्रकाशनानुपपत्तेः । नच तव तद्वशेनैव यूपार्थत्वसिद्धिः । न्यायविरुद्धमन्त्रलिङ्गस्याकिञ्चित्करत्वात् । किंचोपांशुयाजस्य वाक्यान्तरेण यागान्तरसाधारणेन सिध्यतः फलसंबन्धादन्तरा यजतीति स्वपदोपस्थितकर्तृसंबन्धः शीघ्रं भवतीति समिदादिवत्कर्त्रर्थत्वमेव स्यात् । अवगतं च यजमान आज्यमवेक्षत इति कर्तुः प्रयोजनवत्त्वम् । आग्नेयादिवाक्येषु तु संस्कारार्हकर्त्रभिधाव्याख्याताभावात् तेषां प्रधानवाक्येन फलसंबन्धः । भवत्वेवमिति चेत् समिदादिवदुपांशुयाजस्य वैश्वदेवपर्वण्यतिदेशे सति त्रिंशदाहुतिश्रुत्यनुपपत्तेः । हृदयमुपांशुयाज इति प्रधानप्रायपाठानुपपत्तेश्च । किं च स्तोत्रशस्त्रादीनामपि यजमानसंस्कारकत्वे यजमानेन कर्तव्यतापद्येत, तत्रौद्गात्रसमाख्याबाधः स्यात् । सत्रे च प्रतियजमानं शस्त्रावृत्तौ नाध्वर्योः प्रतिगरावसर इति तद्बाधः स्यात् । नच सिद्धान्तेऽपि कर्तुर्लक्षणयाक्षेपेण चोपस्थित्यवश्यंभावात् प्रयाजादेः संनिपातित्वप्रसक्त्योक्तदोषतादवस्थ्यमिति शङ्कास्पदम् । अङ्गभावनानां प्रधानकर्त्रैव नैराकाङ्क्ष्यसंभवेन प्रधानकर्तृसंख्याया एव चाङ्गवाक्येष्वनुवाद्यत्वेन तत्र कर्तुराक्षेपलक्षणयोरनभ्युपगमादित्येवं सुधीभिरूह्यमित्याशयेनाह—इत्यलमिति ।

विनैव शब्दकल्पनं लिङ्गादेर्विनियोजकत्वमस्त्विति शङ्कते—किन्त्विति । चोदनैव धर्मेप्रमाणमित्यवधारणाल्लिङ्गेन तत्कल्पनमावश्यकम् । प्रयोगविधिनाङ्गान्तरवन्मन्त्रमनुष्ठापयितुं प्रवृत्तेन मन्त्रस्य स्ववाक्यार्थे प्रवेशमिच्छता तत्सि-

अत एव ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र यावल्लिङ्गादैन्द्र्या इन्द्रोपस्थानाङ्गत्वं कल्प्यते तावत् प्रत्यक्षया श्रुत्या गार्हपत्योपस्थानाङ्गत्वं क्रियत इति ऐन्द्री गार्हपत्योपस्थानाङ्गम्।

द्धयैतत्कल्पनाक्षेपाल्लवनं केन स्मृत्वा कार्यमित्येवंरूपायाः शेषविध्याकाङ्क्षायास्तामन्तरेणाप्युपशमाच्च भाट्टमते विशेषत इत्याशयेनाह—कल्प्यत इति। ननु श्रुतेरप्यसमर्थविनियोजकत्वासम्भवेन सामर्थ्यकल्पकत्वात् कथं प्राबल्यमिति शङ्क्यम्। सत्यम्। तथापि—

लिङ्गज्ञानं पुरोधाय न श्रुतेर्विनियोक्तृता।
श्रुतिज्ञानं पुरोधाय लिङ्गं तु विनियोजकम्।

इति विनियोगे संनिकर्षाच्छ्रुतिप्राबल्यमित्याशयेनाह—तावदिति। मन्त्रादेराकाङ्क्षोच्छेदात् कल्पकत्वशक्तिविघातः।

अतएवेति। नचैन्द्री गार्हपत्याङ्गमितिबोधस्य पदान्तरालोचनलभ्यत्वाद्वाक्येनैव विनियोग इति शङ्क्यम्। अङ्गाङ्गिभावनिरूपकयोः पदान्तराधीनत्वेऽपि तत्स्वरूपस्य श्रुतिगम्यत्वात्। नन्वेवं श्रौतस्याङ्गाङ्गिभावस्य लैङ्गिकनिरूपकान्वयेप्यविरोधान्न श्रुतिलिङ्गयोर्विरोधः। स्यादेवं यदि प्रमेयविरोधनिबन्धनाधिह मानयोर्बाधविरोधौ स्याताम्। दुर्बलमानजन्यविनियोगमूलकल्पनोच्छेदनिमित्तौ तु तौ। जायते चावगतसामान्यसंबन्धयैन्द्र्या किं कार्यमित्याकाङ्क्षाबलेन लैङ्गिकश्रुतिकल्पनायोद्यतस्य ब्राह्मणान्तर्गतमैन्द्र्येत्येव प्रथमं श्रुतवत एतन्मूलकविनियोगेनैव नैराकाङ्क्ष्यसंभवान्न स्वबुद्ध्या कल्पनमुचितमिति बुद्ध्या तत्कल्पनादुपरमः। तस्मादुपपन्नः श्रुतिलिङ्गयोरिह विरोधः।

श्रुत्या लिङ्गबाधं वदता च लिङ्गबाध्यानां वाक्यादीनां सुतरां तया बाध इति सूचितम्। तद्यथा आरुण्यस्य वाक्यादेकहायन्यङ्गत्वं सिद्धयच्छ्रौतेन क्रयाङ्गत्वेन बाध्यते। एकविंशतिमनुब्रूयादिति विहितानुवचनस्य प्राकरणिकदर्शाङ्गत्वं प्रतिष्ठाकामस्येति षष्ठीश्रुतिबोधितेन प्रतिष्ठार्थत्वेन। नच प्रकृतनित्यानुवचनाश्रितसंख्याया एवेह फले विधानं तस्याश्चाक्रियारूपत्वान्न प्रकरणविनियोज्यत्वप्रसक्तिरिति शङ्क्यम्। सामिधेनीवदग्निप्रकाशनार्थैर्देवेद्धइत्यादिनिविन्मन्त्रैर्व्यवधानेन विच्छिन्नप्रकरणस्य नित्यानुवचनस्याश्रयत्वायोगेन तत्प्रकृतिकानुवचनान्तरविधेराश्रयणात्। 'युवं हि स्थः स्वर्पती' इति द्वयोर्यजमानयोः प्रतिपदं कुर्यादित्यत्र श्रुतिप्रतिपन्नकुलायाद्यङ्गत्वेन प्रकरणप्राप्तं ज्योतिष्टोमाङ्गत्वं

सामर्थ्यं लिङ्गम्। यदाहुः—

'सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते' इति।

तेनाङ्गत्वं, यथा 'बर्हिर्देवसदनं दामि' इत्यस्य लवनाङ्गत्वम्। स हि लवनं प्रकाशयितुं समर्थः। तच्च लिङ्गं द्विविधम्। सामान्यसंब-

---

बाध्यते। एकः प्रतिवसन्तं यथाशक्ति ज्योतिष्टोमं कुर्यादितियजमानैकत्वव्यतिरिक्ताङ्गेष्वेव यथाशक्त्युपबन्धेन नित्यप्रयोगेऽपि तद्वित्वाभावात्। द्वादशाहीनस्येत्यत्र तु यद्यपि क्रियाङ्गसंख्यायाः ज्योतिष्टोमप्रकरणग्राह्यत्वं प्रसक्तं मध्योद्धृत्तत्वेन खप्रत्ययान्तादहर्गणे रूढादहीनपदादुत्तरया षष्ठीश्रुत्या बाध्यत इति शक्यते वक्तुं तथापि शाखान्तरीयद्वादशाहप्रकरणस्थविधिप्राप्तार्थानुवादेन 'तिस्रः साह्नस्योपसदः' इत्येतत्स्तुतिरेपेति मते नातीव श्रुत्या प्रकरणबाधोदाहरणत्वं युक्तम्। दर्भमयीत्वादिविशिष्टरशनायाः क्रमेणाग्निषोमीयाङ्गत्वं प्राप्नुवदीक्षाकालोत्पन्नत्वेन पशुत्रयसाधारणयूपार्थत्वं बोधयन्त्या श्रुत्या बाध्यते—रशनया यूपं परिव्ययतीति। यथाहुः—

एतद्यूपपरिव्याणशेषो हि रशना श्रुता।
सहधर्मैर्न सा याति क्रमेण पशुशेषताम्॥

एति सर्वत्र गच्छतीति साधारणार्थ एतच्छब्दः। अदृष्टैकस्वभावयूपमते हि वाङ्नियमन्यायेन साधारणतत्प्रयुक्ता रशना तद्धर्मा भवन्ति साधारणाः। मतान्तरे त्वश्ववालादिधर्मविधौ बर्हिःपदेनेव यूपपदेन स्वार्थसाध्यापूर्वत्रयलक्षणात् साधारण्यमिति बोध्यम्। एवं च यद्यपि यूपधर्माणां बर्हिर्धर्माणां चोपदेशसाधारण्यं तुल्यं तथापि पश्वपूर्वैस्तन्त्रेण काष्ठमनुष्ठापयद्भिस्तद्द्वारेण तद्धर्मा अपि तथैवानुष्ठापयितुमुचिता इति तेष्वेकादशे तन्त्रव्यवहारः। उपसदग्नीषोमीयापूर्वैस्तु वचनादातिथ्याकालोत्पाद्यबर्हिर्व्यक्तिशेषितां गतैरपि तुषोपवापवत्तामनुष्ठापयद्भिस्तद्वत्तद्धर्मा अपि नानुष्ठाप्यन्त इति तेषु द्वादशे प्रसङ्गव्यवहारः। तादृशव्यक्तिनाशे परं स्वपरसाधारणव्यक्त्यन्तरं प्रयोक्तमशक्तैरपि यथातिदेशं प्रत्येकं बर्हिः प्रयुञ्जद्भिरविशेषावगतशेषत्वाद्धर्मास्तत्र शक्यन्ते प्रयोक्तुमिति साधारणबर्हिषि चातुर्थिकमप्रयोजकत्वम्, धर्मेषु द्वादशोक्तं प्रसङ्गित्वमिति विवेकः। प्रयुक्तिसामर्थ्याभावकृतमेव ह्यप्रयोजकप्रसङ्गिनोर्भेदमभिप्रेत्योक्तं पूर्वाचार्यैः 'परार्थे त्वप्रयोजकम्। एवमेव प्रसङ्गः स्याद्विद्यमाने स्वके विधौ' इति। दर्शपूर्णमासप्रकरणे प्रथमपठितस्य क्रियाविशेषशून्यत्वेनास्पष्टलिङ्गतया स्वतन्त्रक्रमप्रकरणानिर्णीतविनियोगस्य मन्त्रस्य तत्सहकृतसमाख्याबलेन दार्शिकप्र-

न्धबोधकप्रमाणान्तरानपेक्षं तदपेक्षं च । तत्र यदन्तरेण यन्न संभवत्येव तस्य तदङ्गत्वं तदनपेक्षं केवललिङ्गादेव । यथाऽर्थज्ञानस्य कर्मानुष्ठानाङ्गत्वम् । न हि अर्थज्ञानमन्तरेणानुष्ठानं संभवति ।

यदन्तरेण यत्संभवति तस्य तदर्थत्वं तदपेक्षम्, यथोक्तस्य मन्त्रस्य लवनाङ्गत्वम् । लवनं हि मन्त्रं विनापि उपायान्तरेण स्मृत्वा कर्तुं शक्यम् । अतो न मन्त्रो लवनस्वरूपार्थः संभवति, किंत्वपूर्वसाधनीभूतलवनप्रकाशनार्थः । तत्त्वं च न सामर्थ्यमात्रादवगम्यते, लवनप्रकाशनमात्रे सामर्थ्यात् । अतोऽवश्यं प्रकरणादि सामान्यसंबन्धबोधकं स्वीकार्यम् । दर्शपूर्णमासप्रकरणे हि मन्त्रस्य पाठादेवमवगम्यते अनेन मन्त्रेण दर्शपूर्णमासापूर्वसंबन्धि किंचित् प्रकाश्यते इति । अन्यथा प्रकरणपाठवैयर्थ्यप्रसङ्गात् । किं तदपूर्वसंबन्धि प्रकाश्यमित्यपेक्षायां सामर्थ्याद्बर्हिर्लवनमित्यवगम्यते । तद्धि बर्हिः संस्कारद्वारापूर्वसंबन्धीति मन्त्रस्य सामर्थ्यात्तदर्थत्वे सति नानर्थक्यं प्रसज्यते । तस्माद्बर्हिर्देवसदनं दामीत्यस्य प्रकरणाद्दर्शपूर्णमाससंबन्धितयावगतस्य सामर्थ्याल्लवनाङ्गत्वमिति सिद्धम् ।

पूषानुमन्त्रणमन्त्राणां तु यागानुमन्त्रणसमाख्यया यागसामान्यसंबन्धेऽवगते सामर्थ्यात्पूषयागसंबन्धोऽवगम्यते ।

ननु तेषां यावत्समाख्यया पूषयागेन सामान्यसंबन्धोऽवगम्यते, तावत् प्रकरणाद्दर्शपूर्णमासाभ्यामेव सामान्यसंबन्धोऽवगतः, समाख्यातस्तस्य बलीयस्त्वात् । अत एव पौरोडाशिकमिति समाख्याते ब्राह्मणे आम्नातानामपि प्रयाजानां प्रकरणात्सान्नाय्योपांशुयागाङ्गत्व-

---

थमपुरोडाशयागाङ्गत्वं प्राप्नुवत् सान्नाय्याङ्गशाखार्थत्वं बोधयन्त्या श्रुत्या बाध्यते, इषेत्वेति शाखां छिनत्तीत्रि । अत्र च यद्यपीतेरितिहेतुप्रकरणप्रकर्षादिसमाप्तिष्वित्यादिकोशे तृतीयार्थवाचित्वास्मरणान्न श्रुतित्वम्, निराकृतं च तद्धविष्कृदेहीतित्रिरवघ्रन्निति वचसि मन्त्रस्य श्रौत्रहन्त्यंगत्वधियं निराकुर्वद्भिः प्राचीनैः, तथापि द्वितीययैव समाख्याबाधोपपत्तिः ।

तच्चेति । यद्यपि श्रुतिरपि काचित्सामान्यसंबन्धबोधकं मानान्तरमपेक्षते, अत एवाग्नेय्यधिकरणे प्रकृताग्नेय्येवाग्नेय्याग्नीध्रमुपतिष्ठत इत्यत्र श्रुत्या विनियुज्यत इत्युक्तम् । तथापि तत्सापेक्षत्वाभिमतलिङ्गस्येव तस्या अपि न तदन्तरेण विनियोगशक्तिकुण्ठीभाव इत्यत्रेत्थमुक्तिः ।

मपीत्युक्तम् । किं च यागानुमन्त्रणसमाख्ययापि न पूषयागेन सामान्यसंबन्धोऽवगम्यते । किं तु यागमात्रेण, प्रकरणेन तु दर्शपूर्णमासाभ्यामेव विशेषसंबन्धोऽवगम्यते । अतः प्रकरणाज्झटिति तत्संबन्धस्यैवावगतत्वात्तदर्थत्वमेव तेषां युक्तम् । पूषेतिशब्दस्य पुष्णातीति व्युत्पत्त्या कथंचिदश्याद्यभिधायित्वात् ।

मैवम् । पूषानुमन्त्रणमन्त्रे हि श्रूयमाणे एवमवगम्यते—पूषाभिधानसमर्थत्वादयं मन्त्रस्तत्प्रकाशनार्थ इति लवनमन्त्र इव लवनप्रकाशनार्थः । न तत्र प्रकरणाद्यपेक्षा, येन तेषामुपजीव्यत्वेन प्राबल्यं स्यात् । प्रकरणात्तु दर्शपूर्णमासार्थत्वे तस्य वाक्यलिङ्गश्रुतिकल्पनेन विनियोजकत्वात् लिङ्गस्योपजीव्यत्वेन प्राबल्यम् । अतो लिङ्गात्पूषप्रकाशनार्थत्वेऽवगते तन्मात्रप्रकाशनमनर्थकमित्यपूर्वसाधनपूषप्रकाशनार्थत्वं वक्तव्यम् ।

किं तदपूर्वमित्यपेक्षायां यागानुमन्त्रणसमाख्यानुगृहीतालिङ्गात्पूषयागापूर्वसंबन्धिदेवताप्रकाशनार्थोऽयमित्यवगम्यते । अतो यद्यपि समाख्यातः प्रकरणं बलीयस्तथाऽपि तस्य लिङ्गेन बाधितत्वात् समाख्याया दुर्बलाया अपि प्रबललिङ्गाश्रितत्वेन प्राबल्यात्सैव सामान्यसंबन्धे प्रमाणं संभवति, दुर्बलस्यापि प्रबलाश्रितस्य प्राबल्यात् ।

अत एव श्रुत्यपेक्षया दुर्बलाया अपि स्मृतेराचमनरूपप्रबलपदार्थाश्रितत्वेन प्राबल्यात्पदार्थधर्मगुणभूतश्रौतक्रमत्यागेन वेदकरणानन्तरं क्षुते आचमनमेव कार्यमित्युक्तम् । यथाहुः—

प्रकरणादन्यस्यापि लिङ्गापेक्षितसामान्यसंबन्धबोधकत्वं दर्शयितुमाह—पूषेति । पूषानुमन्त्रणप्रभृतयो मन्त्रा इति मध्यमपदलोपी समासः । उक्तं वार्तिक इति शेषः । ननु न दर्शपूर्णमासार्थत्वं युक्तं पूषपदस्य तद्देवताप्रकाशनासामर्थ्यादित्याशङ्क्य तद्धटयति—पूषेतीति । गौण्यापि तत्संभवाय कथंचिदिति ।

लिङ्गप्रकरणयोः स्वतो विरोधे तद्गतबलावलमेव लिङ्गसहकारिसमाख्यायाः प्रकरणेन बलाबलाज्याय इत्यत्र प्रमाणबलाबलात् प्रमेयबलाबलज्यायस्त्वं दृष्टान्तयति—अतइति । यद्यपि सकलपदार्थप्राप्त्यनुसारित्वात् क्रमप्राप्तेराचमनस्य च शुद्धिहेतुत्वेन वेदिकरणाङ्गस्य स्वाङ्गमव्यवधायकमिति न्यायेन क्रमावि-

अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः।
दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः॥ इति।

यत्तु पूषेति शब्दः कथंचिदभ्याद्यभिधायीति तन्न। तस्यादन्तको हि स इत्यादिवाक्यशेषेण वैदिकप्रसिद्ध्या च अर्थविशेषे रूढत्वात्। रूढेश्चावयवार्थालोचनसव्यपेक्षाद्योगाद्बलीयस्त्वात्। अत एव वर्णासु रथकारोऽग्नीनादधीतेत्यत्र रथकारशब्देन सौधन्वनापरपर्यायो वर्णविशेष उच्यते, रूढेः प्राबल्यात्, न तु रथं करोतीति व्युत्पत्त्या द्विजातयः, योगस्य दौर्बल्यादित्युक्तं पृष्टे।

तस्माद्युक्तं समाख्यया सामान्यसंबन्धेऽवगते सामर्थ्यात्पूषयागसंबन्धः पूषानुमन्त्रणमन्त्राणामिति। यथाहुः—

यागानुमन्त्रणानीति समाख्या क्रतुयोजिका।
तस्माच्छक्त्यनुरोधेन प्राप्तिस्तद्देवते क्रतौ॥ इति।

तत्सिद्धं प्रमाणान्तरसिद्धसामान्यसंबन्धस्य पदार्थस्य विनियोजकं लिङ्गमिति।

घातकत्वान्न श्रुतिस्मृत्योरिह विरोधः, तथापि तमभ्युपेत्याकरे निरूपितन्यायस्यायमुपन्यासः।

वर्णविशेष इति। व्रात्याद्वैश्याख्यवर्णादुत्पन्नः पुंविशेष इत्यर्थः। ननु 'माहिष्येण करण्यां तु रथकारः प्रजायते' इति स्मृतिप्रसिद्धस्यैव रूढ्या ग्रहणं युक्तम्, 'क्षत्रियवैश्यानुलोमानन्तरोत्पन्नो यो रथकारस्तस्येज्याधानोपनयनसंस्कारक्रियाश्च' इति शंखेन विहितोपनयनस्य तस्य विद्यासंभवात्। तद्वशेनैव वैदिककर्माधिकारितयाऽपरार्काद्युक्तस्य संस्कृताग्निसाफल्यसंभवाच्च। शूद्रादौ हि तत्कर्तृकेऽग्निसाध्यकर्मणि मस्तु शूद्रस्येत्यादिलिङ्गोपपत्तेश्चेति कर्कविद्यारण्यमंतानुसरिनिराकरणाय सौधन्वनेति। रथकाराधाने हि ऋभूणांत्वेतिमन्त्रः पठ्यते। सौधन्वना ऋभव इति मन्त्रे च सामानाधिकरण्याद्बभुसौधन्वनशब्दयोः पर्यायत्वम्। प्रसिद्धश्च सौधन्वनशब्दो व्रात्यवैश्योत्पन्ने। 'व्रात्यात्तु जायते वैश्यात् सुधन्वाचार्य एव च' इति स्मृतेः। अतः षष्ठान्त्यन्यायेन तदधिकारनियमे सिद्धेऽगत्याग्निगुणकाधानस्य स्वर्गाय विधिराश्रीयत इति भावः। वस्तुतस्तु नानुलोमसङ्करोत्पन्ने रूढिः। 'रथसूत्रवास्तुविद्याध्ययनवृत्तिता च' इति शंखवचनावगतरथकरणवृत्तिके संभवद्योगवृत्तिकस्य निर्मथ्यन्यायेन रूढ्यसंभवात्। प्रमाणेति। विनियोजकलिङ्गव्यक्तिभिन्नं मानं प्रमाणान्तरं, भवति हि 'एक-

तत्र मन्त्रविनियोजकं लिङ्गं मुख्ये एवार्थे विनियोजकं न गौणे। मुख्यार्थस्य प्रथममुपस्थितत्वेन तत्रैव विनियोगबुद्धौ पर्यवसन्नायां पुनर्गौणेऽर्थे विनियोगकल्पनायां गौरवप्रसङ्गात्। अत एव बर्हिर्देवसदनं दामीति मन्त्रः सामर्थ्यात्कुशलवनाङ्गम्, तेषां मुख्यत्वात्, न उलपराजिलवनाङ्गमित्युक्तम्।

तदिदं लिङ्गं वाक्यादिभ्यो बलवत्। तेषां हि न साक्षाद्विनियोजकत्वं किं तु लिङ्गं श्रुतिं च कल्पयित्वा। न चासमर्थस्य 'श्रुतिं कल्पयित्वा विनियोगकल्पना संभवतीति सामर्थ्यस्यापि कल्प्यत्वेनोपजीव्यत्वात्। अतस्तैर्यावत्सामर्थ्यं कल्पयित्वा श्रुतिः कल्प्यते

विंशतिमनुब्रूयात्' इति विवृद्धसामिधेनीकविकृतौ संख्यासामर्थ्येन चोदकप्राप्ताधिकषड्वां क्रतुसंबन्धेऽवगतेऽग्निप्रकाशनसामर्थ्यवशेन तद्विशेषग्रहणम्। इयांस्तु भेदः—प्रकरणसमाख्याभ्यामुक्तस्थलेऽनिर्णीतद्वारविशेषो निर्णीतक्रतुविशेषश्च संबन्धो बोध्यते। संख्यासामर्थ्येन तु अनिर्णीतशेषविशेषः। उलपमुशीरतृणं पृष्ठ्यास्तरणाङ्गम्।

असमर्थस्येति। प्रकृतशेषिसंबन्धयोग्यतयाऽनिर्णीतस्येत्यर्थः। वाक्यबाध्येषु प्रकरणस्य लिङ्गेन बाधायामुदाहरणत्वं पूषमन्त्रे एतैरेव दर्शितम्। उपहूतउपह्वयस्वेतिक्रमेण पठितयोर्मन्त्रयोर्निर्ज्ञातक्रमकानुज्ञापनानुज्ञे प्रति यथाक्रमं प्रसक्तमङ्गत्वं विपर्ययविनियोगं कुर्वता लिङ्गेन बाध्यते। नन्वेवं 'त्वं ह्यग्ने प्रथमो मनोता' इति मन्त्रः क्रमप्राप्तमग्नीषोमीयपश्वङ्गत्वं विहाय लिङ्गादाग्नेयसवनीयाङ्गं स्यात्। आनर्थक्यतदङ्गन्यायसहकृतप्रकरणेन ज्योतिष्टोमीयपश्वङ्गमेष इति सामान्यसंबन्धसंभवात्। 'मनोतायै हविषोऽवदीयमानस्यानुब्रूहि' इति प्रैषे पशुदेवतावाचित्वेन निर्णीतस्य मनोतापदस्येह श्रवणेन सोमयागाङ्गत्वासंभवात्। नच यद्यप्यन्यदेवत्यः पशुराग्नेय्येव मनोता कार्येतिश्रुतिर्लिङ्गप्राप्तोत्कर्षं बाधत इति शङ्क्यम्। तृतीयादिविभक्तेरिहाभावात्। वाक्यस्य च लिङ्गबाधकत्वात्। वायव्ये पशावनूहनिषेधार्थत्वेनानर्थक्यायोगात्। अन्यथानाग्नेयीनिरासार्थस्याग्नेय्येवेत्येवकारस्यानर्थक्यात्। नर्चमूहेदितिनिषेधवशेन चोदकप्राप्ताग्नेयमन्त्रस्थानेऽनाग्नेयमन्त्रप्रसक्तिरूपस्योहस्य निषेधे तु संभवति तस्यार्थवत्त्वं तस्मादुत्कर्ष एव मनोतामन्त्रस्य युक्त इति चेन्न। कार्येवेति व्यवहितान्वये सत्येवकारश्रुत्यैवोत्कर्षनिषेधात्।

---

१ 'लिंगबाध्यत्वात्' इति पाठः।

तावदेव क्लृप्तेन सामर्थ्येन श्रुतिं कल्पयित्वा विनियोगः क्रियते इति तस्य प्राबल्यम्।

अत एव 'स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि' इत्यस्य सदनाङ्गत्वं लिङ्गात्, न तु वाक्यात्सादनाङ्गत्वम्, तस्य दौर्बल्यादिति।

तृतीयाश्रुतिर्हि प्रकृतयागे विनियोगमुखेनोत्कर्षनिषेधं कुर्यात्। इयं तूत्कर्षनिषेधमुखेन प्रकृते विनियोगं करोतीति फलतो न विशेषः। युक्तरश्च मन्त्रब्राह्मणयोर्व्यवहितप्रधानविध्यन्वयादेवकारमात्रस्य स्ववाक्ये व्यवहितान्वयः। नन्वेवं वायव्ये पशौ कथमनूहो मनोतामन्त्रस्य। उक्तश्चासौ 'मनोतायां तु वचनादविकारः' इति दाशमिकाधिकरणे। नचान्यायनिगदत्वात् बहुवचनान्तपाशपदवदनूहसिद्धिरिति न्यायसुधोक्तं साधु। देवतात्वाधिष्ठानस्याग्नेः पाशबहुत्ववदसमवेतत्वाभावात्। नच पाशानिति शसाऽवयवसंख्याया इवाग्निपदेन देवताया लक्षणयैव प्राकृतया प्रकाशनं स्याद्विकृतावित्याकृतम्। एवमपि यत्रेन्द्राग्नादौ प्रकृतिवद्देवतात्वाधिष्ठानमग्निस्तत्र प्राकृतलक्षणासंभवात्सिध्येदनूहो नैवारतन्दुलेष्विव धान्यमसीत्यस्य। वायव्ये तु तरसमयेष्विव न तथेतिचेत्। न। आग्नेयः पशुर्न ज्योतिष्टोम इति कृत्वार्चितात्वाद्दाशमिकविचारस्य। उक्तं च तथा तत्रैव मिश्रैः—संभवति तथा सत्यप्रसक्तोत्कर्षे निषेधासंभवेनोक्तवचसोऽनूहपरत्वमिति दिक्।

भक्षानुवाके पठितानां भक्षोहीति नृचक्षसमिति हिन्वमेइत्युपक्रमकाणां सध्यासमित्यवख्येषमिति मामेवाङ्नाभिमतिगा इत्यन्तानां वाक्यानां समाख्याप्राप्तं भक्षणाङ्गत्वं लिङ्गावगतैर्ग्रहणावेक्षणसम्यग्जरणाङ्गत्वैर्बाध्यते। नचाविहितग्रहणादेरननुष्ठेयत्वान्मन्त्रप्रकाशत्वासंभवः। भक्षणविध्याक्षिप्ततयानुष्ठेयत्वात्। तत्प्रकाशनसमर्थमन्त्रकल्पितविधिना वा नियमेन तद्विधानात्। नचैवं मन्द्रादेस्तृप्यंत्वित्यन्तस्य लिङ्गात्तृत्यङ्गत्वं स्यान्न भक्षणाङ्गत्वमिति शङ्क्यम्। ग्रहणादिवत्तस्यैर्भक्षणयत्नान्यथत्नापेक्षोत्पत्तिकत्वाभावेन पृथक्प्रकाशनानपेक्षत्वात्। तस्माद्युक्तः सूक्तवाकस्य दर्शपूर्णमासयोरिव भक्षानुवाकस्य ग्रहणादिषु लिङ्गाद्विभज्य विनियोगः। एवं काम्ययाज्यानुवाक्याकाण्डे आग्नेवारुणीष्टियाज्यानुवाक्यानन्तरं सोमारौद्रीष्टियाज्यानुवाक्यातः पूर्वं पठितानां मनोर्ऋचां क्रमावगतसोमारौद्रयङ्गत्वानां समाख्याप्राप्तं याज्यात्वादि लैंगिकेन सामिधेनीत्वेन बाध्यते। आग्नेय्यो हि ताः शक्नुवन्ति सामिधेनीकार्यं कर्तुम्। अपेक्ष्यन्ते च

समभिव्याहारो वाक्यम्। समभिव्याहारो नाम साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चारणम्। यथा 'यस्य पर्णमयीजुहूर्भवति न स पापश्लोकंशृणोति' इति। अत्र हि न द्वितीयादिविभक्तिः श्रूयते, केवलं पर्णताजुह्वोः समभिव्याहारमात्रम्। तस्मादेव च पर्णताया जुह्वङ्गत्वम्।

न चानर्थक्यम्, जुहूशब्देनापूर्वलक्षणात्। तदयं वाक्यार्थः—पर्णतया अवत्तहविर्धारणद्वारा यदपूर्वसाधनं तद्भावयेदिति। एवं च पर्णतया यदि जुहूः क्रियते तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यते इति न पर्णताया वैयर्थ्यम्। अवत्तहविर्द्धारणद्वारेति चावश्यं वक्तव्यम्, अन्यथा स्रुवादिष्वपि पर्णतापत्तेः।

सा चेयं पर्णताऽनारभ्याधीता न सर्वक्रतुषु गच्छति, विकृतिषु चोदकेनापि प्राप्तिसंभवेन द्विरुक्तत्वापत्तेः। किंतु प्रकृतिषु। तदुक्तम्—

'प्रकृतौ वाऽद्विरुक्तत्वात्' इति।

अत्र विकृतिर्यतोऽङ्गानि गृह्णाति सा प्रकृतिरिति न प्रकृतिशब्देन विवक्षितम्, गृहमेधीये पर्णताया अप्राप्तिप्रसङ्गात्, न हि गृहमेधीयात्काचन विकृतिरङ्गानि गृह्णाति, मानाभावात्, किं तु चोदकाद्यत्राङ्गाप्राप्तिस्तत्कर्म प्रकृतिशब्देन विवक्षितम्। यथा दर्शपूर्णमासौ। तत्र हि न चोदकादङ्गप्राप्तिः, प्रकरणपठितैरेवाङ्गैर्नैराकाङ्क्ष्यात्। गृहमेधीयादिष्वपि न चोदकादङ्गप्राप्तिः। क्लृप्तोपकारैरेव आज्यभागादिभिर्नैराकाङ्क्ष्यात्।

विवृद्धसामिधेनीकाभिरिष्टिभिस्तत्कारितयेति न सामिधेन्युत्तरभाव्याज्यभागे निवेशोऽपि शङ्क्यः। तत्र तत्र निवेशेऽपि समाख्योपपत्तिः। तस्याः काम्यपदाभिधेयप्रधानसंबन्धबोधकत्वादित्यास्तां तावत्।

साध्यत्वादीति। स्वप्रकृत्यर्थनिरूपितशेषत्वबोधिकानां विभक्तीनां शेषिपदोत्तरत्वेन स्वप्रकृत्यर्थगतशेषत्वबोधिकानां च शेषपदोत्तरत्वेनाभावे सतीत्यर्थः। तेन प्रयाजशेषाभिधारणसक्त्वादिविनियोजकवाक्यसंग्रहः। शेषेति। तद्वाचिनोः शब्दयोरेकान्वयबोधोपयोगिसंनिधिविशेषेणोच्चारणमित्यर्थः। तेन न प्रकरणविषयेऽतिप्रसङ्गः। नचैवं देवस्यत्वादिपदविनियोजकमन्त्रगतवाक्यस्यासंग्रहापत्तिस्तेषां शेषवाचित्वाभावादिति शङ्क्यम्। तदर्थानामपि मन्त्रकार्यभूतविशिष्ट-

अतो यत्र चोदकाप्रवृत्तिस्तत्रानारभ्याधीतानां संनिवेशः। साप्तदश्यं त्वनारभ्याधीतमपि न प्रकृतौ गच्छति प्रकृतेः पाञ्चदश्यावरोधात्। किं तु विकृतिषु गच्छति। तत्रापि न सर्वासु गच्छति,

---

निर्वापप्रकाशनद्वारेण निर्वापशेषत्वाभ्युपगमात्। इयांस्तु विधिवाक्यान्मन्त्रवाक्ये भेदः—यद्विधिवाक्ये श्रुतिमात्रं कल्प्यं मन्त्रवाक्ये तु सश्रुतिकं वाक्यान्तरम्। मन्त्रे सत्या अपि द्वितीयादेर्विधिहीनाया विनियोजकत्वाभावात्। अतएव मन्त्रगतवाक्यलक्षणेऽभावान्तस्य न प्रवेशः।

अप्रवृत्तिरिति। नन्वो व्यत्ययमङ्गीकृत्याचोदकेन चोदकभिन्नमानेन यत्र क्रतुप्रवेशद्वारस्य जुह्वादेः प्रवृत्तिः प्राप्तिरिति योज्यम्। तेन न सोमे पर्णताप्रसक्तिः। भवति च गृहमेधीये। तत्र कल्पसूत्रकारैर्जुहूपदेशात्। अधीतानामित्यनन्तरं समभिव्याहृतोद्देश्यवशेन कल्प्यक्रतुसंबन्धानामिति शेषः। तेन यदाहवनीये जुहोत्येष सप्तदशो यज्ञोऽन्वायत्त इत्यनारभ्यविहितस्याहवनीयस्याश्रावयेत्यादेश्च समभिव्याहारमात्रेण कृप्तक्रतुसंबन्धस्य जुहोतियजतिचोदनाचोदितसमस्तकर्मसूपदेशसिद्धिः। असंभवात्परं क्वचिदाहवनीयोपदेशाभावः। यथा पवमानेष्टिषु, निषादेष्टौ, उपनयनाङ्गहोमेषु, अविकीर्णिपशौ, अक्रतुशेषेष्वतदन्तर्गतेषु च चतुर्होतृहोमेषु। भाष्यमतेऽग्नीषोमीयानपेक्षाग्नेयात्, वार्तिकमते प्रयाजानपेक्षात्तस्मात्परमापूर्वानुत्पत्तिवत्केवलाधानादाहवनीयासंभवात्। अत्रैवर्णिकस्याविद्यस्याकृतविवाहस्याधानाभावात्। अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेदिति पशोः प्राग्विवाहासंभवात्। एषा वाऽनाहिताग्नेरिष्टिर्यच्चतुर्होतार इति चतुर्होतृहोमेषु अनाहिताग्न्यधिकारिकत्वात्। ग्रहान् गृहीत्वा सप्तहोतारं जुहोति यः स्वर्गकामः स्यात् स पञ्चहोतारं पुरा प्रातरनुवाकादाग्नीध्रे जुहुयात्, इत्यादिषु च तदसंभवात्। क्वचित्तु संभवतोऽप्याहवनीयस्य बाधः—यथा पदहोमे। एवं महाग्नित्रयज्ञे आस्वधेत्याश्रावणाद्युपदेशादाश्रावयेत्यादेर्बाधो ज्ञेयः। प्रकृतेरिति। साप्तदश्यस्य हि सामिधेनीद्वारेण क्रतुसंबन्धः कल्प्यः। क्लृप्तश्च पाञ्चदश्यस्य प्रकरणेनेति तस्य बलवत्त्वमित्याशयः। यस्य त्वनारभ्याधीतस्यापि क्रतुसंबन्धः क्लृप्तः, न तस्य प्राकरणिकेन बाधः। यथा—'अथातोऽग्निमग्निष्टोमेनानुयजन्ति' इतिविहिताग्नेरुत्तरवेद्या। नचैवं वाक्यविनियुक्तेनाग्निना प्रकरणविनियोज्यायास्तस्या एव बाधापत्तिः। सत्यपि तस्याः प्रकरणविनियोज्यत्वे अग्निष्टोमपदार्थ-

---

१ इदं च पञ्चमस्य तृतीये तन्त्ररत्ने स्पष्टम्।

चोदकप्राप्तपाञ्चदृश्यबाधप्रसङ्गात् । किंतु प्रत्यक्षश्रुतसाम्नदृश्यासु मित्रविन्दादिषु गच्छति । यथाहुः—

एवं च प्रकृतावेतत्पाञ्चदृश्यं प्रतिष्ठितम् ।
विकृतौ च न यत्रास्ति साम्नदृश्यपुनःश्रुतिः ॥ इति ।

न च वाक्यवैयर्थ्यम् । अनारभ्याधीतस्यैव साम्नदृश्यस्य मित्रविन्दादिप्रकरणस्थेन वाक्येनोपसंहारात् । उपसंहारो नाम सामान्यप्राप्तस्य विशेषे नियमनम् । यथाहुः—

सामान्यविधिरस्पष्टः संह्रियेत विशेषतः । इति

तत्रानारभ्यविधिः सामान्यविधिः, मित्रविन्दादिप्रकरणस्थस्तु विशेषविधिरित्यास्तां तावत् । प्रकृतमनुसरामः । तत्सिद्धं वाक्यादङ्गत्वम् ।

महिम्ना धातोः क्रतुविशेषपरतां निर्णीय विनियुञ्जतो वाक्यस्य विलम्बितप्रवृत्तिकत्वात् । चोदकेति । पाञ्चदृश्येन बाध इति विग्रहः । बलीयो हि तत्कल्पोपकारकत्वादिति द्योतनाय चोदकप्राप्तेति विशेषणम् । सामान्येति । सामान्यशास्त्रस्य विशेषान्वये तात्पर्यज्ञापनमित्यर्थः ।

तत्रेति । यद्यप्युभयत्र सामिधेनीनामुद्देश्यत्वश्रवणं तुल्यं तथाप्यपूर्वसाधनलक्षणोत्तरमेष विभाग इति बोध्यम् । यद्यपि विधिवाक्यस्य विनियोजकतां निरूप्य तत्कृतप्रकरणबाधोदाहरणं दीर्घसौमे संतृद्याद्भृत्यै, न प्रथमयज्ञे प्रवृङ्क्ष्यात्, पूषा प्रपिष्टभाग इत्यादि वक्तुमुचितम् । आद्यवाक्यं हि न प्रकरणिनि ज्योतिष्टोमेऽभिषवफलकयोः सन्तर्दनं विधत्ते । इष्ट्यादिनिरूपितदैर्घ्यवतोऽपि सोमान्तरनिरूपितदैर्घ्यशून्यस्य तस्य तद्वदभिधायिदीर्घसोमपदेनालभिधानात् । नच दीर्घस्य यजमानस्य सोम इत्यर्थेऽयं समासः । निषादस्थपतिन्यायेन कर्मधारयस्यैव युक्तत्वात् । धृत्या इत्यर्थवादानुपपत्तेश्च । तस्मादुक्थ्यादिसंस्थास्वहर्गणेषु च तद्विधानम् । नच प्रकृतिवदुक्थ्यादिषु त्रिपर्वदशमुष्टिपरिमितसोमग्रहणान्न दीर्घसोमत्वमिति शङ्क्यम् । प्रदानविवृद्धिप्राकृतपरिमाणोभयानुरोधेन दीर्घपर्वण एव ग्रहणाश्रयणात् । नच प्रकरणात्संस्थास्वेव निवेशसंभवान्नाहर्गणेषु संतर्दनविधिः, तासां प्रकरणासंभवात् । यद्यपि पशुकाम उक्थ्यं गृह्णीयादित्यादिवचःसूक्थ्यादिसंज्ञाभिहितास्तत्तत्स्तोत्रसंबन्धोपरमात्मिकाः संस्थाः फलेभ्यो विहिताः । संस्थाभिधायित्वं च तासां तत्संस्थे क्रतावुक्थ्योऽयमिति प्रयोगादतत्संस्थे तत्स्तोत्रतद्यागाभ्यासवत्यपि षोडशिसंस्थे तथाऽप्रयोगात्, तथापि क्रत्वाश्रितानां

तदिदं वाक्यं प्रकरणाद्बलीयः। प्रकरणं हि न साक्षाद्विनियोजकम्, तद्ध्याकांक्षारूपम्। न चाकाङ्क्षा स्वयं प्रमाणं किंतु साकाङ्क्षं वाक्यं दृष्ट्वा भवत्येतादृशी मतिः—नूनमिदं वाक्यं केनचिद्वाक्येनैकवाक्यभूतमिति। ततश्चाकाङ्क्षारूपं प्रकरणं वाक्यस्य वाक्यान्तरैकवाक्यत्वे प्रमाणम्। एवं च यावत्प्रकरणं वाक्यं कल्पयित्वा विनियोजकं भवति तावद्वाक्यं लिङ्गश्रुती कल्पयित्वा विनियोजकं भवतीति प्रकरणाद्वाक्यं बलीयः।

अत एवेन्द्राग्नी इदं हविरजुषेतासवीवृधेतां महो ज्यायोऽकाताम्मित्यत्रेन्द्राङ्गीपदस्य लिङ्गादर्शाङ्गत्वे सिद्धे इदं हविरित्यादेरपि तदे-

---

तासां फलसाधनतां क्रत्वन्वयाधीनप्रतिपत्तिकामपेक्ष्य क्रतोरेव शीघ्रं साधनताप्रतीतेर्निर्णीतयागाङ्गभावसोमधर्मविधिमिश्रिता अङ्गविधयः प्रथमतरक्रतुशेषत्वं गता न पुनः संस्थाशेषत्वं प्रतिपद्यन्ते। कथंभावोपशमस्तु ज्योतिष्टोमादतिदेशेन भवेत्। यद्यपि संस्थाज्योतिष्टोमयोर्न सारूप्यं तथापि सारूप्यकार्यायां बुद्धिस्थतायां इहाश्रयत्वमहिम्नैव सिद्धेर्नानुपपत्तिरिति प्राकृताङ्गनैराकाङ्क्ष्यादसंबद्धव्यवायाच्च न प्रकरणेन संस्थाङ्गं सन्तर्दनम्। नचात्र संस्थासंनिधिरपि येनानुवादस्य संनिधिगामित्वात् प्रयाजे प्रयाजे कृष्णलमित्यत्र प्रयाजपदेनेव दीर्घसोमपदेन संनिहितनिर्देशः स्यात्। तस्मादस्त्यहर्गणेष्वपि सन्तर्दनम्। एकाहेष्वपि यत्र ज्योतिष्टोमाधिकग्रहविधिस्तत्र दाशमिकन्यायेन प्राकृतग्रहाबाधाद्भवतु संस्थावद्दीर्घसोमत्वात्। ज्योतिष्टोमे तु न निवेश इति प्रकरणबाधः। न प्रथमयज्ञ इत्यस्य प्रकरणबाधकत्वं निषेधप्रस्तावे वक्ष्यामः। पूषेति वचश्च न प्रकरणिनि दर्शे पेषणं विधत्ते तत्र पूष्णोऽभावात्। किन्तु तदेकदैवत्ये चरौ। देवताया अभोक्तृत्वेनाग्नेयपदवद्भागपदस्य तद्देवत्यपरत्वात्। प्रतिप्रसवेनार्थवत्त्वे लाघवाच्च। एवं किं मे प्रजाया इति शंयुयाचितवरप्रदाने 'यो ब्राह्मणायावगुरेत्तं शतेन यातयात्' इत्यस्मिन् प्रकृतदार्शिकर्त्विङ्मात्रस्य ब्राह्मणपदेन निर्देशासंभवात् प्रकरणबाधकत्वम्, तथाप्येषूदाहरणेषु विरोधस्यास्पष्टत्वान्मन्त्रवाक्यस्य प्रकरणबाधकत्वेऽभिहिते च कैमुतिकन्यायेन विधिवाक्यस्य तथात्वसिद्धेर्लाघवमनुसृत्य मन्त्रवाक्यकृतबाधमाह—अत एवेति। प्रकरणबाध्ययोर्मानयोर्मध्ये स्थानस्य वाक्येन बाधायामग्नीषोमीयक्रमेण प्रसक्ततन्मात्राङ्गत्वानि लिङ्गावगतपशुत्रयाङ्गभावपरिवीतपदैकवाक्यत्वानि क्रीयमाणपरिव्याणानुवादिमन्त्रगतानि युवासुवासाइत्यादिपदान्युदाहरणं, वाक्येन क्रमं बाधित्वा तेषां सवनीयपरि-

कवाक्यत्वाद्दर्शाङ्गत्वम्, न तु प्रकरणाद्दर्शपूर्णमासाङ्गत्वम्, प्रकरणाद्वाक्यस्य बलीयस्त्वादिति ॥

उभयाकाङ्क्षा प्रकरणम्। यथा प्रयाजादिषु। समिधो यजतीत्यत्र हि इष्टविशेषस्यानिर्देशात्समिद्यागेन भावयेत् किमित्यस्त्युपकार्याकाङ्क्षा। दर्शपूर्णमासवाक्येऽपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्कथमित्यस्त्युपकारकाकाङ्क्षा। अत उभयाकाङ्क्षया प्रयाजादीनां दर्शपूर्णमासाङ्गत्वं सिध्यति।

ननु यदि प्रयाजादिवाक्ये इष्टविशेषो न श्रूयते तर्हि विश्वजिन्न्यायेन स्वर्गः फलं कल्प्यताम्। विश्वजिदधिकरणे हि विश्वजिता यजेतेत्यत्र फलस्याश्रवणात्, फलमन्तरेण च विधिश्रुतेरनुपपत्तेरवश्यं फले कल्पयितव्ये सर्वाभिलषितत्वेन स्वर्गः फलमित्युक्तम्। तदुक्तम्—

'स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात्' इति।

रात्रिसत्रन्यायेन वार्थवादिकं फलं कल्प्यताम्। रात्रिसत्राधिकरणे हि प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्तीत्यत्र विध्युद्देशे फलाश्रवणात्फलमन्तरेण च विधिश्रुतेरनुपपत्तेरवश्यं फले कल्पयितव्ये आर्थवादिकं प्रतिष्ठाख्यं फलमित्युक्तम्। विश्वजिदधिकरण-

---

व्याणेऽपि विनियोगसिद्धेः। समाख्यायां वाक्येन बाधायां भक्षानुवाकगतानि लिङ्गावगतग्रहणाद्यङ्गभावैः सध्यासमित्यादिपदैरेकवाक्यतापन्नानि शेषपदान्युदाहरणं, समाख्याप्राप्तभक्षणाङ्गत्वबाधेन तेषां ग्रहणादिष्वेव विनियोगात्।

उभयेति। फलाकाङ्क्षाविशिष्टकर्थंभावाकाङ्क्षेत्यर्थः। वैशिष्ट्यं च स्वाश्रयभावनासंनिहितभावनाश्रितत्वसंबन्धेन, न त्वेकपुरुषावगतत्वादिना। तेन न विश्वजिदादेः प्रकरणेन दर्शाङ्गत्वम्, नापि दर्शप्रकरणेन प्रयाजादेः प्रकरणित्वम्। यथा हि ज्ञानत्वं ज्ञानपदवाच्यमपि न ज्ञानं तथाङ्गविधिगता फलाकाङ्क्षा प्रकरणपदवाच्यापि न प्रकरणम्। उक्तसंबन्धेन यदीयफलाकाङ्क्षाविशिष्टाऽनिर्णीततदनङ्गत्वगता या कर्थंभावाकाङ्क्षा सा तद्विनियोजकं प्रकरणमिति तु निष्कर्षः। उक्तं हि 'असंयुक्तं प्रकरणादितिकर्त्तव्यतार्थित्वात्' (जै० ३।३।४।११) इति। अत्र पञ्चम्यन्तयोः सामानाधिकरण्यात् कर्थंभावाकाङ्क्षैव प्रकरणमित्यवसीयते। असंयुक्तपदं च फलाकाङ्क्षोपस्थापकं नतु संनिपातिनिवारणाद्यर्थमिति वार्तिकटीकायां प्रपञ्चितमेतैः। फल इति विवक्षितसंख्यो निर्देशः।

न्यायेनानुपस्थितस्वर्गकल्पने तस्य प्रकृतसंबन्धकल्पने गौरवादर्थवादोपस्थितस्यैव प्रकृतफलत्वकल्पने लाघवात् । तदुक्तम्—

'फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात्' इति ।

तस्माद्विश्वजिन्न्यायेन रात्रिसत्रन्यायेन वा स्वतन्त्रफलार्थत्वे संभवति किमिति दर्शपूर्णमासाङ्गत्वं स्वीक्रियते इति ।

मैवम् । स्वतन्त्रफलार्थत्वेऽन्यतराकाङ्क्षया संबन्धः स्यात् । न ह्यत्र फलस्य साधनाकाङ्क्षास्ति । श्रूयमाणं हि फलं साधनमाकाङ्क्षति न चात्र तच्छ्रूयते । एवं च फलस्याकाङ्क्षाभावात् केवलं किं भावयेदिति प्रयाजानां भाव्याकाङ्क्षयैव स्वतन्त्रफलार्थत्वं स्यात् । दर्शपूर्णमासार्थत्वे तूभयाकाङ्क्षा प्रमाणम् । प्रयाजानां भाव्याकाङ्क्षाया इतरत्र च कथंभावाकाङ्क्षायाः सत्त्वात् । अन्यतराकाङ्क्षातश्चोभयाकाङ्क्षा बलीयसीति वक्ष्यते । ततश्च दर्शपूर्णमासार्थत्वमेव युक्तं न स्वतन्त्रफलार्थत्वमिति । तदुक्तम्—

'द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात्' इति ।

अत्र द्रव्ये फलश्रुतिर्यस्य पर्णमयी जुहूर्भवति न स पापꣳ श्लोकꣳ शृणोतीत्येवमाद्या । संस्कारे फलश्रुतिर्यदङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते इत्येवमाद्या । कर्मणि फलश्रुतिर्वर्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजानुयाजा इज्यन्ते इत्याद्या । कर्मपदं चारादुपकारककर्मपरं द्रष्टव्यम्, संस्कारकर्मणः पृथक्संकीर्तनादित्यास्तां तावत् ।

तदिदं प्रकरणं क्रियाया एव विनियोजकम्, न द्रव्यगुणयोः । तयोस्तु क्रियायोगाद्विनियोजकम् । कुत इति चेत् । शृणु । यजेत स्वर्गकाम इत्यत्राख्यातांशेनार्थीभावनाभिधीयते—भावयेदिति । सा चांशत्रयमपेक्षते—किं भावयेत्केन भावयेत्कथं भावयेदिति । तत्र भाव्याकाङ्क्षायां षष्ठाद्यन्यायेन स्वर्गो भाव्यतयान्वेति—स्वर्गं भावयेदिति । करणाकाङ्क्षायां समानपदोपात्तो यागो भावार्थाधिकरणन्यायेन करणतयान्वेति यागेन स्वर्गं भावयेदिति । ततः कथमिति कथंभावाकाङ्क्षायां यत्संनिधौ पठितमश्रूयमाणफलकं च क्रियाजातं

उपयन्तीत्यत्रेति । एतदर्थवादसंबद्ध इत्यर्थः । आर्थवादिकमिति । ये प्रतितिष्ठासन्ति ते एता रात्रीरुपेयुरिति विपरिणामेनेत्यर्थः ।

तदेवोपकार्याकाङ्क्षयेतिकर्तव्यतात्वेनान्वयमनुभवितुं योग्यं क्रियाया एव लोके कथंभावाकाङ्क्षायामन्वयदर्शनात्। नहि कुठारेण छिन्द्यात्कथमित्याकाङ्क्षायां हस्त इति केवलमुच्चार्यमाणोऽपि हस्तोऽन्वयं प्राप्नोति। किं तर्हि हस्तेनोद्यम्य निपात्येति उच्चार्यमाणे उद्यमननिपातने एव। हस्तोऽपि तद्द्वारेणैवान्वयं प्राप्नोतीति सर्वजनीनमेतत्।

किं च कथंभावाकाङ्क्षा नाम करणगतप्रकाराकाङ्क्षा। यमोः प्रकारवाचित्वात्। सामान्यस्य भेदको विशेषः प्रकारः। सामान्यं च क्रियारूपमेवाख्यातेनोच्यते। यजेत स्वर्गकाम इत्यस्य ह्ययमर्थः—यागेन तथा कर्तव्यं यथा स्वर्गो भवतीति। क्रियासामान्यस्य च विशेषः क्रियैव भवति। न हि ब्राह्मणविशेषः परिव्राजकादिरब्राह्मणो भवति। एवं च करणगतक्रियाविशेषाकाङ्क्षापरनामधेयकथंभावाकाङ्क्षायां क्रियैवान्वेतीति युक्तम्।

स च करणगतः क्रियाविशेषोऽन्वाधानादिब्राह्मणतर्पणान्तक्रियारूप एवेति युक्तं तस्य प्रकरणेन ग्रहणम्। तस्य च करणगतत्वं तदुपकारकत्वमेव, तेन विना यागेनापूर्वाजननात्। न ह्युद्यमननिपातनव्यतिरेकेण कुठारेण द्वैधीभावो जन्यते। तत्सिद्धं कथंभावाकाङ्क्षायां क्रियैवान्वेतीति। अत एव द्रव्यदेवतयोर्यागसंपादनद्वारान्वयः सांप्रदायिकैरुक्तः।

विकृतौ च कथंभावाकाङ्क्षायामुपकारसंपादनमतिदिश्यत इत्युक्तम्। यदि च कथंभावाकाङ्क्षायां सिद्धं वस्त्वन्वययोग्यं स्यात् तदा संपादनपर्यन्तं धावनं ग्रन्थकृतामनर्थकं स्यात्। अतश्च क्रियाया एव इतिकर्तव्यतात्वम्, कथंभावाकाङ्क्षागृहीतस्येतिकर्तव्यतात्वात्, इतिशब्दस्य च प्रकरवाचित्वात्। कर्तव्यस्य इति प्रकार 'इतिकर्तव्यता'। प्रकारश्च सामान्यस्य भेदको विशेष इत्युक्तम्। कर्तव्यस्य च विशेषः कर्तव्य एव भवतीति न सिद्धस्य वस्तुन इतिकर्तव्यतात्वम्, किंतु क्रियाया एव। सिद्धस्य तु द्रव्यादेः केवलमङ्गत्वम्। तदपि श्रुत्यादिना नतु प्रकरणात्। यथाहुः—

उच्चार्यमाणोऽपीति। यद्यपि शानजभिहितमुच्चारणकर्मत्वं शब्दगामि तथापि शब्दकर्मभूतेऽर्थे तदुपचर्यते। एवमग्रेऽपि।

सिद्धमननुध्येयम्। अन्यादृशसिद्धत्वस्योपकारेष्वसंभवात्।

नाङ्गान्तरक्रियायोगादृते वाक्योपकल्पितात् ।
गुणद्रव्ये कथंभावैर्गृह्णन्ति प्रकृताः क्रियाः ॥ इति ।

अत एव बर्हिर्देवसदनं दामीत्यादिमन्त्राणां लिङ्गादङ्गत्वम्, न तु प्रकरणादित्युक्तमर्थवादाधिकरणपूर्वपक्षसमाप्तौ राणके । क्वचिद्द्रव्यस्येतिकर्तव्यतात्वाभिधानमङ्गत्वाभिप्रायं द्रष्टव्यम् । बहुग्रन्थस्वरसादुक्तयुक्तेश्चेति । तस्सिद्धं प्रकरणं क्रियाया एव विनियोजकमिति ।

तच्च प्रकरणं द्विविधम् । महाप्रकारणमवान्तरप्रकरणं चेति । तत्र फलभावनायाः प्रकरणं महाप्रकरणम् । तच्च प्रयाजादीनां ग्राहकम् । तच्च प्रकृतावेव । यत्र समग्राङ्गोपदेशः सा प्रकृतिः यथा दर्शपूर्णमासादिः । तत्र चोभयाकाङ्क्षारूपं प्रकरणं संभवति, आकाङ्क्षानुपरमात् ।

विकृतौ तु न प्रकरणं संभवति । यत्र न समग्राङ्गोपदेशः सा विकृतिः, यथा सौर्यादिः । तत्र च यान्यपूर्वाण्यङ्गानि पठ्यन्ते उपहोमादीनि तेषां न प्रकरणं विनियोजकम् । तत्र यद्यपि तेषां किंभावयेदित्यस्त्याकाङ्क्षा तथापि प्रधानस्य न कथंभावाकाङ्क्षास्ति प्राकृतैरेवाङ्गैर्निराकाङ्क्षत्वात् । न चात्र प्राकृतानामङ्गानामपठितत्वेनाप्रत्यक्षत्वाद्वैकृतानां तु पठितत्वेन प्रत्यक्षत्वात्तैरेवाकांक्षोपशम इति वाच्यम् । तेषां पठितत्वेऽपि अक्लृप्तोपकारत्वेन झटित्याकाङ्क्षोपशमनेऽसामर्थ्यात्,

---

लिङ्गादिति । प्रकरणसहितादिति शेषः । प्रकरणादित्यनन्तरमेवेति । लिङ्गादभिधानक्रियार्थत्वेऽवगते तद्द्वारेण मन्त्राणां प्रकरणेन ग्रहणं संभवति नान्यथा प्रकरणाग्रहीतस्योच्चारणकर्तव्यताया अप्यसिद्धेरिति तदाशयः ।

उपहोमादिकतिपयाङ्गोपदेशवत्या विकृतेर्वारणाय समग्रेति ।

यत्र नेति । नच दर्विहोमेष्वतिप्रसङ्गः । तेषामङ्गसत्त्वे तस्य द्रव्याद्यात्मनौपदेशिकत्वात् । असत्त्वेऽप्रसिद्धयैव लक्षणपरिहारात् । नचात्रेति । अत्र सौर्ये । यत्र ह्यग्निहोत्रादिनाम धर्मवतो नामत्वेन क्लृप्तं विधेयकर्मान्तरे वैष्णवादिपदवद्गुणविधित्वेन प्रायणीयादिवद्यौगिकत्वेनासंभवदन्यायश्चानेकार्थत्वमिति गौण्या प्रवृत्तं विधिसमभिव्याहारादुपशये यूपपदवत्सुरावाजिनयोः सोमपदवत्स्तुतावपर्यवस्यदमी पिष्टपिण्डाः सिंहाः क्रियन्तामितिवदतिदेशे पर्यवस्यति तत्र

प्राकृतानां तु कल्पोपकारत्वेन तच्छमने सामर्थ्यात् । न चात्र तेषामुपस्थापकाभावः, उपमितिलक्षणप्रमाणेन तेषामुपस्थितत्वात् । सौर्यवाक्ये हि दृष्टे औषधद्रव्यत्वेन एकदैवत्यत्वेन सादृश्येन आग्नेयवाक्यमुपमीयते गवयदर्शनाद्गोरुपमानवत् । तस्मिंश्चोपमिते तेन तदर्थो ज्ञायते । सा त्र्यंशा भावना । तत्र सौर्यवाक्ये भावनायाः भाव्यकरणयोः

चोदनायां भवतु तत्कृतोपस्थितिः प्राकृतानां; यत्र वा तदतिदेशकं वचनमाम्नायते यथेषावेकाहे 'इषुं विष्टुतिं करोतीत्यनन्तरं' 'समानमितरच्छयेनेन' इत्यत्र हि यदि भाष्यमतमनुसृत्येतरपदं पूर्वोक्तेषुसदृशमसंनिहितमपि श्येनवैशेषिकं कंटकवितोदनादि विधत्त इत्युच्यते, यद्वा—आचार्यमतानुसारेणेतरपदं पूर्वोक्तविष्टुत्यादेरवशिष्टस्य प्राकृताङ्गस्योद्देशकं समानपदं प्राकृताङ्गसंबद्धस्य श्येनगतलोहितोष्णीषादेर्विकारस्य विधायकमित्याश्रीयते, सर्वथापि सुलभा तत्र तेषामुपस्थितिः । प्रत्यक्षं वचः कथं नोपदेश इति तु भ्रममात्रम् । अन्यत्र विहितानां धर्माणां तत्सम्बन्धापरित्यागेनान्यसम्बन्धप्राप्तिफलकस्य शास्त्रस्यातिदेशत्वात् । तद्विपरीतस्योपदेशत्वात् । एवं यत्रैतद्ब्राह्मणान्येव पञ्च हवींषि एतद्ब्राह्मण एककपाल इत्यादौ सार्थवादकसाङ्गविधिककाण्डवाचिब्राह्मणपदश्रवणादङ्गशास्त्राणामतिदेशो बोध्यते तत्र तत्कृतोपस्थितिर्ज्ञेया । अत्र तु न संभवति तादृशोपस्थापकाभावादिति शङ्कितुराशयः । तृतीयमतिदेशप्रकारमाह—उपमितीति । एकेति । अग्नुमेवादित्यं स्वेन भागधेयेनोपधावति, उदुत्यं, अग्नये, घ्रियस्व, अग्निर्मूर्धेतिवाक्यशेषमन्त्रवर्णबलेन वैकृतप्राकृततद्धितयोस्तथात्वे तात्पर्यादित्याशयः । भाव्येति । यद्यपि करणत्वाभिमतो यजिर्न श्रुतः । देवतासंबन्धोत्था च यज्याकाङ्क्षातिदेशप्राप्तयजिनैव निवर्ततामिति शङ्कोदेति तथापि युगपदुपस्थितयोर्विभिन्नान्वयासंभवादितिकर्तव्यतातिदेशस्य न करणविषयत्वम् । अतिदेशवाक्यान्तरकल्पनाच्च लाघवेन यजेरध्याहारो निर्वपतिना तदर्थलक्षणा वाङ्गीकर्तुमुचितेत्याशयेनेदम् । एतेनाश्रुतफलके विश्वजिदादौ फलातिदेशोऽपि निरस्तः । एकशब्दोपस्थितयोर्विधेयोद्देश्यत्वानुपपत्तेश्च । नचैवमपि चोदकप्राप्तार्थवादेनैव फललाभात् कल्पनानुपपत्तिः । वाचनिकब्राह्मणातिदेशमन्तरेणार्थभावनेतिकर्तव्यताया एवातिदेशाश्रयणात् । अतएव यावज्जीवनियमस्य स्वर्गकामादेरधिकारिणः प्रधानसाहित्यस्य गुणकामानां चाप्रवृत्तिः । स्तुत्याख्यप्राकृतकार्यपृथुभावेन वा तदतिदेशादप्राकृतफलप्रकाशनार्थत्वासंभवः ।

सत्त्वादितिकर्तव्यताकाङ्क्षायामुपकारपृष्ठभावेनाग्नेयेतिकर्तव्यताऽदितिश्यते,—सौर्यर्यागेन ब्रह्मवर्चसं भावयेदाग्नेयवदुपकृत्येति । तथा च तयैवाकाङ्क्षोपशमान्न विकृतेः प्रकरणमस्ति । अन्यतराकाङ्क्षारूपस्थानादेव चापूर्वाङ्गग्रहणम् ।

उपकारेति । उक्तं ह्येतदृशमाद्ये—आकाङ्क्षायोग्यतासंनिधिवशात् प्राकृतोपकारा एव विकृत्या स्वीक्रियन्त इति । आग्नेयवदिति ।

एतेनान्येऽपि चोदनालिङ्गातिदेशा व्याख्याताः ।

ते यथा—आग्नावैष्णवमारुतप्रभृतिषु औषधद्रव्यकानेकदेवत्ययागेषु अग्नीषोमीयैन्द्राग्नयोर्धर्माः । तत्रापि तद्धितपदाक्षरसंख्यासामान्यं व्यवस्थापकमिति बहवो याज्ञिकाः । सौम्येन्द्रचर्वोस्तयोरेव धर्माः, देवतात्वाधिष्ठानसाम्यस्य तत्संख्यासाम्याद्बलीयस्त्वादित्यपि केचित् । पश्वामिक्षयोः पयसः साक्षात्पशुप्रभवत्वसाम्यादामिक्षायाः पयस्त्वात्, मधूदकयोराज्यस्य वर्णसाम्याद् द्रवत्वस्यापि कथंचित्तुल्यत्वात् । ननु प्राजापत्यशतकृष्णले चरुशब्देन विशदत्वेन चौषधधर्मातिदेशस्यैव तत्रौचित्यात् । आग्नेयेऽपि पयसि नाग्नेयस्य, शब्दद्वारककर्मसमवायिदेवतासामान्यात् स्वरूपकर्मसमवायिद्रव्यसामान्यप्राबल्यात् । भवति चाध्वरकल्पायां तृतीयस्थानगतेऽपि बार्हस्पत्ये अन्याधीनप्रतिपत्तिकस्थानसाम्यात्तद्धितलक्षणदेवतादिसाम्यप्राबल्यात् । पशुयागेष्वग्नीषोमीयस्य पशोः । एकादशिनेषु सवनीयस्य सौत्यत्वसाम्यात् । सौत्रामण्यादिपशुगणेषु तेषाम् । एकाहेषु द्वादशाहे च ज्योतिष्टोमस्याव्यक्तत्वसाम्यात् । साद्यस्कादिसंज्ञायोगिष्वेकगणान्तर्वर्तिष्वेकाहेषु तु प्रथमस्य धर्मवत उत्तरेषु । गणेषु द्वादशाहान्तर्वर्तिदशरात्रस्य गणत्वसाम्यात्, अनन्यथासिद्धलिङ्गेभ्यश्च । तत्रापि यजतिचोदनाचोदितत्वनिमित्तादीनसंज्ञासाम्यादहीनात्मकतदन्तर्वर्तिद्व्यहादेर्द्विरात्रादिष्वेकादशरात्रान्ते यथासंभवमतिदेशः । नच जन्यकसत्रराते चत्वारि त्रिवृन्त्यहान्यग्निष्टोममुखानीति विहितेष्वहःसु त्रिवृत्त्वसाम्यात्पार्ष्ठिकाद्याह्न एव विध्यन्तावृत्तिः शङ्क्या, अङ्गभूतस्तोत्रीयागतसंख्यासाम्यात् प्रधानगतगणत्वसाम्यस्य बलीयस्त्वात् । आसनोपायिचोदनाचोदितत्वनिमित्तसत्रसंज्ञासाम्यात् सत्रात्मकतदन्तर्वर्तिदशरात्रात् त्रयोदशरात्रादिषु गवामयनपर्यन्तेषु । तस्मादितरसंवत्सरसत्रेषु । षट्त्रिंशद्रात्रे षडहा भवन्ति चत्वारो भवन्तीत्यत्र तु षाडहिकविध्यन्तावृत्तिः, द्वादशाहिकमपेक्ष्य तस्य शीघ्रप्रतीतेः । यद्यप्युक्तनीत्या शतोक्थ्यं भवतीत्यत्रोक्थ्यपदवाच्यसंस्थया संख्यया च विशिष्टेष्वहःसु विहितेषु दशरात्रविध्यन्त आवृत्या प्रवर्तते तथापि

न च प्राकृताङ्गग्रहणमेव विकृतौ प्रकरणात् किं न स्यादिति वाच्यम्। तेषामपि प्रकृत्युपकारकतयाऽऽकाङ्क्षोपशमात्। ननु प्राकृतानामङ्गानामाकाङ्क्षाभावे तेषां विकृतौ संबन्धः केवलं स्थानात् स्यात्, अपूर्वाणां त्वाकाङ्क्षासत्त्वाद्विकृतेरप्याकाङ्क्षावत्त्वात्तेषां तत्संबन्धः प्रकरणात्स्यात्, प्रकरणं च स्थानात् झटिति विनियोजकमित्यपूर्वाणामेव प्रथमं संबन्धः स्यात्, न प्राकृतानामिति।

अत्रोच्यते। सत्यं प्रकरणं झटिति विनियोजकम्। तथाति प्रमाणबलावलात्प्रमेयबलावलस्य ज्यायस्त्वादुक्तविधयोपस्थितानां प्राकृतानामेव संबन्धो युक्तः स्यात्, क्लप्तोपकारत्वात्, न वैकृतानां कल्प्योपकारत्वात्। विकृतेश्चोपकारकपदार्थाकाङ्क्षा न पदार्थमात्राणामिति युक्तः प्रथमं प्राकृताङ्गसंबन्धः। ततश्च न विकृतौ प्रकरणं विनियोजकम्।

यत्तु विकृतौ प्राकृताङ्गानुवादेन विधीयते यथा—'औदुम्बरो यूपो भवति' इति यूपानुवादेन औदुम्बरत्वम्—तत्प्रकरणाद्गृह्यते। ननु न तत्प्रकरणाद्गृह्यते अक्रियात्वात्। क्रियाया एव प्रकरणग्राह्यत्वादिति—चेत्—सत्यम्। तथापि तु तावद्विधीयमानस्यौदुम्बरत्वस्यास्त्येवा-

---

प्रतिदशकमतिदेशप्राप्तयोरभितोऽग्निष्टोमयोः स्थाने य उक्थ्यविनियोगः स ज्यौतिष्टोमिकोक्थ्यविषय एव बोध्यः। द्वादशाहिकस्येव गावामयनिकस्याप्युक्थ्यविनियोगस्य ज्योतिष्टोमगतां तदुत्पत्तिमपेक्ष्यैव प्रवृत्यौचित्यादिद्याद्यूह्यम्।

प्रकरणादिति। यद्यपि संनिधिपठितयोः शेषशेषित्वाभिमतयोरुभयाकाङ्क्षं प्रकरणमिति न प्राकृतानां प्रकरणविनियोज्यत्वशङ्कोदयः, तथापि पाठसंपाद्यसंनिधेरिहातिदेशेनैव सिद्धिरित्यभिमानेनेयमुक्तिः स्थानात् स्यादित्यग्रिमा च।

क्लप्तोपकारकत्वस्य बलीयस्त्वप्रयोजकत्वे बीजमाह—विकृतेश्चेति। उपकारार्थं पदार्थानाकाङ्क्षन्ती विकृतिर्हि येभ्य उपकारं क्लप्तिस्ताननादृत्य नान्येभ्य उपकारकल्पनायासं सहत इत्याशयः।

स्वरूपेणौदुम्बरतायाः प्रकरणाग्राह्यत्वेऽपि चोदकप्राप्तनियोजनविशेषणत्वेन तद्ग्राह्यत्वसंभव इत्याशयेनाह—सत्यमित्यादिना। यद्यप्याहवनीयवद्यूपः केवलादृष्टात्मा स्यात्, तथापि यदाहवनीये जुहोतीत्याहवनीयविनियोगविधाविव न्यायसुधाद्युदाहृते पालाशे बध्नातीति यूपविनियोगविधावदृष्टवाचिशब्दाभावेनाद-

काङ्क्षा—किं भावयेदिति। न च यूपानुवादेन तस्य विधीयमानत्वाद्यूपस्य चादृष्टरूपत्वात्तेनैवौदुम्बरत्वस्य नैराकाङ्क्ष्यम्, आहवनीयेनेवाधानस्येति वाच्यम्।

यूपस्य केवलादृष्टरूपत्वाभावात्। तस्य हि तद्रूपत्वे खादिरत्वादिकं केवलादृष्टार्थं स्यात्। न च तत्संभवति। तथा सति खदिराभावे प्रतिनिधित्वेन कदरोपादानं न स्यात्, अदृष्टार्थस्य प्रतिनिध्यभावात्, नहि खदिरजन्यमदृष्टं कदरेण क्रियत इत्यत्र प्रमाणमस्ति। अत एव नादृष्टार्थानां प्रतिनिधिः। तदुक्तम्—

'न देवताग्निशब्दक्रियमन्यार्थत्वात्' इति।

अन्यार्थत्वादिति अदृष्टार्थत्वात्। प्रतिनिधित्वेन चोपादानं कदरादेरुक्तं ग्रन्थेषु। तस्मान्न यूपस्य केवलादृष्टरूपत्वम्, अपि तु दृष्टादृष्टसंस्कारगणो यूप इति सांप्रदायिकाः। एवं चौदुम्बरत्वस्य न यूपमात्रेण नैराकाङ्क्ष्यम्, दृष्टसंस्कारस्य प्रकारान्तरेणापि संभवात्। अतश्चास्ति औदुम्बरत्वस्याकाङ्क्षा। विकृतेरप्यस्ति कथंभावाकांक्षा। सा च तदा शाम्यति यदोपकारास्तत्पृष्ठभावेन च पदार्था अन्वीयन्ते। न तूपकारमात्रान्वयेन शाम्यति। अतश्च यथेन्द्रिय-

---

ष्टविशिष्टस्य क्रत्वपूर्वसंबन्धालाभात्प्राकृतखादिरांजनादिविधिष्विव वैकृतोदुम्बरतादिविधिषु क्रत्वपूर्वसंबन्धाकाङ्क्षा वक्तुं शक्यते।

वस्तुगतिं त्वनुरुध्याह—यूपस्येति। ननु 'न देवता' (जै० ६।३।६।१८) इति सूत्रे प्रयीजादिक्रियाणामाहवनीयाद्यग्नीनां च प्रतिनिध्यभावे यो न्यायोऽभ्यधायि स भवता यूपे संचार्यते। देवतामन्त्रयोर्दृष्टार्थयोरपि मुख्यस्मृत्यस्मृत्योस्तत्सदृशग्रहासंभव इत्यादिन्यायान्तरेण प्रतिनिधिनिराकरणात्। नचेह तत्साम्यं दृष्टान्ते साक्षादृष्टार्थत्वात्, दार्ष्टान्तिके परिच्छेदाख्यदृष्टद्वारेण तदर्थत्वादत आह—तस्मादिति। यूपशब्दवाच्यत्वेनाभिमतमदृष्टं प्रति खदिरत्वांजनादिद्वारत्वेनामितानां दृष्टादृष्टानामेव तद्वाच्यत्वसंभवेनाधिकादृष्टकल्पनमुचितम्। तेषां तु वाच्यत्वं प्रत्येकं स्यात्। यच्छिद्यते स यूपः यस्तक्ष्यते स यूप इति प्रत्येकं वचनव्यक्त्याश्रयणात्। कतिपयसंस्कारहीनायामपि खलेवाल्यां मन्त्रगतयूपशब्दप्रयोगोपपत्तेः वाच्यसंस्कारानेकत्वेऽपि तदाश्रयकाष्ठैकत्वेन गुणवचनानामाश्रयतो लिङ्गवचनानीति मन्त्रगतयूपैकत्वनिर्देशोपपत्तेः। यद्वा। समुदाया-

भावनायाः करणाकाङ्क्षा दध्नः करणत्वेनान्वये जाते सिद्धस्य करणत्वानुपपत्त्या होमस्याश्रयत्वेनान्वयं यावदनुवर्तते न तु दध्यन्वयमात्रेण निवर्तते, आश्रयत्वेन च गृह्यमाणो होमः करणाकाङ्क्षयैव गृह्यत इत्युच्यते, न त्वाश्रयाकाङ्क्षा नाम चतुर्थ्यस्ति ।

एवं विकृतेः कथंभावाकाङ्क्षा नोपकारान्वयमात्रेण निवर्तते उपकारपृष्ठभावेन यावत्पदार्थान्वयमनुवर्तते । अतश्चोपकारपृष्ठभावेन गृह्यमाणाः पदार्थाः कथंभावाकाङ्क्षयैव गृह्यन्ते । तत्र प्राकृताः पदार्थाः कथंभावाकाङ्क्षया गृह्यमाणा अपि न प्रकरणग्राह्याः प्रकृत्युपकारकतया तेषामाकाङ्क्षाभावात् । औदुम्बरत्वादयस्तु अन्यानुपकारकतया साकाङ्क्षाः पशुनियोजनयूपपृष्ठभावेन यावत्खादिरत्वमायाति तावद्विधीयन्ते इति युक्तं तेषां प्रकरणाद्ग्रहणमुभयाकाङ्क्षासत्त्वात् । यदि हि यूपपृष्ठभावेन खादिरत्वं विहितं स्यात्ततो विकृतेराकाङ्क्षाभावादौदुम्बरत्वं न प्रकरणग्राह्यं स्यात् । न चैतदस्ति चोदकस्य खादिरत्वाविषयत्वात् ।

ननु यदि यावत्खादिरत्वमायाति तावदेवौदुम्बरत्वं विधीयते तदा तेन खादिरत्वबाधोऽप्राप्तबाधः स्यात्, तार्तीयबाधवत् । तथा हि बाधो द्विविधः—अप्राप्तबाधः प्राप्तबाधश्चेति । तत्र तार्तीयो बाधोऽप्राप्तबाधः । तत्र हि यावद्बलेन विनियोगः कर्तुमारभ्यते तावदेव प्रबलप्रमाणेन विनियोगः क्रियते इति तद्बोधितेनेतरबाधोऽप्राप्तबाधः, दुर्बलप्रमाणस्याप्रवृत्तत्वात् ।

प्राकृतस्य त्वङ्गस्य विकृतौ चोदकप्राप्तस्य प्रत्याम्नानादर्थलोपात्प्र-

---

त्मना स्यात् । लाघवेन सर्ववाक्यपर्यालोचनान्ते यच्छिद्यते यस्तक्ष्यते स यूप इत्येवमेकवचनव्यक्तिस्वीकरणात् । खलेवाल्यां च कतिपयसंस्कारप्रकाशकशब्दान्तराभावेनागत्या यूपशब्दप्रयोगाश्रयणात् । अक्षशब्दवन्नानार्थस्य यूपशब्दस्य सकृत्प्रयोगे यावदर्थप्रकाशकत्वाभावापत्तेरित्यन्यदेतदित्याशयः ।

पञ्चिति । यूपपृष्ठभावेनेत्येतावतैवालंकर्त्तव्ये नियोजनग्रहणं मूलंशङ्कापरिहारार्थम् ।

प्रत्याम्नानादिति । आम्नानस्य प्रातिकूल्यं तत्कार्यकार्यर्थान्तरविधायकत्वं तादृशार्थान्तराक्षेपकत्वं वा । तेन सप्तदशशरावश्चरुर्भवति वत्समालभेतेत्यादौ

---

१ 'मूले' इति पाठः ।

तिषेधद्वां यो बाधः स प्राप्तबाधः। यथा प्राकृतानां कुशानां प्रतिकूलशरान्नानात्, यथा वाऽवघातस्य कृष्णलेषु वैतुष्यरूपप्रयोजनलोपात्, यथा वा पित्र्येष्टौ होतृवरणस्य न होतारं वृणीत इति प्रतिषेधात्। औदुम्बरत्वेन च खादिरत्वबाधः प्राप्तबाध एव वक्तव्यः, शरकुशन्यायेन। चोदकस्य च खादिरत्वाविषयत्वे प्राप्त्यभावात्तदनुपपत्तिः स्यादिति।

उच्यते। तार्तीयप्रमाणविनियुक्तेनेतरस्य बाधनं तावदप्राप्तबाधनम्। प्रकरणं च तार्तीयम्। तेन तद्विनियुक्तौदुम्बरत्वेनेतरस्य बाधनमप्राप्तबाध एव। नहि वैकृतेन प्राकृतबाधः प्राप्तबाध एवेति कुलधर्मः।

वस्तुतस्तु प्राप्तबाध एवायम्। न च खादिरत्वस्य चोदकाविषयत्वेन प्राप्त्यभावात् कथं तद्बाधः प्राप्तबाधः, तद्विषयत्वे वा तेनैव नैराकाङ्क्ष्यान्नौदुम्बरत्वे प्रकरणं विनियोजकं स्यादिति वाच्यम्।

मुष्टिनिर्वापाऽजालम्भादिप्रत्याम्नानत्वसङ्ग्रहः। अर्थलोपादिति। साध्यसाधनयोरन्यतरासंभवादित्यर्थः। तेन पवमानेष्टिषु आहवनीयाग्निहोत्रहवण्योर्बाधस्यार्थलोपनिमित्तत्वसंग्रहः। प्रतिषेधादिति। निवृत्तितात्पर्यकाच्छास्त्रादित्यर्थः। तेनैतैरुदाहृतपर्युदासत्वस्य 'न होतारं वृणीते' इत्यस्य 'इडान्ताऽतिष्यासंतिष्ठते' इत्येवंरूपशास्त्रान्तरस्य च प्रतिषेधत्वसङ्ग्रहः।

नहीति। नचैवं प्राकृतबाधस्य प्राप्तबाधत्वं क्वापि न स्यात्। बाधकवैकृतस्य सर्वत्र तार्तीयमानविनियुक्तत्वादिति शङ्क्यम्। यत्रैकत्रिकादौ प्राकृतेनैव क्रमादिना पाठप्राप्तेनापि श्रुतिप्राप्तस्यापि त्रिच्छन्दस्त्वादेः प्राकृतस्य बाधो दशमे निरूप्यते तत्रैव प्राकृतबाधस्य प्राप्तबाधत्वेन वक्तुमौचित्यात्। नहि तत्र बाध्यबाधकयोस्तार्तीयमानेन विकृतौ विनियोगः। विकृतौ तादृशमानादर्शनात्। प्राकृतमानानां च विकृताविनियोजकत्वात्। विनियोजकत्वे वा त्रिच्छन्दस्त्वेनैव क्रमबाधापत्तेः। तेन प्राप्तबाध एवेत्यवधारणस्य नानर्थक्यमिति बोध्यम्।

ननु शरयुक्तविकृतावतिदेशस्य कुशेतरविषयत्वमिवैकत्रिकेऽतिदेशस्य त्रिच्छन्दस्त्वेतरविषयत्वं वाच्यम्। अन्यथा शास्त्रप्राप्तस्य बाधायोगात्। ततश्च प्राप्तबाधोक्तेराकरस्थाया निर्विषयत्वं स्यादत आह—वस्तुत इति। अतश्च

नहि प्राप्तावस्थले चोदकेन पदार्थाः प्राप्यन्ते । तथा सति शास्त्रप्राप्तत्वेन बाधो न स्यात् । किं तर्हि तानेव पदार्थान्वस्तुतः प्रापयति ये विकृतौ न बाध्यन्ते । तेच पदार्थाः प्रकृतिवच्छब्देन प्राप्यन्ते इति भवति पुरुषस्य भ्रान्तिः—यथा प्राकृतौ कृतं तथा विकृतौ कर्तव्यमिति सर्वे पदार्थाः प्राकृताः कर्तव्या इति ।

अतश्च भ्रान्तिप्राप्ताः खादिरत्वादयः शास्त्रप्रतिपन्नैरौदुम्बरत्वादिभिर्बाध्यन्ते इति भवति तद्बाधः प्राप्तबाधः । न च भ्रान्तिप्रतिपन्नेन वैधी आकाङ्क्षा निवर्तयितुं शक्यते । तस्माद्युक्तमुक्तमुभयाकाङ्क्षारूपप्रकरणसंभवाद्विकृतौ प्राकृताङ्गानुवादेन विधीयमानानामौदुम्बरत्वादीनां प्रकरणं विनियोजकमिति ।

एवं पृषदाज्येनानुयाजान्यजतीति प्राकृतानुयाजानुवादेन विधीयमानं पृषदाज्यमपि प्रकरणाद्विकृत्यङ्गमिति केचिदाचार्याः । अस्मत्तातचरणास्त्वेवमाहुः—पृषदाज्यं हि अनुयाजानुवादेन विधीयते । तत्स्वरूपे चानर्थक्यप्राप्तौ तैर्न विकृत्यपूर्वं लक्षयितुं युक्तं विप्रकर्षात्, किंतु दीक्षणीयावाङ्नियमन्यायेन स्वापूर्वमेव लक्षयितुं युक्तं सन्निकर्षात् । अत एवोत्पवनादीनां प्रोक्षणाद्यपूर्वप्रयुक्तत्वमुक्तं नवमे । अतश्च विधीयमानस्य पृषदाज्यस्य वाक्यप्रतिपन्नेनानुयाजापूर्वेणैव नैराकाङ्क्ष्यान्न प्रकरणाद्विकृत्यपूर्वार्थत्वमिति ।

भ्रान्तीति । ननु प्रतिपक्षशास्त्रदर्शने सत्यसति वैषा प्राप्तिः । नाद्यः । अनुभवविरोधात् । नहि शरशास्त्रं पश्यतः कुशकर्तव्यताबोधोऽतिदेशादुदेति । न द्वितीयः । श्रुतिमपश्यतो लिङ्गादपि भ्रान्तिसंभवेन श्रुत्या लिङ्गबाध्यस्यापि प्राप्तबाधत्वापत्तेरिति चेत् न । प्रतिपक्षं पश्यतोऽपि पुरुषस्य सर्वांगसाधारणादतिदेशात्तद्वत्कार्यमिति बोधस्य कुशकर्तव्यताभ्रमोत्थापकस्य जन्ममात्रेण प्राप्तिव्यवहारोपपत्तेः । नच श्रुतिं पश्यतो लिङ्गात्तादृश्यपि प्राप्तिः शक्यते वक्तुम् । यद्वा शरशास्त्रदर्शनेऽपि कुशांशे बाधितस्याप्यतिदेशस्याङ्गान्तरप्राप्त्यर्थत्वमभ्युपगम्यते । नाभ्युपगम्यते च विरोधिश्रुतिदर्शनेऽपि लैङ्गिकश्रुतिसत्त्वमिति बाध्यत्वाभिमतशास्त्रप्राप्त्यप्राप्तिभ्यां बाधवैचित्र्यम् । एवं च पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् इति न्यायविषये प्राप्तबाधव्यवहारोपपत्तिः । आह च भवदेवः—प्राप्ताप्राप्तशब्दोऽयं शास्त्रगोचर एव न बाध्यविषयगोचर इत्यवधातव्यमिति ।

वयं त्वङ्गीकृत्यापि विकृत्यर्थत्वं ब्रूमः। भवतु वा विकृत्यर्थत्वं पृषदाज्यस्य। तथापि न प्रकरणं विनियोजकं भवति। यूपपृष्ठभावेन हि यावत्खादिरत्वमायाति तावदौदुम्बरत्वविधानादुभयाकाङ्क्षासंभवाद्युक्तः प्रकरणविनियोगः। एवं यावदनुयाजपृष्ठभावेन आज्यमायाति तावदेव यदि पृषदाज्यं विधीयते, तदोभयाकाङ्क्षासंभवात्प्रकरणविनियोगो भवेत्। न त्वेतदस्ति। नहि पृषदाज्यं नाम द्रव्यान्तरं किंचिदस्ति यदाज्यस्थानापन्नं विधीयेत, औदुम्बरत्वमिव खादिरत्वस्थानापन्नम्, पृषच्छब्दस्य पृषन्मणिरित्यादौ चित्रतावाचित्वेन दृष्टत्वात्, पृषदाज्यशब्दस्य चित्राज्यवाचित्वात्। अत एव निगदेषु आज्यपानित्येतद्वक्तव्यं न तु पृषदाज्यपानित्युक्तम्।

न च यावत्प्राकृतमाज्यमायाति तावदेव चित्राज्यविधानात् प्रकरणविनियोगः संभवतीति वाच्यम्। नहि पृषदाज्यशब्देन चित्रतागुणविशिष्टमाज्यं विधीयते। विशिष्टविधाने गौरवापत्तेः, किं तु प्राकृताज्यानुवादेन चित्रतागुणमात्रं विधीयते, लोहितोष्णीषा ऋत्विजः प्रचरन्तीतिवत्। तदुक्तं दशमचतुर्थचरणान्ते—

'न वा गुणशास्त्रत्वात्' इति।

प्राकृतस्यैवाज्यस्य चित्रतागुणमात्रविधानमिति च शास्त्रदीपिका। एवं च विकृतेः प्राकृतेनाज्येन कल्पोपकारैश्चानुयाजैर्नैराकाङ्क्ष्ये पश्चाद्विधीयमानस्य चित्रतागुणस्योपहोमाद्यपूर्वाङ्गवन्न प्रकरणं विनियोजकं संभवति।

यदि हि प्राकृतस्य कस्यचिद्गुणस्य स्थाने चित्रता गुणो विधीयेत

ननु पृषदाज्यस्यानुयाजापूर्वार्थत्वे यत्र तत्रस्थेनाप्यनुयाजापूर्वेण तत्प्रयुज्येत यथैव च लोके निर्शातप्रकारमवघातं प्रत्यसंभवच्छेषत्वस्योलूखलप्रोक्षणादेः क्रत्वपूर्वसंबन्धः कल्प्यः, तथा प्रकृतौ निर्शातप्रकारमनुयाजापूर्वादि प्रत्यसंभवच्छेषत्वायाः पृषत्ताया अपि। अन्यथाहवनीयोद्देशविहितस्य संमार्गादेरपि क्रतुसंबन्धो न सिध्येदत आह—भवत्विति।

सूत्रे गुणशब्दस्य विशिष्टाज्यपरत्वमेव किं न स्यादिति शङ्कायां व्याख्यातृवचोविरोधमाह—प्राकृतस्येति।

ननूत्पवनावेक्षणादिविधिबलाद्द्रव्यान्तरासंसर्गस्य प्रकृतावाज्याङ्गत्वेनावगतस्येह दधिसंसर्गेण बाधात् कथं नौदुम्बरतान्यायस्तत्राह—यदिहीति। नन्वत्र खादि-

तदा स गुणो यावदायाति तावद्विकृतेर्नैराकाङ्क्ष्याभावात्, चित्रता-गुणस्य च तावदेव विधानादुभयाकाङ्क्षासंभवात् प्रकरणविनियोगो भवेत् न च तादृशः प्राकृतो गुणोऽस्ति। आज्यस्यानुयाजानां च चित्रतागुणात्प्रागेव विधानात्, तस्य तत्स्थानापन्नत्वाभावात्।

न च आज्यपृष्ठभावेन यावत्प्राकृतं निर्गुणत्वमायाति तावदेवास्य विधानात्प्रकरणसंभव इति वाच्यम्। निर्गुणत्वस्याविहितत्वेन पाणिकण्डूयनवदनङ्गत्वाद्विकृतेस्तदाकाङ्क्षाभावात्। तथा हि ज्योतिष्टोमे दक्षिणादानसमये विहितकृष्णविषाणत्यागस्य द्विरात्रादिषु चोदकप्राप्तस्य प्रथमेऽहि अननुष्ठानम्। उत्तरेऽहि दक्षिणादानपूर्वकालीनैः पदार्थैः कृष्णविषाणकण्डूयनस्य शास्त्रविहितत्वेनापेक्षितत्वात्। ज्योतिष्टोमे च दक्षिणादानोत्तरकालं पाणिकण्डूयनं दृष्टमपि द्विरात्रादिषु प्रथमेऽहि अनुष्ठीयमानैर्दक्षिणादानोत्तरकालीनैः पदार्थैर्नापेक्ष्यते तस्य प्रकृतावर्थसिद्धत्वेनाशास्त्रीयत्वादिति।

एवं निर्गुणत्वस्याविहितत्वेन प्रकृतेस्तदपेक्षा नास्तीति। तस्मादुभयाकाङ्क्षाया असंभवात्पृषदाज्यस्य न प्रकरणविनियोगः संभवतीत्यलमतिविस्तरेण।

तत्सिद्धं महाप्रकरणं प्रकृतावेव विनियोजकम्। विकृतौ तु यत्प्राकृतदृष्टार्थाङ्गानुवादेन विधीयते तस्य विनियोजकं न तु केवलं विधीयमानस्यापूर्वाङ्गस्येति। यत्तु विकृतावपि प्राकृतधर्मानुवादेन विधीयमानयोर्धर्मयोरन्तरालेऽपूर्वमप्यङ्गं केवलं पठ्यते तदपि प्रकरणेन विनियुज्यते।

रताया औदुम्बरतयेव द्रव्यान्तरासंसर्गस्य दधिसंसर्गेण बाधः संभवति। दध्यन्यद्रव्यसंसर्गस्यावर्जनीयत्वापातादित्याशयः। निर्गुणत्वं विहितद्रव्यान्तरसंसर्गराहित्यम्। ननु प्रकृतौ पृषत्त्वानपेक्षानुयाजजन्यतयावगतस्यापि कार्यस्य पशौ तत्सापेक्षतजन्यत्वाङ्गीकरणात् प्राकृतकार्यसाधनतयानुयाजान् प्रापयतोऽतिदेशस्य स्वबोध्यसाधनतानिर्वाहकपृषत्त्वान्वयात् प्रागपर्यवसानान्न तदन्वयात्प्राक् प्रधानविधेर्नैराकाङ्क्ष्यं संभवतीत्यत आह—इत्यलमिति। एवं हि सर्वेषामपि प्राकृताङ्गानां वैकृतोपहोमादिभिर्निरूपितक्रमसाहित्यादिसापेक्षतया प्राकृतोपकारसाधनत्वादुक्तरीत्योपहोमादीनामपि प्रकरणविनियोज्यत्वं स्यादित्याशयः।

यद्यपि विकृतेः कथंभावाकाङ्क्षा प्राकृतैरेवाङ्गैः शाम्यति तथापि यत्र प्राकृताङ्गानुवादेन धर्मविधानं तत्र तद्विधानं यावद्भवति तावत्कथंभावाकाङ्क्षा न निवर्तते । अतो विकृतेराकाङ्क्षावत्त्वादन्तराले विहितस्याप्यपूर्वाङ्गस्य भाव्याकाङ्क्षासत्त्वाद्युक्तं तस्य प्रकरणाद्विकृत्यर्थत्वम् । यथाभिनहोमेषु । ते हि प्राकृताङ्गानुवादेन विधीयमानयोर्धर्मयोरन्तराले विधीयन्त इत्युक्तं तत्ररत्नादावित्यास्तां तावत् ।

फलभावनाया अन्तराले यदङ्गभावनायाः प्रकरणं तदवान्तरप्रकरणम् । तच्चाभिक्रमणादीनां प्रयाजादिषु विनियोजकम् । तच्च संदंशेन ज्ञायते तदभावेऽविशेषात्सर्वेषां फलभावनाकथंभावेन ग्रहणात् ।

संदंशो नाम एकाङ्गानुवादेन विधीयमानयोरङ्गयोरन्तराले विहितत्वम्, यथाभिक्रमणम् । तद्धि 'समानयत उपभृतः' । इत्यादिना प्रयाजानुवादेन किंचिदङ्गं विधाय विधीयते । पश्चादपि प्रयाजानुवादेन 'यो वै प्रयाजानां मिथुनं वेद'इत्यादिना किंचिदङ्गं विधीयते । अतः प्रयाजाङ्गमध्ये पठितमभिक्रमणं तदङ्गं भवति, तत्कथंभावाकाङ्क्षाया अशान्तेः । यथाहुः—

परप्रकरणस्थानामङ्गे श्रुत्यादिभिस्त्रिभिः ।
ज्ञाते पुनश्च तैरेव संदंशेन तदिष्यते ॥ इति ।

तथापि यत्रेति । एतेन वैकृतप्रधानविधिप्राकृताङ्गधर्मविध्योरन्तराले विहितस्यापि प्रकरणविनियोगो दर्शितः । अनेकार्थैश्चवान्तरतात्पर्यवतामनेकवाक्यानामेकत्र क्वचिन्महातात्पर्यमपि प्रकरणपदेनोच्यते यद्विषयतया परे ब्रह्मणि प्रकरणित्वव्यवहार औपनिषदानाम् । एतदेवाधिकार इत्यप्युच्यते । तथा फलेतिकर्त्तव्यताकाङ्क्षाभ्यामन्ये अप्याकाङ्क्षे स्वाश्रययोः संबन्धकारिण्यौ प्रकरणपदेनोच्येते यन्महिम्ना ग्रहणदेवतानां सोमयागसंबन्धसिद्धिः । मूले त्वनयोः प्रकरणयोरुक्तस्थले एवाविनियोजकत्वाद्विनियोजकप्रस्तावेऽनर्हतयोपेक्षणमिति बोध्यम् । संनिधेस्तु स्थानत्वेन निरूपणीयतया नेह प्रकरणत्वोक्तिः । क्वचित्तद्व्यवहारस्तु भाक्तः । तैरेवेत्यनन्तरमङ्गे ज्ञाप्य इति योज्यम् । तदवान्तरप्रकरणम् । एवकारो भिन्नक्रमः अङ्ग एवेति । ततश्च सत्यपि सामिधेन्यङ्गसंदंशमध्यपातेऽनङ्गनिविन्मन्त्रैर्व्यवहितस्योपवीतस्य न सामिधेन्यङ्गत्वमिति सूचितं भवति ।

न चाङ्गभावनायाः कथंभावाकाङ्क्षाभावात् कथं प्रयाजभावना-कथंभावेनाभिक्रमणं गृह्यते इति वाच्यम्। भावनासाम्येन सर्वत्र कथंभावाकाङ्क्षायाः सत्त्वात्। प्रयाजैरपूर्वं कृत्वा यागोपकारं भावये-दित्युक्ते यो नाम न जानाति प्रयाजैरपूर्वं कर्तुं तस्यास्त्येव कथं-भावाकाङ्क्षा—कथमेभिरपूर्वं कर्तव्यमिति। सा च संदंशपतितैर्वाच-निकैः स्मार्तैश्चाचमनादिभिः शाम्यति। तदभावे च स्वरूपनिष्पादनेन दर्विहोमन्यायेन निवर्तते। दर्विहोमेषु हि स्वरूपनिष्पादनातिरिक्त-स्तथाव्यापारो न श्रूयते नाप्यतिदेशेन तत्प्राप्तिः। यागीयानां धर्माणां तावन्नातिदेशो यागत्वेन होमत्वेन वैलक्षण्यात्। नाप्यि होमीयानां, कस्य होमस्य धर्मः कस्मिन् होमे प्रवर्तत इति विशेष-निर्णये प्रमाणाभावात्। अतो धर्मप्राप्त्यभावाद्दर्विहोमैरिष्टं भावये-त्कथमित्युत्पन्नाप्याकाङ्क्षा स्वरूपनिष्पादनेनैव शाम्यति। एवं येष्व-ङ्गेषु संदंशाद्यभावस्तत्रोत्पन्नाप्याकाङ्क्षा तेनैव निवर्तते, न तु सर्वथा तदभावः। तस्माद्युक्तमुक्तमभिक्रमणं प्रयाजाङ्गमिति।

तच्चेदमवान्तरप्रकरणं महाकरणाद्बलीयः, संदंशपतितानां धर्माणां कैमर्थ्याकाङ्क्षायां प्रधानापूर्वात्प्रयाजाद्यपूर्वस्य झटित्युपस्थितेरिति। प्रकृतमनुसरामः। तत्सिद्धमुभयविधस्य प्रकरणस्य विनियोजकत्वम्।

तदिदं स्थानादिप्रमाणाद्बलवत्। यत्र हि स्थानादङ्गत्वं तत्रान्य-तरस्य प्रकारान्तरेण निराकाङ्क्षत्वम्। न च साकाङ्क्षं निराकाङ्क्षेण संबद्धुं योग्यं विनाकाङ्क्षोत्थापनेन। अतश्चान्यतराकाङ्क्षया यावदु-भयाकाङ्क्षारूपप्रकरणकल्पनद्वारा वाक्यादि कल्पयितुमारभ्यते झटि-ति तावत्प्रकरणेन वाक्यादिकं कल्पयित्वा विनियोगः क्रियत इति स्थानात्प्रकरणस्य बलीयस्त्वम्।

अत एव विदेवनादयो धर्मा अभिषेचनीयसन्निधौ पठिता अग्नि नाभिषेचनीयस्याङ्गम्। तेषां तदङ्गत्वं भवत् स्थानाद्भवेत्, न तु

अथ प्रकरणस्येतिकर्तव्यताकाङ्क्षात्मकत्वादितिकर्तव्यताभूतप्रयाजादिभावनया इतिकर्तव्यतान्तरसापेक्षत्वेऽनवस्थितेतिकर्तव्यतालाभासंभवेनान्ततः क्वचिदिति-कर्तव्यताकाङ्क्षशास्त्रे साकाङ्क्षतयाऽप्रामाण्यं स्यादिति वदन्तं प्रत्याह—नचेत्या-दिना। विशेषेति। अग्निहोत्रत्र्यम्बकनारिष्ठानां धर्मवत्वाविशेषादिति भावः। तेनैव स्वरूपनिष्पादनेनैव। तदभावः आकाङ्क्षाभावः।

प्रकरणाद्भिषेचनीयस्याव्यक्तचोदनाचोदितत्वेन ज्योतिष्टोमविकारत्वात्प्राकृतैरेव धर्मैर्निराकाङ्क्षत्वात्, किंतु प्रकरणाद्राजसूयाङ्गम् ।

ननु 'राजा राजसूयेन स्वाराज्यकामो यजेत' इत्यत्र राजसूयशब्दस्तावन्नामधेयत्वादाख्यातपरतन्त्रो यत्राख्यातं तत्रैव प्रवर्तते । न च दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र यथा दर्शपूर्णमासपदं नामधेयमपि नाख्यातपरतन्त्रम् ; तत्र हि यजेतेत्याख्यातमविशेषात्सर्वानेवप्रकृतानाग्नेयादीन्प्रयाजादींश्चाभिधातुं समर्थं, दर्शपूर्णमासपदं त्वाग्नेयादीनेव वदति न सर्वानंतश्च न तदाख्यातपरतन्त्रं तथा राजसूयपदमपि किं न स्यादिति वाच्यम् । प्रसिद्धेन हि पदेनाप्रसिद्धं निर्णीयते । यथाहुः—

पदमज्ञातसंदिग्धं प्रसिद्धैरपृथक्श्रुति ।
निर्णीयते निरूढं तु न स्वार्थादपनीयते ॥ इति

दर्शपूर्णमासपदं च कालनिमित्तम्, तद्योगश्चाग्नेयादिपूत्पत्तिवाक्यैरवगतः । अतस्तद्वाचित्वेन दर्शपूर्णमासपदं प्रसिद्धम् । न च आग्नेयादीनां बहुत्वाद्विवचनान्तत्वमस्यानुपपन्नमिति वाच्यम् । विद्वद्वाक्यद्वयसिद्धसमुदायद्वयाभिप्रायेण तदुपपत्तेः ।

एवं च दर्शपूर्णमासपदस्याग्नेयाद्विवाचित्वे निर्णीते यजेतेत्याख्यातमपि तानेव वदति । नहि तदुक्तौ स्वार्थत्यागो भवति । राजसूयपदं त्वनिर्णीतार्थम्, अतस्तदाख्यातपरतन्त्रमेव । तच्चाविशेषात्सर्वेषु इष्टिपशुसोमेषु विद्यते तत्परतन्त्रत्वाद्राजसूयपदमपि तानेव वदति ।

न च राज्ञसूयशब्दस्य राजा सूयते यत्रेति व्युत्पत्त्या सोमाभिषवनिमित्तत्वात्तस्य च सोममभिषुणोतीति वाक्येन सोमयागेऽवगतत्वात्तद्वाचित्वमेव नेष्टिपशुवाचित्वमिति वाच्यम् । न ह्यभिषेचनी-

---

विद्वदिति । निरूपितमेतदधस्तादस्माभिः ।

राजसूयपरस्यापि योगेन सोमयागमात्रविषयत्वान्नाख्यातपारतन्त्र्येण सर्वयागवाचित्वमत आह—नचेति । क्रियात्मन्यभिषवे यागनिरूपिताधेयत्वस्य मुख्यस्यासंभवात्ततप्रयोगमध्येऽनुष्ठीयमानत्वेन तदाधेयत्वं वाच्यम् । यश्च सोमयागमध्येऽनुष्ठीयते क्रियत एवासाविष्टिपशुसोमयागप्रयोगमध्येपीति योगसाधारण्यसंभवेन केषां चित्प्राधान्यत्यागे उचितइति संभवन्तमपि परिहारं स्पष्टत्वादुपेक्ष्य प्रौढ्या परिहारान्तरमाह—नहीति ।

यादिसोमयागेष्वभिषवः प्रत्यक्षेण वाक्येन चोदितोऽस्ति तद्वाक्यस्य ज्योतिष्टोमे सत्त्वात्। अतिदेशात्तत्संबन्धोऽवगत इति चेन्न। अतिदेशस्य फलसंबन्धोत्तरकालीनत्वेन राजसूयेन स्वाराज्यकामो यजेतेत्येतद्वाक्यार्थावगत्युत्तरकालीनत्वात्। अनेन हि वाक्येन फलसंबन्धे बोधिते पश्चात्कथंभावाकाङ्क्षायामतिदेशकल्पनात्। अतस्ततः प्रागेव एतद्वाक्यार्थो वर्णनीयः। तदा चाभिषवस्यानवगतत्वाद्राजसूयपदमप्रसिद्धार्थमेव। अत एव राजसूयपदमन्युत्पन्नमश्वकर्णशब्दवदित्युक्तं सांप्रदायिकैः।

एवं चाप्रसिद्धार्थत्वेनाख्यातपरतन्त्रत्वाद्राजसूयपदेनेष्टिपशुसोमयागा उच्यन्ते। ते च तैस्तैः प्राकृतैर्धर्मैर्निराकाङ्क्षा इति न प्रकरणं विदेवनादीनां राजसूये विनियोजकम्, उभयाकाङ्क्षाया अभावात्। न च प्रातिस्विकरूपैर्नैराकाङ्क्ष्येपि न राजसूयत्वेन रूपेण नैराकाङ्क्ष्यमिति वाच्यम्। आकाङ्क्षाद्वये प्रमाणाभावात्।

किं च प्रातिस्विकरूपैर्या कथंभावाकाङ्क्षा सापि फलसंबन्धोत्तरकालम्। सा च राजसूयत्वेन न तु प्रातिस्विकरूपैः। राजसूयत्वेन च फलसंबन्धे उत्पन्नायाः कथंभावाकाङ्क्षाया विदेवनादिभिः

प्रातिस्विकातिदेशैस्तत्तत्प्रधानापूर्वकथंभावोपशमेऽपि फलापूर्वापरपर्यायराजसूयापूर्वकथंभावानुपशमात् संभवति तदात्मना प्रकरणेन विदेवनादिग्रह इतिवदन्तं भवदेवं प्रत्याह—नचेति। भावनाहीतिकर्तव्यतामपेक्षते नापूर्वम्। नच तत्तद्यागभावनाभ्यो राजसूयभावनान्यास्ति यत आकाङ्क्षाभेदः स्यात्। उत्पत्तिविध्यवगतानामेव भावनानां प्रधानविधिना फलसंबन्धबोधनादित्याशयः।

नन्वेकस्या अप्युपनयनभावनाया इतिकर्तव्यतात्वेन तत्तद्गृह्यसूत्रोक्तधर्माणां तत्तच्छाखाध्ययनाङ्गभूतोपयनव्यक्तिषु व्यवस्थेति न्यायसुधायामभ्यधादि। 'ततश्चैकापि भावना स्वकरणतावच्छेदकतत्तद्गृह्यसूत्रोक्तत्वरूपभेदेनानेककथंभावाकाङ्क्षावतीत्यभ्युपेयम्। अन्यथा व्यवस्थाऽनेकेतिकर्तव्यतास्वीकारानुपपत्तेः। तद्वत्प्रकृतेऽपि तत्तद्यागत्वराजसूयत्वाख्यकरणतावच्छेदकरूपभेदेनाकाङ्क्षाभेदः स्यादत आह—किंचेति। प्रातिस्विकरूपैः प्रत्येकसमाप्ता। कालमित्यनन्तरं वाच्येति शेषः। च एवार्थे। सैव राजसूयत्वावच्छिन्ना फलवाक्ये प्रतीयते नतु

---

१. स्वरूपेति पाठः।

शान्तेरतिदेशकल्पनमेव न स्यात्। यदि हि सामान्यरूपेण प्रातिस्विकरूपेण च फलसंबन्धविधायि वाक्यद्वयं भवेत्तदा युज्येतापि आकाङ्क्षाद्वयानुसारेण विदेवनादीनामातिदेशिकानां चाङ्गानां संबन्धः। न तु तदस्ति। तस्मात् प्राकृतैर्धर्मैर्नैराकाङ्क्ष्यान्न विदेवनादीनां प्रकरणं विनियोजकमिति चेत्—

सत्यम्। अत एव सांप्रदायिकैर्विदेवनादीनां संदंशो दर्शितः। राजसूयत्वपुरस्कारेण ये धर्मा विधीयन्ते 'राजसूयाय द्यूतेन उत्पुनाति' इत्येवमादयस्तन्मध्ये विदेवनादयः पठ्यन्ते। अतस्ते सर्वे राजसूयाङ्गं प्रयाजानुवादेन विधीयमानधर्ममध्ये पठितप्रयाजाङ्गाभिक्रमणवत्। तस्माद्युक्तमुक्तं विदेवनादीनां प्रकरणाद्राजसूयाङ्गत्वमिति। तत्सिद्धं प्रकरणस्य स्थानाद्बलीयस्त्वमिति॥

प्रातिस्विकरूपावच्छिन्ना। नत्वेतावता प्रातिस्विकरूपावच्छिन्नाकाङ्क्षातो राजसूयत्वावच्छिन्नाऽन्यास्तीत्यर्थः। दृष्टान्ताद्वैषम्यं द्योतयन् व्यतिरेकमुखेनोक्तमर्थमुपपादयति—यदि हीति। एकापि द्युपनयनभावना तत्तद्द्रव्यविधिभिर्विधीयमाना तत्तच्छाखाध्ययनरूपाणि विभिन्नभाव्यानि स्वीकृत्य विभिन्नभाव्यनिरूपिता विभिन्नाः करणता उपनयनगता आक्षिपति, विभिन्नकरणतानिर्वाहाय च विभिन्नकर्थभावाकाङ्क्षाभिर्युज्यत इति युक्तम्। न चैवं प्रकृते सामान्यविशेषरूपावच्छिन्नकरणताभेदसाधकस्तन्निरूपकफलभेदोऽवगम्यते। सन्नप्यपूर्वभेदः शास्त्रावगतफलकरणतानिर्वाहकव्यापारकोटिनिक्षिप्तः परस्परसापेक्षाश्रितश्च न करणताभेदं कल्पयितुमलम्। अतश्च या एवोत्पत्तिवेलायां प्रत्येकगामिन्यः करणतास्ता एव संगृह्योच्यन्ते 'राजसूयेन' इति। या एव तत्प्रयुक्ता विभिन्नाकाङ्क्षास्ता एव फलसंबन्धोत्तरं सकृदुल्लिख्यन्ते 'कथम्' इति। उक्तं चाहर्गणे क्वचिदहन्युद्वात्रपच्छेदेनाहर्गणावृत्तिरिति सिद्धान्तसिद्धये षष्ठे—ईदृशे विषये साधनानां फले समुच्चयो न समुचितानां साधनत्वमिति। उक्तं चापूर्वाधिकरणान्ते मिश्रैः—भिन्नापूर्वप्रयुक्तान्यपि संनिपातितदितराणि अङ्गान्येकेनैव कर्थभावेन गृह्यन्त इति। अतो न राजसूयत्वेनाकाङ्क्षान्तरमवलम्ब्य विदेवनादिविनियोजकप्रकरणसमर्थनं संभवतीत्याशयः। किं विनियोजकप्रकरणोन्नायक इति संदंश इत्यादिः (?)। निवृत्ततयाऽवगतोऽपि हि राजसूयकर्थभावः पूर्वोत्तरवाचनिकाङ्क्षैरेवोन्नीयते। प्रकरणसमाख्याविरोधे तु पौरोडाशिकसमाख्यातब्राह्मणाम्नातानां

देशसामान्यं स्थानम्। तच्च द्विविधम्। पाठसादेश्यमनुष्ठानसादेश्यं चेति। यथाहुः—

तत्र क्रमो द्विधैवेष्टो देशसामान्यलक्षणः।
पाठानुष्ठानसादेश्याद्विनियोगस्य कारणम्॥ इति।

स्थानं क्रमश्चेत्यनर्थान्तरम्। पाठसादेश्यमपि द्विविधम्। यथासङ्ख्यपाठः सन्निधिपाठश्चेति। तत्र ऐन्द्राग्नमेकादशकपालं निर्वपेत्, वैश्वानरं द्वादशकपालं निर्वपेदित्येवं क्रमविहितेष्टिषु इन्द्राग्नी रोचनादिव इत्यादीनां याज्यानुवाक्यामन्त्राणां यथासङ्ख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवं यो विनियोगः स यथासङ्ख्यपाठात्।

प्रथमपठितमन्त्रस्य हि कैमर्थ्याकाङ्क्षायां प्रथमतो विहितं कर्मैव प्रथममुपतिष्ठते समानदेशत्वात्।

प्रयाजादीनां समाख्याप्राप्तमपि केवलौषधयागाङ्गत्वं दूरीकृत्य प्रकरणेन सान्नाय्योपांशुयाजार्थत्वसिद्धिः।

देशेति। प्रधानविपरिवृत्तिविशिष्टदेशवृत्तित्वमिति यावत्। तेन सामान्यशब्देन प्राथम्यादिसादृश्यविवक्षायामभिन्नदेशत्वासंग्रहः, अभेदविवक्षायां सदृशदेशत्वासंग्रह इति परास्तम्। वृत्तित्वं च पठितत्वानुष्ठेयत्वान्यतररूपेण विवक्षणीयमित्याशयेनाह—तच्चेति। तत्रेति। पञ्चम्यन्तस्य द्विधैवेत्यनेनान्वयः। नात्र विधेये लक्षणद्वैविध्ये प्रति पञ्चमप्रमेयमुद्देश्यमिति द्योतयितुं क्रमं विशिनष्टि—विनियोगस्येति। आचार्यैः क्रमलक्षणत्वेनोक्तस्य कथं भवता स्थानलक्षणत्वमवाद्यत आह—स्थानमिति। प्रधानविपरिवृत्तिवैशिष्ट्यं पाठदेशस्य द्वैधोपपादयति—पाठेति। स इति। नच याज्यानुवाक्यासमाख्यासहितलिङ्गादेवास्य विनियोगस्य सिद्धेः क्रमस्यार्किंचित्करत्वम्, स्वप्रकाश्यदेवतायोगिन्यक्रमपठिते यागान्तरेऽपि मन्त्राणां क्रमं विना ताभ्यामङ्गत्वप्रसङ्गात्। समाख्यातः पूर्वप्रवृत्तक्रमवशेन तु निर्ज्ञातसामान्यसंबन्धोपजीवने भवति लिङ्गादुक्तविनियोगसिद्धिः। नचैवं याज्येतिसमाख्याया अकिंचित्करत्वम्। आग्नेयक्रमे पठितस्याग्नेयमन्त्रद्वयस्य लिङ्गादुक्तविधात् सामिधेनीत्वे प्रधानयाज्यात्वे च प्रसक्ते तया याज्यात्वनियमनात्। अन्यदेवत्ययागक्रमे पठितानामाग्नेयमन्त्राणां तु समाख्याबाधेन लिङ्गक्रमाभ्यां सामिधेनीकार्य एव विनियोग इति बोध्यम्।

यानि तु वैकृतान्यङ्गानि प्राकृताङ्गानुवादेन विहितानि संदंशापतितानि तेषां विकृत्यर्थत्वं सन्निधिपाठात्। तेषां हि कैमर्थ्याकाङ्क्षायां फलवद्विकृत्यपूर्वमेव भाव्यत्वेन संबध्यते, उपस्थितत्वात्। अत एव तेषु न विश्वजिन्न्यायावतारः। स्वतन्त्रफलार्थत्वे विकृतिसन्निधिपाठानर्थक्यापत्तेश्च।

पशुधर्माणामग्नीषोमीयार्थत्वमनुष्ठानसादेश्यात्। औपवसथ्येऽह्नि अग्नीषोमीयः पशुरनुष्ठीयते तस्मिन्नेव दिने ते धर्माः पठ्यन्ते। अतस्तेषां कैमर्थ्याकाङ्क्षायामनुष्ठेयत्वेनोपस्थितं पश्वपूर्वमेव भाव्यत्वेन संबध्यते। अतो युक्तमनुष्ठानसादेश्यात्तदर्थत्वं तेषाम्।

न च पाठसादेश्यादेव तत्किं न स्यादिति वाच्यम्। अग्नीषोमीयस्य पशोः क्रयसन्निधौ पाठात्। न च क्रयसन्निधौ तस्य पाठे तदनुष्ठानमपि तत्र स्यादिति वाच्यम्। 'स एष द्विदैवत्यः पशुरौपवसथ्येऽहनि आलब्धव्यः' इति वचनात्तदनुपपत्तेः। न च स्थानात्प्रकरणस्य बलीयस्त्वेन पशुधर्माणां ज्योतिष्टोमार्थत्वमेव किं न स्यादिति वाच्यम्। तस्य सोमयागत्वेन पशुधर्मग्रहणेऽयोग्यत्वात्। अतः 'आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्' इति न्यायात्, स्थानात्पशुयागार्थत्वमेव धर्माणां युक्तम्।

प्राकृतेति। तत्कार्ये न विहितानीत्यर्थः। न्यायसुधाकृन्मते तु यथाश्रुतमेव साधु। संदंशेति। प्राकृताङ्गसंबद्धाङ्गविध्योस्तादृशाङ्गप्रधानविध्योर्वा मध्ये न पतितमित्यर्थः।

नन्वाग्नेयमजमग्निष्टोम आलभेतेत्यौपवसथ्येहनि सवनीयोत्पत्तेः पाठसादेश्यात्तदङ्गभूता धर्माः किमिति न स्युरत आह—नचेति। तत्पश्चपूर्वार्थत्वम्। मुख्यापठितेनानुपादेयविधेयभूतकपालसंबन्धेनाश्निनं ग्रहं गृहीत्वेति वचनेनोत्पन्नं सवनीययागमनूद्यानेन वचनेन वपया प्रातःसवने चरन्तीत्याद्येकवाक्यतापन्नेनोपादेयप्रचारविप्रकर्षाख्यगुणविधानान्नात्रोत्पत्तिः सवनीयस्येत्याशयः। अग्नीषोमीयं प्रत्येव तर्हि पाठसादेश्यादङ्गत्वं स्यात्तत्राह—अग्नीषोमीयस्येति। यदि सोमयागः प्रकरणेन पशुधर्मान् ग्रहीतुं न शक्नोति तर्ह्यानर्थक्यतदङ्गन्यायेन तदीयसकलपशुयागाङ्गत्वं तेषां स्यादित्याशङ्क्याह—अत इति। स्थानाख्यमानानुरोधेन न्यायबाध एवोचित इत्याशयः।

न च तेषां तदर्थत्वं प्रकरणादेव किं न स्यादिति वाच्यम्। अग्नीषोमीयकर्मभावाकाङ्क्षायाः क्लृप्तोपकारैः प्राकृतधर्मैरेवोपशान्तत्वात्। स हि सान्नाय्ययागप्रकृतिकः, उभयोः पशुप्रभवद्रव्यत्वसामान्यात्। तदुक्तं—

'सान्नाय्यं वा तत्प्रभवत्वात्' इति।

सान्नाय्यं दधिपयसी। तत्र पशुयागः पयोयागप्रकृतिकः साक्षात्पशुप्रभवत्वात्। अतश्चोदकप्राप्तैस्तद्धर्मैर्निराकाङ्क्षत्वान्न पशुयागे धर्माणां प्रकरणं विनियोजकं किं तु स्थानमेव। तदेवं निरूपितः संक्षेपतः स्थानविनियोगः।

तच्च समाख्यातः प्रबलम्। स्थानविनियोगे हि पदार्थयोर्देशसामान्यलक्षणः संबन्धः प्रत्यक्षः। समाख्याविनियोगे तु संबन्धो न प्रत्यक्षः। पदार्थयोर्भिन्नदेशत्वात्। न च सा संबन्धवाचिका। यौगिकानां शब्दानां द्रव्यवाचकत्वेन संबन्धावाचकत्वात्। तथा हि—समाख्या संबन्धसामान्यवाचिका स्यात्, तद्विशेषवाचिका वा? नाद्यः; तदुक्तौ प्रयोजनाभावात्, सर्वयौगिकशब्दानां पर्यायतापत्तेश्च। द्वितीयेऽवश्यं संबन्धिनौ वाच्यौ, तदन्तरेण संबन्धे विशेषाभावात्। तत्प्रतिपत्तिमन्तरेण तदप्रतिपत्तेश्च। अतश्चावश्यं संब-

---

उभयोः प्रकृतिविकृतियागहविषोः। किमेकस्मिन् कर्मणि दधिपयसोर्विध्यन्तद्वयातिदेशं ब्रवीषि नेत्याह—तत्रेति।

द्रव्यवाचकत्वेनेति। विशेष्याभिमतमत्र द्रव्यशब्दार्थः। एवमुदाहरिष्यमाणवार्तिकेऽपि। स्वतो व्यवहारायोग्यमपि सामान्यं विशेषाक्षेपेण तद्योग्यत्वात्प्रयोजनवद्भवेत्तत्राह—सर्वेति। गोमान् गोत्वं गव्यमित्यादीनामित्यर्थः। तदन्तरेण संबन्ध्यभिधानमन्तरेणविशेषस्याभावादप्रतीतेः। गोमानित्यत्रैव हि मतुपा पुरुषाभिधाने भवति स्वामित्वधीः। देशाभिधाने त्वधिकरणत्वधीः। उभयानभिधाने तु न कोऽपि संबन्धविशेषः प्रतीयेतेत्याशयः। नन्वौपगवाग्नेयुगव्यगोत्वादिशब्दानां तावत्प्रतीत्यनुशासनवशेन प्रकृत्यर्थनिरूपितापत्यत्वदेवतात्वविकारत्ववृत्तित्वाख्यसंबन्धविशेषवाचित्वमसत्यपि संबन्ध्यन्ताभिधाने शक्यत एव वक्तुम्। गोमानित्यत्रापि विशेष्यविशेषे तात्पर्यग्राहकत्वेन पराभिमतं यच्चैत्रादिपदं तत्सहकृतेन मतुपा शक्यत एव संबन्धविशेषाभिधानमत आह—तदिति। यथैव स्नुषादिशब्दे भार्यान्वयप्रतिपत्तिमनपेक्ष्य पुत्राद्यप्रतिपत्तेर्न तन्मात्रवाचित्वं

न्धिवाचकत्वं समाख्याया वक्तव्यम्। तथा च न संबन्धवाचकत्वं संबन्धिप्रतिपत्त्यैव वाक्यार्थप्रतिपत्तिन्यायेन तत्प्रतिपत्तिसंभवे तत्र शक्तिकल्पने गौरवात्। यथाहुः—

सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते।
नहि संबन्धवाचित्वं संभवत्यतिगौरवात्॥ इति

तथा

पाकं तु पचिरेवाह कर्तारं प्रत्ययोऽप्यकः।
पाकयुक्तः पुनः कर्ता वाच्यौ नैकस्य कस्य चित्॥ इति।

तथाच समाख्या न संबन्धवाचिका। होतृचमस इत्यादिका तु वैदिकीसमाख्या निषादस्थपतिशब्दवन्न षष्ठ्यर्थसंबन्धवाचिका। नापि वाक्यवत्तद्बोधिका, तस्याः पदत्वेनाप्रमाणत्वात्। पौरोडाशिकमित्यादिसमाख्यास्त्वतिदुर्बलाः। लौकिकत्वेन पुरुषप्रत्ययसापेक्षत्वात्। काण्डगोचरत्वेन तत्तत्पदार्थागोचरत्वाच्च। काण्डवाचकत्वमपि न काण्डत्वेन किं तु पौरोडाशिकत्वादिनैव। न ह्येकहायनीशब्दो द्रव्यवाचकोऽपि गोत्वेन तद्वदति, किं तर्हि एकहायनीत्वेनैव।

स्थानविनियोगे तु पदार्थयोर्विशेषपुरस्कारेणैव संबन्धः प्रत्यक्षप्रमाणप्रतिपन्नः। अतश्च समाख्यामुपलभ्य नूनमनयोः पदार्थयोः संबन्धोऽस्तीति यावत्कल्प्यते तावत्प्रत्यक्षप्रतिपन्नेन संबन्धेन परस्परमाकाङ्क्षा, तदभावे च संबन्धानुपपत्तेः। कल्पितसंबन्धेन च यावदितस्त्राकाङ्क्षादिकल्पना तावदन्यत्राकाङ्क्षया वाक्यादिकल्पनया विनियोगः क्रियते इति सिद्धं स्थानस्य समाख्यातः प्राबल्यम्। अत एव शुन्धनमन्नः सान्नाय्यपात्राङ्गं पाठसादेश्यान्न तु पौरोडाशिकसमाख्यया पुरोडाशपात्राङ्गमिति॥

तथा यौगिकशब्देभ्योऽपि संबन्धिप्रतिपत्तिमनपेक्ष्य संबन्धाप्रति पत्तेर्न संबन्धवाचित्वमित्याशयः। तर्हि तद्वदेव विशिष्टवाचित्वं नेत्याह—अत इत्यादिना।

एवं सर्वसमाख्यासु दौर्बल्यहेतुमभिधाय लौकिकसमाख्याया अतिदौर्बल्यं दर्शयितुं वैदिकसमाख्यादौर्बल्यं स्पष्टयति—होत्रित्यादिना। तुशब्दो वक्ष्यमाणसमाख्यावैलक्षण्यार्थः। नहीति। परमतमवलम्ब्येदम्। वैश्वदेवीपदवत्तद्धितबहुव्रीह्यादेर्विशेषवाचित्वे तु पदान्तरसापेक्षार्थबोधकत्वेन दौर्बल्यं समा-

समाख्या यौगिकः शब्दः। सा च द्विविधा वैदिकी लौकिकी चेति। तत्र होतुः चमसभक्षणाङ्गत्वं होतृचमस इति वैदिक्या समाख्यया। अध्वर्योस्तत्तत्पदार्थाङ्गत्वं लौकिक्या आध्वर्यवमितिसमाख्ययेति संक्षेपः॥

तदेवं निरूपितानि संक्षेपतः श्रुत्यादीनि षट् प्रमाणानि। एतत्सहकृतेन विनियोगविधिना समिदादिभिरुपकृत्य दर्शपूर्णमासाभ्यां यजेतेत्येवंरूपेण यानि विनियुज्यन्ते तान्यङ्गानि। तानि द्विविधानि सिद्धरूपाणि क्रियारूपाणि चेति।

तत्र सिद्धरूपाणि जातिद्रव्यसङ्ख्यादीनि। तानि च दृष्टार्थान्येव। क्रियारूपाणि च द्विविधानि। गुणकर्माणि प्रधानकर्माणि चेति। एतान्येव संनिपत्योपकारकाण्यारादुपकारकाणीति चोच्यन्ते। तत्र

ख्यायां बोध्यम्। अस्ति श्रुत्यादिषु सजातीयेष्वपि बलाबलम्। यथाज्यावेक्षणादिषु सामान्यसमाख्याप्राप्तमध्वर्युकर्तृकत्वं विशेषसमाख्याप्राप्तेन यजमानकर्तृकत्वेन बाध्यते। अस्ति चानर्थक्यप्रतिहतत्वे विपरीतमपि बलाबलम्, यद्वशेन मूले पशुधर्माणामग्नीषोमीयार्थत्वमुक्तम्। द्विविधबलाबलाश्रितोऽपि च प्राप्तबाधः शक्यः प्रतिप्रमाणं वक्तुम्। सन्ति चान्येऽपि प्राप्तबाधा यथा—नित्यं पाञ्चदश्यं साप्तदश्येन वैश्यत्वनिमित्तकेन, नित्यश्चमसः काम्यगोदोहनेन, पूर्वनैमित्तिकमुत्तरनैमित्तिकेनेत्यादयः। विस्तरभयादाकरप्रसिद्धत्वाच्च परं नैतन्निरूपणमत्र तन्यत इत्याह—इति संक्षेप इति।

एवंरूपेणेति। नचाङ्गं सत् प्रयोगविधिर्गृह्णातीति प्रातिस्विकविधीनामेव विनियोजकत्वं युक्तं न तदेकवाक्यतापन्नप्रधानविधेरिति वाच्यम्। तादृशवाक्यादङ्गत्वेनावधारितं प्रयोगविधिरनुष्ठापयतीति तदभिप्रायात्। अन्यथा वाक्यादिकल्पनया प्रकरणविनियोजकत्वस्योच्छेदप्रसङ्गात्। तान्यङ्गानीति। क्रत्वङ्गानीत्यर्थः। संख्यादीनीत्यादिना लिङ्गसाहित्यक्रमसंग्रहः। यद्यपि साहित्यक्रमयोर्न कारकत्वं क्रियायां द्रव्यादिवत्, तथापि कारकीभूतपदार्थावच्छेदकतयास्त्येवाङ्गत्वं तार्तीयमानबोध्यम्। पाञ्चमिकमानानि तु क्रमोपस्थिताद्युपयुज्यन्ते न विनियोग इति बोध्यम्। तानि चेति। क्रत्वङ्गभूतानि जात्यादीनीत्यर्थः। तेन खदिरत्वगोदोहनपञ्चवर्षत्वप्रभृतेरदृष्टार्थत्वेऽपि न दोषः। एतान्येवेति। उक्तद्वैविध्यापन्नानि क्रत्वङ्गानीति यावत्। तेन गुणकर्मणोऽप्याधानस्य प्रधान-

कर्माङ्गद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकम्, यथावघातंप्रोक्षणादि। तच्च दृष्टार्थमदृष्टार्थं दृष्टादृष्टार्थं च। दृष्टार्थमवघातादि। अदृष्टार्थं प्रोक्षणादि। दृष्टादृष्टार्थं पशुपुरोडाशयागादि। तद्धि द्रव्यत्यागांशेनादृष्टं देवतोद्देशेन च देवतास्मरणं दृष्टं करोति। इदमेव चाश्रयि कर्म इत्युच्यते।

तच्च सन्निपत्योपकारकं द्विविधम्। उपयोक्ष्यमाणार्थमुपयुक्तार्थं चेति। तत्रावघातप्रोक्षणाद्युपयोक्ष्यमाणार्थं, व्रीहीणां यागे उपयोक्ष्यमाणत्वात्। प्रतिपत्तिकर्म इडाभक्षणाद्युपयुक्तपुरोडाशसंस्कारकम्। उपयुक्तस्याकीर्णकरतानिवर्तकं कर्म प्रतिपत्तिकर्म।

उपयुक्तसंस्कारार्थं च (कर्म) उपयोक्ष्यमाणसंस्कारार्थादुर्बलम्। उपयुक्ता पेक्षया उपयोक्ष्यमाणेऽत्यादरात्। अत एव 'प्रायणीयनिष्कासे उदयनीयमनुनिर्वपती' त्यत्र निष्कासस्य निर्वापार्थत्वं, न तु तस्य तदर्थत्वं, निष्कासस्योपयुक्तत्वादित्युक्तमेकादशे। तच्च सन्निपत्योपकारकमारादुपकारकाद्बलीयः।

नन्ववघातादि भवतु बलीयः, तस्य दृष्टार्थत्वात्, आरादुपकारकस्य चादृष्टार्थत्वात्, दृष्टे संभवत्यदृष्टस्यान्याय्यत्वात्। प्रोक्षणादि सन्निपत्योपकारकं तु कथं बलीयः, उभयोरदृष्टार्थत्वाविशेषात्। किं च आरादुपकारकं साक्षात्प्रधानाङ्गं तस्यान्योद्देशेनाविधानात्।

कर्मणोऽपि दर्शादेर्वक्ष्यमाणद्वैविध्यव्यवहाराभावेन न क्षतिः। कर्माङ्गेति। द्रव्यादिगतं कर्मापूर्वसाधनत्वं यत्रोद्देश्यतावच्छेदकमित्यर्थः। तेन वपनादिवज्ज्योतिष्टोमादेः पुरुषोद्देशेन सत्यपि विधाने निरासिसिद्धिः।

प्रतिपत्तीत्युपलक्षणं सूक्तवाकादिकृतदेवताप्रकाशनादेः। उपयुक्तेति। अर्धान्तं पदद्वयं भावप्रधानं, कर्मेति प्रथमान्तं च षष्ठ्यन्तत्वेन बोध्यम्। तच्चेति। कारकान्तं पदद्वयमपि भावप्रधानम्।

अवघातादीति। तद्गतसंनिपत्योपकारकत्वमित्यर्थः। तस्यावघातस्य संनिपत्योपकारकस्य सत इति शेषः। प्रोक्षणेति। प्रोक्षणादेः संनिपत्योपकारकत्वमित्यर्थः। उभयोः पक्षयोः। नचादृष्टार्थत्वे तुल्येऽपि द्वितीयावशेन संनिपत्योपकारकत्वसिद्धिः, तस्या बल्वजाञ्छिनत्ति खण्डकान् कुर्वित्यादिप्रयोगवशेन साधनवाचित्वात्; असत्यपि तस्मिन्नीप्सितानीप्सितसाधारणत्वेन स्वप्रकृत्यर्थप्राधा-

सन्निपत्योपकारकं तु अङ्गाङ्गम् । कर्माङ्गव्रीह्याद्युद्देशेन विधानात् । अङ्गाङ्गापेक्षया च साक्षादङ्गं बलीयः ।

'अङ्गगुणविरोधे तादर्थ्यात्' इति न्यायात् ।

अत एव 'य इष्ट्या पशुना सोमेन यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेत' इति अविशेषविधानेऽपि पर्वानुग्रहः सोमयागस्यैव क्रियते नतु दीक्षणीयादेः । अतः कथं सन्निपत्योपकारकस्य बलीयस्त्वम् । उच्यते । सत्यप्यदृष्टार्थत्वाविशेषे सन्निपत्योपकारकमारादुपकारकाद्बलीयः । सन्निपत्योपकारके हि कर्मणि उपकार्योपकारकयोर्व्रीहिप्रोक्षणयोः संबन्धो वाक्यक्लृप्तः । उपकारमात्रं तु कल्प्यम् । आरादुपकारकस्थले तु दर्शपूर्णमासयोः प्रयाजानुयाजयोः संबन्धः कल्प्य उपकारोऽपि ।

किं च आरादुपकारकस्थले हि प्रकरणं विनियोजकम्, इतरत्र तु व्रीहीन् प्रोक्षतीति वाक्यमेव व्रीहिपदेनापूर्वसाधनलक्षणां कृत्वा क्रतौ विनियोजकमिति बलीयस्त्वम् ।

यदुक्तम्—'अङ्गगुणविरोधे तादर्थ्यात्' इति न्यायेन दुर्बलत्वमिति तदसत् । नहि व्रीह्याद्युद्देशेन विधीयमानं प्रोक्षणादि तदर्थं भवति

न्यानियामकत्वात्, संनिपत्योपकारकत्वेऽवश्यंभाविप्रकृतिगतापूर्वसाधनलक्षणातोऽसंजातविरोधन्यायेन श्रेयसीं विभक्तिगतसाधनलक्षणां स्वीकृत्यारादुपकारकत्वस्य वक्तुमौचित्याच्च । य इष्टेति । पूर्वदलेन विपरिवर्तमानयागानुत्तरदलस्थयजिनानूद्य समुच्चिताग्निप्रजापतिवद्विकल्पितसंमयद्वयं तल्लक्षितृपर्वसामान्यं चात्र विधीयते । न चेष्टिष्वतिदेशेनैव तल्लाभाद्विधिवैयर्थ्यम्, आग्नेयविकृतौ विकल्पस्य दर्शपूर्णमासविकृत्योः क्रमेण पूर्णमास्यमावास्ययोः सर्वविकृतिषु सद्यस्कालतायाश्चैतद्विधिमन्तरेणालाभात् । क्लृप्त इति भेदः । उपकार्योपकारकभावनियामको धात्वर्थतावच्छेदकीभूतफलाश्रयत्वादिः संबन्धो द्वितीयोक्षत्यादिसमभिव्याहारादुपस्थित इत्यर्थः । कल्प्य इति । तयोर्हि तादृशः संबन्ध ऐकाधिकरण्यादिः । नच स शब्दादुपस्थित इति भावः ।

वाक्यमेवेति । विनापि द्वितीयया स्थाण्वाहुतिवत्प्रोक्षणस्य संस्कारसिद्धेः प्रकृतोदाहरणे तस्या अकिञ्चित्करत्वमभिप्रेत्येदम् । तदर्थमित्यनन्तरमेवेति

---

१ सप्तम्यन्तद्वयमिति पाठः ।

त्वस्वरूपे आनर्थक्यात्, किंतु तत्संस्कारद्वारा क्रत्वर्थमेव, सन्निपत्योपकारकाणामुत्पत्त्यपूर्वप्रयुक्तत्वस्य च वक्ष्यमाणत्वात्। अत उभयविधमप्यङ्गजातं क्रत्वर्थमेवेति नाङ्गगुणविरोधन्यायावतारः। दीक्षणीयादेः पर्वानुग्रहस्तु दीक्षणीयार्थ एव, तस्य तदपूर्वप्रयुक्तत्वात्। अतो युक्तं साक्षात्प्रधानाङ्गेन प्रधानपर्वानुग्रहेण स बाध्यत इति। तत्सिद्धं सन्निपत्योपकारकस्यारादुपकारकाद्बलीयस्त्वम्।

अतएव स्थाणौ स्थाण्वाहुतिं जुहोतीति विहिता स्थाण्वाहुतिर्यूपत्रश्चनस्थाणुद्वारा यूपसंस्कारार्था, देवदत्तधारिताया: स्रजः शुचिदेशनिधानमिव देवदत्तसंस्कारार्थम्। न तु स्थाण्वाहुतिरारादुपकारिकेत्युक्तं दशमे इति दिक्।

द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म आरादुपकारकम्। यथा प्रयाजादि। तदेवं निरूपितं द्विविधमप्यङ्गजातम्। तच्च न यागादिस्वरूपप्रयुक्तं, स्वरूपे आनर्थक्यात्, तदन्तरेणापि तत्सिद्धेः, किं त्वपूर्वप्रयुक्तमेव। नहि तदन्तरेणापूर्वं भवतीत्यत्र किंचित्प्रमाणमस्ति, तस्यादृष्टत्वात्।

न चैवं प्राधान्यादृष्टत्वाच्च फलप्रयुक्तमेव किं न स्यादिति वाच्यम्। फलभावनायां यागस्यैव करणत्वादङ्गानां च करणानुग्राहकत्वात्तदर्थत्वे बुद्धे तत्र चानर्थक्यप्रसक्तौ तेन स्वापूर्वमेवोपस्थाप्यते संनिकर्षात्, दीक्षणीयादिशब्देनेव तदपूर्वम्। न तु फलमुपस्थाप्यते विप्रकर्षात्। अतो न तत्प्रयुक्तत्वमङ्गानाम्। अत एव 'अगन्म सुवः

शेषः। क्रत्वर्थमित्यनन्तरमपि भवतीति। एवमग्रेऽपि। बलवतापि हि प्रधानाङ्गत्वेन विरोध्यङ्गाङ्गत्वं बाधितुमुचितं नाविरोधि, नच द्वारेदमर्थ्यमपूर्वेदमर्थ्येन विरुध्यत इत्याशयः।

द्रव्यादीति। स्वनिर्वर्तककारकमित्यर्थः। केवलं फलासंयुक्तम्।

बुद्ध इति। संनिपात्यभिप्रायमेतत्। आरादुपकारिणां तु प्रथमं प्रधानभावान्वितानां यद्यपि तद्भावान्वयपूर्वक एव करणान्वयस्तथापि न फलार्थत्वम्। क्षणिककर्मणः कालान्तरभाविफलार्थत्वनिर्वाहायापूर्वे कल्पितेऽपूर्वं पुंव्यापारसाध्यं तदानुपंगिकं तु फलजन्मेत्यधिगतवतश्चेतसि तादर्थ्येनैव कथमितीतिकर्तव्यताकाङ्क्षोत्थानात्।

अङ्गेष्वपूर्वप्रयुक्तत्वनिरूपणस्य फलमाह—अत एवेति। फलप्रयुक्तत्वस्य व्युदासायैवकारो नोहहेतोर्न्यायान्तरस्य। अपेक्षते हि मन्त्रोहो न्यायान्तराणि।

सुवरगन्म ' इति मन्त्रो विकृतावूहितव्य इत्युक्तं नवमे फलदेवतयोश्चेत्यत्र। फलप्रयुक्तत्वे तु सौर्यादिविकृतिषु स्वर्गरूपफलाभावान्मन्त्रो न प्रवर्तेत नतरां चोहितव्यः स्यादिति। तत्सिद्धमङ्गानामन्यप्रयुक्तत्वानुपपत्तेरपूर्वप्रयुक्तत्वम्।

तथाहि—अतिदेशप्राप्तस्य कार्यनिमित्तोऽन्यथाभाव ऊहः। स चतुर्विधः १ संस्कारोहः २ सामोहः ३ प्रयोगोहो ४ मन्त्रोहश्चेति। तत्राद्यो व्रीह्यादौ दृष्टप्रोक्षणादेर्वैकृतनीवारादावनुष्ठानम्। द्वितीयोऽभिवत्यामुत्पन्नरथन्तरादेः कवत्यादावतिदिष्टस्य तदीयसन्ध्यक्षराद्यनुरोधेन प्रदेशान्तरस्थायीभावादिवैशिष्ट्यम्। तृतीयो द्वादशाहिकपार्ष्ठिकद्वितीयाहोविकृतौ द्विरात्रद्वितीयेऽह्नि पत्नीसंयाजान्तत्वत्यागेन कृत्स्नानुष्ठानम्। द्वादशाहे हि अनुत्तमेष्वहःसु भाव्यहःसाहित्याय क्वचित्पदार्थेऽवस्थाने प्राप्ते पत्नीसंयाजान्तान्यहानि संतिष्ठन्ते इति पत्नीसंयाजेषु तन्नियम्यते। अनुत्तमप्रकृतिकमपि च द्विरात्रद्वितीयं स्वयमुत्तममिति न पत्नीसंयाजान्तत्वं लभते। चतुर्थस्त्वष्टविधः १ प्रकृतिमात्रोहः यथा सूर्याय जुष्टमिति; यथा वा द्विपशुकगणे द्विपंचाशदनयोर्वङ्क्रय इति। यथा वा षट्त्रिंशत्संवत्सरे तरसमयपुरोडाशे पेषणार्थाधिवापमंत्रस्य धान्यमसीत्यस्य मांसमसीति। यद्यपि प्रकृतौ प्रकृतिवाचिना धान्यशब्देन लक्षणया विकारप्रकाशनमकारि तथापि विकृतौ मृगोऽसीति लाक्षणिकप्रयोगो न कार्यः। प्रकृतौ लक्षणाया आर्थिकत्वात्। इह च स्वायत्ते शब्दप्रयोगे तस्या अन्याय्यत्वात्। स्यादेतत्। तरसमयाः सवनीयाः पुरोडाशा इत्यत्र सवनीयोद्देशेन तरसत्वं विधेयं पुरोडाशपदं तु धानादिषु लिंगसमवायेनेत्युक्तं तृतीयान्ते। असंभवत्तरसमयत्वे धानादिसाहचर्याच्च न पुरोडाशे तरसप्रकृतिकत्वविधिः। पुरोडाशकार्ये तद्विधिना पुनः पुरोडाशे निवृत्ते चरावित्र पेषणनिवृत्तौ नाधिवापो नतरां मंत्र इति चेत्। अत्राहुः—तरसमयपुरोडाशापावृत्त्या सर्वामृद्धिमाप्नोदिति न्यायसुधोद्धृतच्छांदोग्यवचसि सवनीयपदाश्रवणात् पुरोडाशमात्रप्रकृतित्वेन मांसं विधीयते। शक्यते चान्नमिश्रणेन तस्य प्रकृतित्वं संपादयितुम्। उक्तं च छन्दोगसूत्रे—' तरसं पुरोडाशं चान्नसंरोधात् ' इति संभवति च तथाविधौ न पुरोडाशबाधः समुचितः। तदबाधे चोक्तमंत्रस्य घटत एवोक्तिरिति। अन्ये तु पेषणस्यैवासंभवात् कृत्वाचिन्तयैवोक्तिरित्याहुः। २ लिंगमात्रोहः यथा 'वस्व्यसिरुद्रासि ' इति मंत्रस्य साण्डे क्रयार्थं विहिते ' वसुरसि रुद्रोसि ' इति। ३ वचनमात्रोहः यथा ' छागस्य वपाया मेदसः ' इत्यस्य प्राजापत्येषु छागानामिति।

नचैवं पत्नीं संनह्येत्यस्य द्विपत्नीकविकृतिप्रयोगे ऊहः स्यादिति शंक्यम्। प्रकृतिद्विपत्नीकप्रयोगेऽसमवेतार्थकत्वात्। नच व्रीहीणां मेधेत्यस्य यवप्रयोग इव द्विपत्नीकप्रयोगे तस्य मंत्रस्याप्रवृत्तेर्नासमवेतार्थत्वापत्तिः। गुणभूतवचनानुरोधेन प्रधानप्रकृतेः प्रवृत्त्यप्रतिबन्धात्। नैवम् 'अदितिः पाशान्' इत्यस्य द्विपशुकेऽनूहापत्तिः। बहुवचनस्य द्वयोरसाधुत्वात्। **प्रकृतिलिंगयोरूहो** यथा—'अग्नये जुष्टम्' इत्यस्य 'अदित्यै जुष्टम्' इति। **प्रकृतिवचनयोरूहो** यथा तस्यैव 'विश्वेभ्यो देवेभ्यः' इति। **लिंगवचनयोरूहो** यथा प्रास्मा अग्निमित्यस्य स्त्रीपशुगणे 'प्राभ्यः' इति। क्वचित्रयाणामूहो यथा 'आपोदेवीरग्रे' इति प्रोक्षण्यभिमंत्रणमंत्रस्य 'घृतं प्रोक्षणं भवति'इतिविधियुक्तविकृतौ घृतदेवाग्र इति। क्वाचित्तु सकलपदाभ्यासः। यथा पशुगणे 'एकधास्य त्वचम्' इति मंत्रस्यैकधैकधेति।

सर्वोऽप्ययं **मन्त्रो**हः षड्विधन्यायमपेक्षते। मन्त्रा अर्थप्रकाशनार्था नोच्चारणेनादृष्टार्था **इत्येकः**, मुख्यार्थ एव तेषां विनियोगो न गौण इति **द्वितीयः**, अपूर्वसाधनत्वप्रयुक्ता नत्वन्यादिस्वरूपप्रयुक्ता इति **तृतीयः**, प्रकृतौ समवेतार्था न तु सवित्रादिपदवदसमवेतार्था इति **चतुर्थः**, तथा स्वार्थपरा नतु 'येयज्ञपतिंवर्धान्' इतीडानिगदस्थयजतिपदवत्परार्था इति **पञ्चमः**, पञ्चविधमानान्यतरप्रमानेन वैकृतदेवतादेः प्राकृतदेवतादिकार्यापत्तिनिर्णय इति **षष्ठः**। तानि चाहुर्वृद्धाः—

प्रत्यक्षविधिनाऽभावे विधानेन विकारतः।
स्वशब्दाच्च निषेधानुवादात्तत्कार्यकारिता—इति।

तत्र 'नैवारश्चरुर्वार्हस्पत्यः' इत्यत्र नीवाराणां व्रीहिकार्यापत्तिः प्रत्यक्षसहितात्तद्विधेरवगम्यते। दृश्यते हि नीवारेभ्यो हविर्निष्पत्तिर्न्नतु श्रूयते, नैवारमिति ताद्धितस्य संबन्धमात्राभिधायित्वात्। सत्रायागूर्य विश्वजिता यजेतेत्यत्र विश्वजितः सत्रकार्यापत्तिः, अभावे विधानात्। अस्य हि विश्वजितो वाक्यशेषात्सर्वेभ्यो देवेभ्य आत्मानमागुरते यः सत्रायागुरत इत्यादेः सत्रे प्रवृत्तस्य केनचिद्धेतुना तदसंभवे तत्कार्ये विधानं प्रतीयते। अत एवेहाऽनुमितनिषेधानुमितशब्दात् कार्यापत्तिरिति व्यवहारः। नखावपूतानां चरुरित्यत्र नखानामुलूखलमुसलकार्यापत्तिर्विकारलिङ्गकानुमानात्। अवघातकार्ये हि तुषविमोकाख्यं नखावपवनात्पश्यतां भवत्यनुमानम्—नखा उलूखलमुसलयोः कार्ये वर्तन्त इति। परिधौ पशुं नियुञ्जीतेत्यत्र परिधेर्यूपकार्यापत्तिः प्रत्यक्षात्कार्यवाचिनो नियुञ्जीतेति शब्दात्। नच स्वधर्मविशिष्टत्रैधातव्यां दीक्षणीयाकार्ये विहितायामपि यथा न

तत्रापि सन्निपत्योपकारकाणां द्रव्यदेवतादिसंस्कारद्वारा याग-स्वरूपे उपयोगादुत्पत्त्यपूर्वार्थत्वम् । अत एवौषधिधर्मावघातादीना-

---

दीक्षणीयाधर्मलाभः, तथा परिधौ न यूपधर्मप्राप्तिरिति किं कार्यापत्त्येति वाच्यम् । दृष्टादृष्टार्थत्वेन वैषम्यात् । ऐरं कृत्वोद्वेयमित्यत्रेरापदस्य गिरापदकार्यापत्तिर्न गिरागिरेति ब्रूयादिति निषेधानुवादकल्पिताच्छन्दादिति ।

यागस्वरूप इति । संनिपातिविध्युद्देश्यबोधकं व्रीह्यादिपदं यागस्वरूपघटितशक्यसंबन्धेनापूर्वलक्षणायै प्रवृत्तं संनिकर्षादुत्पत्त्यपूर्वमेव लक्षयतीत्याशयकमेतत् । तेनोत्तरसंनिपातिनां तत्रानुपयोगेऽपि न क्षतिः । स्वरूपग्रहणेन एकैकयागंस्वरूपोपयोगिन एवोत्पत्त्यपूर्वार्थत्वं न समुदायसंस्कारार्थस्य पार्वणहोमादेरपि, तस्य तु समुदायापूर्वार्थत्वमेव युक्तमिति द्योत्यते ।

अथ नैवापूर्वं सप्रमाणं दूरत एव तद्विशेषप्रयुक्तत्वं धर्माणामिति । नैवं, विनष्टस्य स्थायिव्यापारेणैव कालान्तरभाविफलारम्भकत्वात् । दृश्यते हि घृतपानादेर्धातुसाम्यव्यापारेण स्वास्थ्यजनकत्वम् । नच ध्वंसेनैवान्यथासिद्धिरसत्यपि तस्य वैजात्ये करणवैजात्यादेव फलवैजात्योपपत्तिरिति शङ्क्यम् । ध्वंसतत्प्रतियोगिनोरेकत्राजनकत्वनियमात् । धर्मः क्षरति कीर्तनादिति शास्त्रानुपपत्तेश्च । नहि नष्टक्रियाया नाशस्य वा शक्यते कीर्तननाश्यत्वं वक्तुम् । शक्यते त्वपूर्वस्य । एतेनापूर्वस्थाने कृतयाग आत्मैवाभिषिच्यतामिति निरस्तम् । नच धर्मपदाभिधेयक्रियायाः कीर्तननाश्यत्वासंभवेन धर्मपदेऽपूर्वलक्षणापत्तिः, तद्वरं जघन्ये क्षरतिवाताै प्रतिबन्धलक्षणामेवाश्रित्य कीर्तनस्य प्रतिबन्धकत्वाश्रयणमिति शङ्क्यम् । प्रतिबन्धस्यापि व्यापारमन्तरेण कीर्तनेनानुदयात् । ध्वंसस्य प्रतिबन्धकत्वे भावियागादपि फलानुदयापत्तेः । यस्य कीर्तनं तदीयफलप्रतिबन्धः शास्त्रार्थ इति चेत् । न । तदीयफलाप्रसिद्धेः । कीर्तनेन धर्मो निष्फलो भवतीति शास्त्रेणोक्ते प्रतिबन्धनिर्वाहकापूर्वान्तरकल्पनागौरवपरिजिहीर्षयाऽर्थाद्धर्मापूर्वनाशकत्वाश्रयणाच्च न धर्मपदे लक्षणापत्तिः । असति चापूर्वे पुण्यदानशास्त्रानुपपत्तिः । नहि विनष्टक्रियाया अनुत्पन्नफलस्य वा दानसंभवः । धर्मापूर्वतुल्यन्यायत्वेनाधर्मापूर्वानङ्गीकारे च 'प्रायश्चित्तैरपैत्येनः' इत्यादिशास्त्रानुपपत्तिः । पापफलप्रतिबन्धकत्वाश्रयणे चापैतीतिपदे लक्षणापत्तिः । तस्य नाशवाचित्वात् । कीर्तनस्य धर्मफलप्रतिबन्धकत्वे निर्दिष्टदोषस्य चेह प्रसङ्गः । तथापि देवतानुग्रहनिग्रहाभ्यामेव स्वर्गनरकादिसिद्धेर्नापूर्वकल्पनोचितेति चेत् । न । नखलोमादिदेवत्ये कर्मणि तदसंभवात् । सशरीरतदधिष्ठातृकल्पनायष्टृगतापूर्वकल्पनाया एवोचित-

माज्ये न प्रवृत्तिः, तेषामाग्नेयापूर्वप्रयुक्तत्वात्, आज्यस्य च तदर्थत्वाभावादित्युक्तं तृतीये ॥

त्वात्। ईश्वरीयानुग्रहादेरेव सर्वविहितनिषिद्धव्यापारत्वमिति चेत्। न। प्रतिविध्यत्यन्तानुपस्थितासमवेतव्यापारकल्पनेऽतिगौरवात्। **नन्वेवमपि** परमापूर्वेणैव फलोत्पत्तिर्निर्वाहादुत्पत्त्यपूर्वं निष्प्रमाणकं तादर्थ्यमङ्गानां दूरापास्तम्। नैवम्। उत्पत्तिवाक्येऽवगताया एकैकयागगतनिरपेक्षकरणताया उत्पत्त्यपूर्वमन्तरेणानिर्वाहात्। उत्तराङ्गसहितयागजन्यत्वेनावगतस्य परमापूर्वस्योत्पत्त्यपूर्वं विना यागादुत्पत्त्यसंभवाच्च। असाधारणकार्यकारित्वं विनाऽसाधारणेतिकर्तव्यतास्वीकारायोगाच्च।

कुतः पुनः **समुदायापूर्वसिद्धिः**। पूर्णमास्यां पूर्णमास्या यजेतामावास्यायाममावास्यया यजेतिति वचनयोस्तृतीयाभिहितस्य समुदायान्तरनिरपेक्षयागत्रयगतकरणत्वस्य प्रतियोगिसापेक्षत्वात्। चतुर्होतृपार्वणवैमृधादिजन्यानुग्रहस्य यागत्रयसमुदायागोचरस्य समुदायकार्थ एवोपयोगौचित्याच्च। पूर्णमास्यनुष्ठिताङ्गानां समुदायापूर्वनिष्पादनेनापवर्गेऽमावास्यायां पुनरङ्गानुष्ठानोपपत्तेश्च। बहूनां यागानां विभिन्नसमुदायभावापत्त्यैककार्यकारित्वं विभिन्नसमुदायकार्यद्वारैवोचितम्। बहूनां वर्णानां तत्तत्पदभावापन्नानां पदार्थज्ञानद्वारेण वाक्यार्थबोधजनकत्वदर्शनादिति भवदेवः। उत्पत्त्यपूर्वमिति च नेह शब्दान्तरादिसहकृतेन विधिनाभिनवयागोत्पत्तिं कुर्वता तद्भावनाभाव्यत्वेन ज्ञापितमपूर्वं विवक्षितम्, किन्तु अपूर्वलक्षणादशायां यत्र यत् संनिकृष्टमपूर्वं तदेवेति बोध्यम्। तेन पयःश्रपणादेर्मैत्रावरुणाद्यभ्यासापूर्वार्थत्वेऽपि प्रोक्षण्युत्पवनादेः प्रोक्षणापूर्वार्थत्वेऽपि न क्षतिः। नन्वेवं प्रोक्षणावघातादेर्व्रीहिनियमादृष्टार्थत्वमेव स्यात्। न, तस्य नियमजन्यत्वेन व्रीह्यजन्यस्य व्रीहिपदेन लक्षणायोगात्। व्रीहिजन्यत्वेऽपि अनुद्देश्यकार्यार्थत्वादुद्देश्यकार्यार्थत्वं युक्तमिति आग्नेयापूर्वलक्षणौचित्यात्। यत्र तूद्देश्यकार्यार्थत्वे श्रुतिविरोधस्तत्र भवतु धर्माणां नियमापूर्वार्थत्वम्। बृहद्रथन्तरसाध्यैकपृष्ठमते हि बृहद्रथन्तरयोर्न्यवस्थया विहितानां समुद्रध्याननिमीलनप्रभृतीनां धर्माणां नान्तरेण सामनियमादृष्टशेषत्वं श्रुतव्यवस्थोपपत्तिः। केचित्तु रथन्तरादिविशिष्टापूर्वमेवेह लक्ष्यते, त्रिः प्रथमामन्वाहेत्यत्र प्रथमस्थानविशिष्टापूर्वलक्षणावत्। यदग्नयेचेत्यत्र भट्टमते सायंकालविशिष्टापूर्वलक्षणावदित्याहुः। तच्चिन्त्यम्। नन्वेवमपि प्रयाजे प्रयाजे कृष्णलं जुहोतीतिविहितकृष्णलहोमस्य प्रयाजापूर्वसाधनप्रयुक्तत्वाद्दार्शिकप्रयाजेऽपि कृष्णलापत्तिः। अथानुवादस्य संनिहितगामित्वात् सौर्यप्रयाजेष्वेव तन्निवेशः, तर्हि ज्योतिष्टोमप्रकरणविहितानां ग्रहधर्माणां प्राकरणिकग्रहेष्वेव निवेशः स्यान्नानारभ्यविहितयोरंशदाभ्ययोः। अथ तयोरपि

आरादुपकारकाणां तु स्वरूपेऽनुपयोगात्परमापूर्वार्थत्वम्। तत्रोत्पत्त्यपूर्वस्य यागस्वरूपानुष्ठानानन्तरमेवोत्पद्यमानत्वात् सन्निपत्योपकारकाणां पूर्वाङ्गानां तदुत्पत्तावुपयोगः, उत्तराङ्गानां तु तेषां

तैत्तिरीयशाखायां प्रकरणे विनियोगान्नाप्राकरणिकत्वम्। तथापि चयनप्रकरणे विहितानामखण्डाकृष्णत्वादीष्टकाधर्माणां प्रकरणगतेष्वेव निवेशः स्यात्. नानारभ्य विहितासु चित्रिण्यादिषु। अथैकापूर्वसाधनेषु सर्वेषूपदेशेनैव धर्मप्रवृत्तिः, तर्हि दार्शिकप्रयाजेष्वपि कृष्णलहोमापत्तिः, फलचमसेष्युपदेशेन सोमचर्मसधर्मप्राप्तिश्च स्यात्। मैवम्। प्रयाजरूपेणैव तदपूर्वेणापि प्रकृतौ निर्ज्ञातप्रकारेण कृष्णलहोमशेषित्वं स्वरूपेणानुभवतुमशक्नुवता सौर्यापूर्वसाधनत्वोपहितेनैव तत्स्वीकरणात्। तावता च दार्शिकप्रयाजापूर्वव्यावृत्तिसिद्धेः। नचैवमंधदाभ्यचित्रिण्यादिव्यावर्तकं ग्रहेष्टकालक्ष्यापूर्वे संभवति विशेषणं, सत्यपि सोमफलचमसयोरेकापूर्वप्रयुक्तत्वे नैमित्तिकविधेर्नित्यविध्युत्तरप्रवृत्तित्वान्नित्यसोमविधिशेषत्वेन पर्यवसितानां च धर्माविधीनां नैमित्तिकविधिशेषत्वेन पुनर्व्यापारायोगान्न समानविधानत्वम्। नचैवं सोमपूतीकयोरसमानविधानत्वापत्तिः, सोमशास्त्रस्यैव सकलसोमावयवाभावे पूतीकादिप्रतिनिधिगतविकलसोमावयवानुष्टापकत्वेन पूतीकानां फलचमसवन्नैमित्तिकविध्यन्तरविधेयत्वाभावात्। 'यदि सोमं न विंदेत पूतीकानभिषुणुयाद्' इत्यस्य तु प्रतिनिधिनियममात्रपरत्वात्। **अवघातादीनामिति** अतद्गुणसंविज्ञानो बहुव्रीहिः। परमापूर्वप्रयुक्तोऽपि ह्यवघातो दृष्टकार्यमहिम्ना शक्यत आज्याद्यावर्तयितुं न प्रोक्षणपर्यग्निकरणे।

अनुपयोगादिति। स्वरूपोपयोगिद्रव्याद्युद्देशेनाविधानादित्यर्थः। अपूर्वसाधनलक्षणामनपेक्ष्य प्रधानभावनयेतिकर्तव्यतात्वेन स्वीकृतानां तद्द्वारा व्यप्रधानापूर्वार्थत्वमेव युक्तमित्याशयः। कुतः पुनः परमापूर्वसिद्धिः? यावतोत्पत्त्यपूर्वैस्तदुत्पादितसमुदायापूर्वाभ्यां वा शक्यते फलोत्पत्तिर्वक्तुम्। एकफलोत्पत्तिनिर्वाहाय प्रथमतः कल्पितमेकमपूर्वं न पश्चात्कल्पितापूर्वान्तरवशेनापाकर्तुं शक्यमिति चेत्, न। आदित एव षण्णां कर्मणां करणत्वनिर्वाहाय तावदपूर्वकल्पनौचित्यात्। विरुद्धश्रुत्यदर्शिना कल्पिताया लिंगकल्प्यश्रुतेरिव कल्पितस्यापि परमापूर्वस्य प्रकारान्तरेण कल्पनामूलाकाङ्क्षोच्छेदालोचने वाधसंभवाच्च। प्रथमतः षडपूर्वकल्पने तेषां साङ्गप्रधानजन्यत्वनिर्वाहाय षडपूर्वान्तरकल्पनापत्तिरिति चेत्। भवतु। न तावता प्रेक्षावद्भिः क्रमभाविषड्यागव्यापारत्वेनैकमपूर्वं कल्पयितुमुचितम्। नचाज्ञानामपूर्वेदमर्थ्यमुत्पादकत्वेनैवेति नियमः संभवी पराभिमतो वेति पूर्वाङ्गोत्पादितै-

तत्स्थितावुपयोगः। परमापूर्वस्य तु साङ्गप्रयोगानुष्ठानानन्तरमेवोत्पद्यमानत्वात् सर्वेषामारादुपकारकाणां तदुत्पत्तौ प्रयोगबहिर्भूतस्य तु तत्स्तावुपयोगः। यथा बृहस्पतिसवस्य, वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति वाजपेयोत्तरकालमङ्गत्वेन विहितस्य वाजपेयापूर्वस्थितावुप्रयोगः, तस्य प्रागेवोत्पन्नत्वादित्युक्तं चतुर्थे। तत्सिद्धं सर्वथाङ्गानामपूर्वार्थत्वम्। प्रकृतमनुसरामः। तदेवं निरूपितः संक्षेपतो विनियोगविधिः॥

रुत्तराङ्गस्थापितैः षड्भिरेवापूर्वैः फलोत्पत्तिनिर्वाहान्नैव वस्तुतोऽधिककल्पनापि। अतः कथमारादुपकारकेषु परमापूर्वप्रयुक्तत्वव्यवहार इति चेत्। अत्र भवदेवः—कुविंदादिकर्तुरुद्देश्यपटादिसिद्धिरनेकतन्त्वादिकरणसंपाद्या कार्याव्यवहितपूर्ववृत्तिसंयोगादिव्यापारद्वारेणैव जायमाना दृष्टा। अतोऽनेकयागैरपि स्वर्गादिसिद्धिरेकापूर्वद्वारेणैवोचितेति। कश्चित्तु दर्शपूर्णमासाभ्यामिति षड्यागनिष्ठसाधनताप्रतीतिः षड्यागसाधारणशक्तिं विनानुपपद्यमाना तादृशशक्तिकल्पनामाक्षिपति। तादृशशक्तिरेव परमापूर्वमित्याह।

केचित्तु परमापूर्वाभावे समस्तारादुपकारिणां फलोत्पत्तावुपयोगो वाच्यः, यथा सिद्धान्तिमते परमापूर्वोत्पत्तौ। उत्पत्त्यपूर्वार्थत्वं चोत्तरेषाम्। तत्स्थित्यर्थत्वे क्षणविशेषावच्छिन्नस्थित्यर्थत्वे मानाभावाद्यावत्फलोत्पत्ति तत्स्थित्यर्थत्वं वाच्यम्। ततश्च सकृत्स्वर्गाय दर्शं कृतवतः प्रकृतिद्वितीयादिप्रयोगेषु विकृतिषु चैहिकफलासु पुनरनुयाजाद्यननुष्ठानापत्तिः। पूर्वकृताङ्गोपकाराणामनपवृक्तत्वेन प्रसङ्गसिद्धेः। ततश्च पृषदाज्येनानूयाजान्यजत्येकादशानूयाजान्यजतीति वचनानुपपत्तिरिति परमापूर्वसिद्धिमाहुः। असति च परमापूर्वे समस्ताङ्गापूर्वसहितैः षड्भिरपूर्वैः फलोत्पत्त्यभ्युपगमे प्रयोगे समाप्तेऽपि यस्य कस्यचिदङ्गस्य प्रधानस्य वा कीर्तने तन्मात्रजन्यापूर्वनाशात् फलानुदयापत्तिः। नचैवं युक्तं संभवति फलोदयोपपादने। एतेन नित्येष्वपि परमापूर्वोपपत्तिर्ज्ञेया। पश्वादिदृष्टान्तेन पापक्षयस्य प्रयोगानन्तरभावित्वनियमासंभवात्। **तत्स्थिता**विति षष्ठीसमासौ। उक्तं हि प्रतिपत्तिसूत्रे वैमृधाधिकरणे च **मिश्रैः** 'उत्पन्नमपि कार्यं तदभावे विपद्यत इति कल्प्यते' इति। यद्वा तस्मिन् स्थितिर्यस्य परमापूर्वानुकूलातिशयस्य, फलानुकूलातिशयस्य, तस्मिन्। स्वीकर्तव्यं चादृष्टसमवाय्यप्यदृष्टान्तरम्। अन्यथा पार्वणहोमे देवतोद्देशनियमादृष्टस्यानाश्रयत्वापत्तेः।

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। स चाङ्गवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव। स हि साङ्गं प्रधानमनुष्ठापयन् विलम्बे प्रमाणाभावादविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते। न च विलम्बवदविलम्बेऽपि प्रमाणाभाव इति वाच्यम्। विलम्बे हि अङ्गप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तिः प्रसज्यते। नहि विलम्बेन क्रियमाणयोः पदार्थयोः सहकृतमिति साहित्यं व्यवहरन्ति।

प्राशुभावपदप्रयोजनं सूचयन् लक्ष्यमाह—स चेति। अतः प्रयोगपरिच्छेदकस्यापि पौर्णमास्यां पौर्णमास्या यजेतेत्यादेरलक्ष्यत्वात्तद्व्यावृत्त्यर्थं प्राशुभावपदम्। प्रधानविधिनैव निर्ज्ञातप्राशुभावे प्रयोगे भेदसिद्ध्यर्थमदः शास्त्रम्। ननु सर्वस्यैव विधेः प्रवर्तनात्मनः प्रयुक्तिफलत्वसंभवात् प्रयोगविधित्वमिति तल्लक्षणे न कस्यचिद्विधेर्व्यावृत्तिरुचितेत्यत आह—एवेति। फलविशेषकर्मकभावनान्वयित्वेन प्रधानमिवाङ्गानि बोधयता प्रधानविधिनैव साङ्गप्रधानानुष्ठानसिद्धेः प्रधानोत्पत्तिविधयोऽङ्गविधयो वा न स्वविषयान्प्रयुञ्जत इत्याशयः। प्रधानविधिरपि यदर्थं यदनुष्ठापयति तत्तस्य प्रयोजकमन्यदप्रयोजकमित्युच्यते। तद्यथा—तुल्येऽप्याभिक्षावाजिनयोर्दध्यानयनजन्यत्वे आभिक्षार्थमेव दध्यानयनमनुष्ठाप्यते नान्यार्थम्। दध्यानयनवाक्ये सप्तम्यन्तपदाभिहितस्य पयसो नयतिद्वितीयकर्मतया व्याप्यमानस्य नयनं प्रति प्राधान्यावगतेः पयःपरामर्शिसर्वनामार्थाभेदान्वयित्वाच्चाभिक्षायाः वाजिनप्राधान्यस्य मानशून्यत्वात्। तुल्येऽप्येकहायनीनयनसाध्यत्वे क्रयपदकर्मणोः क्रयार्थमेव तदनुष्ठाप्यते तत्संस्कार्याया एकहायन्याः क्रये विनियुक्तत्वात्। तुल्येऽपि पुरोडाशतुषोपवापयोः कपालशेषित्वे पुरोडाशार्थमेव कपालमनुष्ठाप्यते। पुरोडाशकपालेन तुष्णानुपवपतीति विधिवेलायामेव तुषोपवापस्य परप्रयुक्तकपालसाध्यत्वप्रतीतेः। सत्यप्याग्नेयस्विष्टकृतोः पुरोडाशसाध्यत्वे स्विष्टकृदर्थतया न पुरोडाशोऽनुष्ठाप्यते, उत्तरार्द्धात्मकैकदेशसाध्यत्वेन श्रुतस्य तस्यैकदेश्याकाङ्क्षायामाग्नेयादिप्रयुक्तैकदेशिग्राहकत्वात्। अनुपपत्तित्वाच्च। एतेन पशौ शकृल्लोहितयोर्निरसनं, पूर्णमासे (दर्शे?) शाखायाः प्रहरणं प्रणीतानां निनयनं प्रयाजशेषस्य क्षारणमिडादेर्भक्षणं, सोमे कृष्णविषाणायाः प्रासनमवभृथे सोमलिप्तानां नयनमप्रयोजकमिति ज्ञेयम्। प्रतिपत्तित्वसिद्ध्युपयोगिन्यायभेदप्रदर्शनाय परमधिकरणभेदः। नचैवं मैत्रावरुणाय दण्डं ददातीति विहितंदानं द्वितीयया दण्डप्रतिपत्त्यर्थत्वाद्दण्डाप्रयोजकं स्यादिति शङ्क्यम्। चतुर्थीश्रुत्या मैत्रावरुणार्थदानं प्रति दण्डप्राधान्यायोगात्। यत्तु प्रतिपत्तेः प्रतिपाद्योत्पत्तिमिव तद्धारणं प्रत्यप्रयोजकत्वात् प्रयाजशेषधारणाभावे क्षारणविध्यनुपपत्तिरिति। तन्न। प्रतिपाद्येन प्रयाजा-

नचैवं साहित्यानुपपत्त्या समानकालत्वमेव स्यान्न त्वविलम्बः, अव्यवधानेन पूर्वोत्तरकाले क्रियमाणपदार्थयोरविलम्बेन कृतमिति व्यवहारादिति वाच्यम्। अनेकपदार्थानामेकस्मिन्कालेऽनुष्ठानानुपपत्तेः। न च तावत्कर्तृसंपादनेनानुष्ठानं किं न स्यादिति वाच्यम्। तस्यैतस्य यज्ञक्रतोश्चत्वार ऋत्विज इत्यादिना कर्तृणां नियतत्वात। तस्मादङ्गवाक्यैकवाक्यतामापन्नः प्रधानविधिरेकवाक्यतावगततत्साहित्यं विदधदुक्तविधया एककालानुष्ठानानुपपत्तेरविलम्बं विधत्त इति सिद्धं प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिरिति॥

ज्येनैवाग्न्यधिकरणकप्रक्षेपहविरधिकरणकक्षारणात्मकप्रतिपत्तिद्वयमनुष्ठापयतांशभेदेन तदनुभवितुं स्वधारणानुष्ठापनात्। नचैवं प्रातःसवनानुष्ठितप्रयाजशेषेण माध्यन्दिनसवने भाविनीषु प्राजापत्यवपासु स्वप्रतिपत्त्यै धारणमनुष्ठाप्येतेति शङ्क्यम्। संनिहिते क्वचिदनियमेन प्राप्तस्य क्षारणस्य संनिहितहविष्षु नियमनं कुर्वता शास्त्रेणासंनिहिततदधिकरणकक्षारणस्याविषयीकरणादशास्त्रीयप्रतिपत्त्यै धारणानुष्ठापनासंभवात्।

विधेः प्राशुभाववोधकत्वमुपपादयति—**सहीत्यादिना सचेत्यतः** प्राक्तनेन। प्राशुभाववोधकत्वोपन्यासेन चैतत् सूचितम्—प्रधानार्थतयाऽङ्गानि प्रयोक्तुं समर्थोऽपि विधिर्यस्य प्रधानस्य परप्रयुक्तयदङ्गजन्योपकारलाभमालोचयति न तदर्थतया तान्यनुष्ठापयति। यथा पशुपुरोडाशविधिः प्रयाजान् पुरोडाशार्थतया। 'अग्नीषोमीयस्य वपया चर्यान्नीषोमीयं पुरोडाशमनुनिर्वपती'त्येवमात्मा हि सोऽग्नीषोमीयतन्त्रमध्ये पुरोडाशं विदधानः तिष्ठत्पशुकालीनत्वैकादशत्वगुणकृतवैलक्षण्ययुतैरपि पाशुकप्रयाजैः कृतोपकारे प्राकृतोपकारावैजात्यमापशुसमाप्त्यनपवर्गे चालोचयन्न पुरोडाशाय पृथक्तान् प्रयुंक्ते प्रयोगप्राशुभावभङ्गापत्तेः। यथा वाऽसत्यपि तन्त्रमध्यविधाक्लृप्तवस्तन्त्रमध्यपातान्निर्शीष्टिविधिर्निशीष्टयर्थतया प्रयाजादीन्। यत्त्वङ्गं यदा तन्त्रिणा न प्रयुज्यते प्रयुक्तं वा तन्त्र्यविरोधेन प्रसङ्गयुपकाराय नेष्टं प्रयुज्यत एव तदुक्तप्रसङ्गिभ्याम्। यथाज्यभागाविध्मादि च, प्रयुक्तिसामर्थ्यसत्त्वात्। अयमेव भेदश्चातुर्थिकात्प्रयोजकाद् द्वादशोक्तप्रसङ्गिनि। प्राशुभाववोधकत्वोक्त्यैवैतदपि सूचितं—यदङ्गं सकृदनुष्ठापितमगृह्यमाणविशेषत्वाद्बहूनां प्रधानानामुपकाराय प्रभवति न तदसकृदनुष्ठाप्यते यथा पूर्णमासप्रयोगे प्रयाजादि, प्राशुभावभङ्गापत्तेः। यत्र तु देशकालादिकृतो विशेषो गृह्यते इदमस्मै प्रधानाय नास्मा इति, प्रयुज्यत एव तदसकृत्, यथा त्रिकभेदे प्रयाजादि कालकृतविशेषग्रहणात्। वरुणप्रघासेषु च तद्विहार-

स चाविलम्बो नियते क्रम आश्रीयमाणे भवति । अन्यथा हि किमेतदनन्तरमेतत्कर्तव्यमेतदनन्तरं वेति प्रयोगविक्षेपापत्तेः। अतः प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते । तत्र क्रमो नाम वितातिविशेषः पौर्वापर्यरूपो वा ।

भेदेन देशकृतविशेषग्रहणात्। वरुणप्रघासेष्वेव पत्नीसंयाजाः कर्तृकृतविशेषग्रहणात्; अध्वर्युणा हि क्रियमाणास्तेऽष्टानामेवौत्तरवैहारिकाणामुपकुर्युः, न मारुत्याः । असत्यपि कर्तृभेदे दक्षिणाभेदप्रयुक्तकर्तृत्वभेदात्कचिदङ्गावृत्तिः, यथा राजसूयान्तर्गतावेष्टिप्रयोगे ।

नचैवं प्राशुभावानुरोधेनानियतक्रमाश्रयणमेवोचितं नेत्याह--**स चेति** । नियत इतिच्छेदः । यद्यपि पुरुषभेदेन नियमानियमावुभावपि प्राशुभावोपपादकत्वेन संभाव्येते तथापि नियमाश्रयणे पदार्थसाकल्योपपत्तेस्तदाश्रयणमेवोचितमित्याशयेनाह—**अन्यथेति** । **विक्षेपः** पदार्थलोपः । **विशेषणतयेति** । क्रमसाहित्यादेरकारकत्वाशयेनेदम् । अमुनैव ग्रन्थेन भिन्नप्रयोगविधिपरिगृहीतानां न क्रमनियम इति द्योत्यते विध्यन्तरप्रयोज्यपदार्थविशेषणत्वेन विध्यन्तरेण क्रमविध्ययोगात् । अत एव काम्यकतुषु न पाठक्रमेण क्रमनियमः ' तदादि वाभिसंबन्धात् ' इति न्यायेनाग्नेमारुतादूर्ध्वमनुयाजोत्कर्षेण सूक्तवाकोत्कर्षेऽपि पौरोडाशिकपिष्टलेपफलीकरणहोमयोर्नोत्कर्षः । निबद्धक्रमत्वमेव हि पदार्थानां तदाद्युत्कर्षे तदन्तापकर्षे च तन्त्रम् । यद्यपि चोक्तहोमयोः प्रकृतावनुयाजादिभिः सह निबद्धक्रमत्वान्न ' तूथाऽपूर्वम् ' इति नयगोचरत्वं तथापि सवनीयपशौ प्राप्तैः तैः सह पुरोडाशे प्राप्तयोस्तयोर्न निबद्धक्रमत्वमिति नानुयाजोत्कर्षे तदुत्कर्षसंभवः । नचैवं सूक्तवाकप्रैषाद्यन्तर्गतैपौरोडाशिकदेवतापदानामप्यनुत्कर्षापत्तिः । यत्पदार्थान्विततया स्वार्थ एभिर्बोधनीयः तेषां होतायक्षदित्येवमादीनां पशुप्रयुक्ततयोत्कर्षे सत्येषामप्युत्कर्षावश्यंभावात् । **विततीति** । अयुगपद्भाव्यनेकपदार्थानुष्ठानात्मक इत्यर्थः । अस्मिंश्च मते अध्वर्युर्गृह्णाति दीक्षयित्वेति वाक्ये पाद्यन्तदीक्षागोचरस्यैकस्यैव वितातिविशेषस्य विधेयत्वादेकवाक्यत्वं लभ्यते । पूर्वपदार्थनिरूपितानन्तर्यात्मनः क्रमस्योत्तरपदार्थोपस्थितिसंपादनन दृष्टार्थतयाङ्गत्वसंभवे वितातिविशेषात्मत्वाभ्युपगमेनादृष्टार्थतया स्वाश्रययावत्पदार्थाङ्गत्वाभ्युपगमोऽयुक्त इत्याशयेनाह—**पौर्वापर्येति** । अत्र अव्यवहितत्यादिः ।

तत्र च षट् प्रमाणानि, श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि। तत्र क्रमपरं वचनं श्रुतिः। तच्च द्विविधं, केवलक्रमपरं तद्विशिष्टपदार्थपरं चेति। तत्र वेदं कृत्वा वेदिं करोतीति केवलक्रमपरम्, वेदिकरणादेर्वचनान्तरेण विहितत्वात्। वषट्कर्तुः प्रथममक्ष इति तु क्रमविशिष्टपदार्थपरम्। एकप्रसरताभङ्गभयेन भक्षानुवादेन क्रममात्रस्य विधातुमशक्यत्वात्।

सेयं श्रुतिरितरप्रमाणापेक्षया बलवती। तेषां वचनकल्पनद्वारा क्रमप्रमाणत्वात्। अत एवाश्विनस्य पाठक्रमात्तृतीयस्थाने ग्रहणप्रसक्तावाश्विनो दशमो गृह्यते इति वचनाद्दशमस्थाने ग्रहणमित्युक्तम्।

यत्र तु प्रयोजनवशेन निर्णयः स आर्थः क्रमः। यथाऽग्निहोत्रहोमयवागूपाकयोः। अत्र हि यवाग्वा होमार्थत्वेन तत्पाकः प्रयोजनवशेन पूर्वमनुष्ठीयते। स चायं पाठक्रमाद्बलवान्। यथापाठं ह्यनुष्ठाने क्लृप्तप्रयोजनबाधोऽदृष्टार्थत्वं च स्यात्। नहि होमानन्तरं क्रियमाणस्य किंचिद्दृष्टं प्रयोजनमस्ति।

पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः। तस्माच्च पदार्थानां क्रम आश्रीयते। येन हि क्रमेण वाक्यानि पठितानि तेनैव क्रमेणाधीतान्यर्थप्रत्ययं जनयन्ति। यथार्थप्रत्ययं च पदार्थानामनुष्ठानात्।

स च पाठो द्विविधः। मन्त्रपाठो ब्राह्मणपाठश्चेति। तत्राग्नेयाग्नीषोमीययोस्तत्तद्याज्यानुवाक्याक्रमाद्यः क्रम आश्रीयते स मन्त्रपाठात्। स चायं मन्त्रपाठो ब्राह्मणपाठाद्बलवान्, अनुष्ठाने ब्राह्मणवाक्यापेक्षया मन्त्रवाक्यस्यान्तरङ्गत्वात्। ब्राह्मणवाक्यं हि प्रयोगाद्धिरेवेदमेवं कर्तव्यमित्येवमवबोध्य कृतार्थमिति न पुनः प्रयोगकाले व्याप्रियते। मन्त्राः पुनरनन्यप्रयोजनाः प्रयोगसमवेतार्थस्मारका

क्रमे मुख्यमानतयोक्तप्रयोगविधेरनुग्राहकाणि मानान्याह—तत्रेति। वषट्कर्तुरिति। प्राथम्ये क्रमव्यवहारो गौण उक्तक्रमलक्षणानाक्रान्तत्वात्, प्रथममक्षमात्रानुष्ठानात्क्रमानुष्ठानं वृत्तमिति व्यवहारासंभवाच्च।

इति वक्ष्यामः। तेनानुष्ठानक्रमस्य स्मरणक्रमाधीनत्वात् तत्क्रमस्य च मन्त्रक्रमाधीनत्वादन्तरङ्गो मन्त्रपाठ इतरस्मादिति बलवान्। अत एवाग्नेयाग्नीषोमीययोर्ब्राह्मणपाठादादावग्नीषोमीयानुष्ठानं पश्चादाग्नेयानुष्ठानमित्येवं क्रमं बाधित्वा मन्त्रपाठादादावाग्नेयानुष्ठानं पश्चादग्नीषोमीयस्येत्येव क्रम इत्युक्तम्।

प्रयाजानां 'समिधो यजति' 'तनूनपातं यजति' इत्येवं विधायकवाक्यक्रमाद्यः क्रमः स ब्राह्मणपाठक्रमः। अत्र च यद्यपि ब्राह्मणवाक्यान्यर्थं विधाय कृतार्थानि तथापि प्रयाजानां स्मारकान्तरस्याभावात्तान्येव स्मारकत्वेन स्वीक्रियन्ते। तथा च येन क्रमेण तान्यधीतानि तेनैव क्रमेणार्थस्मरणं जनयन्तीति युक्तं तेनैव क्रमेण तेषामनुष्ठानमिति। तत्सिद्धं प्रयाजानां ब्राह्मणपाठक्रमात्क्रम इति।

ननु प्रयाजेषु प्रयोगसमवेतार्थस्मारकत्वं विधायकत्वेन कृतार्थानां ब्राह्मणवाक्यानां किमिति स्वीक्रियते प्रयोगसमवेतार्थस्मारकाणां याज्यामन्त्राणामाग्नेयादिष्विवात्रापि सत्त्वात्। न च तेषां देवतास्मारकत्वात्कर्मस्मारकत्वेन ब्राह्मणवाक्यं स्वीक्रियत इति वाच्यम्। आग्नेयादिष्वपि कर्मस्मारकत्वेन तत्स्वीकारापत्तेः।

न चेष्टापत्तिः। तथा सति ब्राह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वं न स्यात्। तद्बलीयस्त्वे हि मन्त्राणां प्रयोगसमवेतार्थस्मारकत्वमितरस्य तदस्मारकत्वं हेतुः। यदि च कर्मस्मारकत्वं ब्राह्मणवाक्यस्य स्वीक्रियते तदा प्रधानस्मारकत्वेन ब्राह्मणवाक्यस्यान्तरङ्गत्वादङ्गभूतदेवतास्मारकत्वेन च मन्त्राणां बहिरङ्गत्वान्मन्त्रपाठाद्ब्राह्मणपाठस्यैव बलीयस्त्वं स्यात्। तथा च 'मन्त्रतस्तु विरोधे स्यात्' इति पाञ्चमिकाधिकरणविरोधः। तत्र हि ब्राह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वादादावाग्नेयानुष्ठानं पश्चादग्नीषोमीयस्येत्युक्तम्।

अथ—आग्नेयादिषु याज्यामन्त्रा एव देवताप्रकाशनद्वारा कर्मप्रकाशकास्त्यज्यमानद्रव्योद्देश्यत्वरूपत्वादेवतात्वस्येति चेत्तुल्यं प्रयाजेषु। तत्रापि हि याज्यामन्त्रा देवताप्रकाशकाः। प्रयाजेषु देवतायामान्त्रवर्णिकत्वात्। तथाच प्रयाजेषु याज्यामन्त्राणां देवताप्रकाशन-

द्वारा कर्मप्रकाशकत्वात्तत्क्रमो मन्त्रपाठादेव स्यान्न तु ब्राह्मण-पाठक्रमात्।

नच मन्त्रपाठस्यान्यादृशत्वात् प्रयाजक्रमो ब्राह्मणपाठक्रमादेवेति वाच्यम्। अन्यादृशत्वे तस्यैव क्रमस्यानुष्ठानं स्यात्, मन्त्रक्रमस्य बलीयस्त्वात्। अभ्यासाधिकरणे च वार्तिककृता क्रमविनियुक्तैर्वलिङ्गकमन्त्रवर्णैत्यादिना प्रयाजेषु याज्यामन्त्राणां क्रमविनियोग उक्तः। नवमे तन्त्ररत्ने समिधः समिधोऽग्न आज्यस्य व्यन्त्वित्यादिभिः क्रमप्रकरणप्राप्तैर्मन्त्रैर्देवता गुणत्वेन समर्प्यन्त इत्युक्तम्।

मन्त्राणामन्यादृशक्रमत्वे तदनुपपत्तिः स्यात्तत्कथं प्रयाजेषु ब्राह्मण-पाठक्रमात्क्रम इति चेदुच्यते। सत्यमेतत्। तथापि यत्रार्थस्मारका मन्त्रा न सन्त्येव-यथा तूष्णीं विहितेषु कर्मसु-तेषां क्रमो ब्राह्मण-पाठक्रमात्, तत्र तेषामेव प्रयोगसमवेतार्थस्मारकत्वात्। प्रयाजोदाहरणं तु कृत्वाचिन्तया, तत्र ब्राह्मणवाक्यानां प्रयोगसमवेतार्थस्मारकत्वाभावात्। यथाहुरर्थवादचरणे वार्तिककाराः—

'प्रयाजादिवाक्यान्यर्थं समर्प्य चरितार्थानि
स्वरूपसंस्पर्शे सत्यपि प्रयोज्यकृतां न प्रतिपद्यन्ते' इति।

तस्मात्समन्त्रककर्मणां मन्त्रपाठक्रमात्क्रमः। अमन्त्रककर्मणां क्रमस्तु ब्राह्मणपाठक्रमादेवेति दिक्।

प्रकृतौ नानादेशस्थानां पदार्थानां विकृतौ वचनादेकस्मिन्देशेऽनुष्ठाने कर्तव्ये यस्य देशेऽनुष्ठीयन्ते तस्य प्रथममनुष्ठानमितरयोश्च पश्चात्—अयं यः क्रमः स स्थानक्रमः।

स्थानं नामोपस्थितिः। यस्य हि देशेऽनुष्ठीयते तत्पूर्वतने पदार्थे कृते स एव प्रथममुपस्थितो भवतीति युक्तं तस्य प्रथममनुष्ठानम्। अत एव साद्यस्केऽग्नीषोमीयसवनीयानुबन्ध्यानां सवनीयदेशे सहानुष्ठाने कर्तव्य आदौ सवनीयपशोरनुष्ठानम्, तस्मिन्देशे आश्विनग्रहणानन्तरं सवनीयस्यैव प्रथममुपस्थितेः, इतरयोस्तु पश्चात्।

आश्रीयते प्रयोगविधिनेति शेषः। कथमुक्तविधपाठस्य पदार्थक्रमनियामकत्वमत आह—येन हीति। अधीतानीत्यस्य प्रयोगकाल इत्यादिः।

तथा हि ज्योतिष्टोमे त्रयः पशुयागाः। अग्नीषोमीयः सवनीयः अनुबन्ध्यश्चेति। तेच भिन्नदेशाः। अग्नीषोमीय औपवसथ्येहि, सवनीयः सुत्याकाले, अनुबन्ध्यस्त्वन्ते। साद्यस्क्रो नाम सोमयागविशेषः। स चाव्यक्तत्वाज्ज्योतिष्टोमविकारः। अतस्ते त्रयोऽपि पशुयागाः साद्यस्क्रे चोदकप्राप्ताः। तेषां च तत्र साहित्यं श्रुतं 'सह पशूनालभेत' इति। तच्च साहित्यं सवनीये देशे, तस्यं प्रधानप्रत्यासत्तेः स्थानातिक्रमसाम्याच्च।

सवनीयदेशे ह्यनुष्ठाने क्रियमाणे अग्नीषोमीयानुबन्ध्ययोः स्वस्वस्थानातिक्रममात्रं भवति, अग्नीषोमीयदेशे ह्यनुष्ठाने क्रियमाणे सवनीयस्य स्वस्थानातिक्रममात्रम्। आनुवन्ध्यस्य तु स्वस्थानातिक्रमः सवनीयस्थानातिक्रमश्च स्यात्। एवमानुबन्ध्यदेशेऽग्नीषोमीयस्य द्रष्टव्यः।

तथा च सवनीयदेशे सर्वेषामनुष्ठाने कर्तव्ये सवनीयस्य प्रथममनुष्ठानम्। आश्विनग्रहणानन्तरं हि सवनीयदेशः। प्रकृतौ आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीत्याश्विनग्रहणानन्तरं तस्य विहितत्वात्। तथा च साद्यस्क्रेप्याश्विनग्रहणे कृते सवनीय एवोपस्थितो भवतीति युक्तं तस्य स्थानात्प्रथममनुष्ठानमितरयोश्च पश्चादित्युक्तम्।

प्रधानक्रमेण योऽङ्गानां क्रम आश्रीयते स मुख्यक्रमः। येन हि क्रमेण प्रधानानि क्रियन्ते तेनैव चेत् क्रमेण तेषामङ्गान्यनुष्ठीयन्ते तदा सर्वेषामङ्गानां स्वैः प्रधानैस्तुल्यं व्यवधानं भवति व्युत्क्रमेण त्वनुष्ठाने केषांचिदङ्गानां स्वैः प्रधानैरत्यन्तमव्यवधानमन्येषामत्यन्तं व्यवधानं स्यात्। तच्चायुक्तं प्रयोगविध्यवगतसाहित्यबाधापत्तेः, अतः प्रधानक्रमोऽप्यङ्गक्रमे हेतुः।

अत एव प्रयाजशेषेणादावाग्नेयहविषोऽभिधारणं पश्चादैन्द्रस्य दध्नः, आग्नेययागैन्द्रयागयोः पौर्वापर्यात्। अत्र हि द्वयोरभिधारणयोः स्वेन स्वेन प्रधानेन तुल्यमेकान्तरितव्यवधानं भवति, आग्नेयहवि-

---

तस्य प्रधानेति। तथाच तत्साहित्येनेतरयोरपि तत्प्रत्यासत्तिलाभ इत्याशयः।

रभिधारणाग्नेययागयोरैन्द्रहविरभिधारणेन व्यवधानात्, ऐन्द्रहविरभिधारणैन्द्रयागयोश्चाग्नेययागेन व्यवधानात् ।

अतश्चादावाग्नेयहविरभिधारणं तत ऐन्द्रस्य हविषः, तत आग्नेययागः, ततश्चैन्द्रो याग इत्येवंक्रमो मुख्यक्रमात्सिद्धो भवति । यदि त्वादावैन्द्रहविषोऽभिधारणं तत आग्नेयस्य क्रियते तदा याज्यानुवाक्याक्रमवशादादावाग्नेयस्यानुष्ठानादाग्नेययागतदङ्गहविरभिधारणयोरत्यन्तमव्यवधानमैन्द्रयागतदङ्गहविरभिधारणयोरत्यन्तं व्यवधानं स्यात् । तच्च न युक्तम् । अतो युक्तः प्रयाजशेषेणाभिधारणस्य मुख्यक्रमात्क्रम इति ।

स चासौ मुख्यक्रमः पाठक्रमाद्दुर्बलः । मुख्यक्रमो हि प्रमाणान्तरसापेक्षप्रधानक्रमप्रतिपत्तिसापेक्षतया विलम्बितप्रतिपत्तिकः पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रममात्रसापेक्षतया न तथेति बलवान् ।

अतएवाग्नेयोपांशुयाजाग्नीषोमीयानां क्रमेणानुष्ठीयमानानामप्युपांशुयाजाज्यनिर्वापो मुख्यक्रमान्न पूर्वमनुष्ठीयते, तस्य दुर्बलत्वात्, पाठक्रमात्तु पश्चादनुष्ठीयते, तस्य प्रबलत्वादिति ।

स चायं मुख्यक्रमः प्रवृत्तिक्रमाद्बलवान् । प्रवृत्तिक्रमे ह्याश्रीयमाणे बहूनामङ्गानां प्रधानविप्रकर्षो भवति, अस्मिंत्वाश्रीयमाणे सन्निकर्षः ।

तद्यथा दर्शपूर्णमासयोरादावाग्नेयानुष्ठानं ततः सान्नाय्यस्य । तद्धर्माश्च केचित्पूर्वमनुष्ठीयन्ते, तत्र यदि प्रवृत्तिक्रममाश्रित्य तद्धर्माः सर्वे पूर्वमनुष्ठीयेरंस्तत आग्नेयधर्मास्तत आग्नेयानुष्ठानं ततः सान्ना-

---

अतएव प्रयाजेति । यद्यप्याकरे मुख्यक्रमोदाहरणत्वेनान्वारम्भणीयागतयोः 'सारस्वतौ भवतः' इति विहितयोः स्त्रीपुंदेवत्ययज्योर्धर्मा निर्वापादय उदाहृताः, तथापि तेष्विष्टक्रमस्य प्रधानाङ्गयाज्यानुवाक्यायुगलप्रवृत्तिक्रमतोऽपि सिद्धेर्न मुख्यक्रमस्यासंकीर्णं तत्र प्रामाण्यमित्युदाहरणान्तरमेतैरुक्तम् । नच प्रथमपदार्थप्रवृत्तिरेव द्वितीयादिषु क्रमनियामिका न भाविपदार्थप्रवृत्तिरिति वक्तुं युक्तं, न्यायसाम्यात् ।

तत्र यदीति । यद्यपि याज्यानुवाक्यायुगलप्रवृत्तिक्रमानुरोधेनाग्नेयधर्मप्राथम्यमुचितं तथापि जघन्यप्रवृत्तिक्रमान्मुख्यप्रवृत्तिक्रमो बलीयानित्याशयेनेदम् ।

ष्यानुष्ठानं, तदा तद्धर्माणां स्वप्रधानेन सह द्वाभ्यामाग्नेयधर्मतदनुष्ठानाभ्यां विप्रकर्षः स्यात्।

यदा तु सान्नाय्यधर्माणां केषांचित्पूर्वमनुष्ठानेऽपि अन्ये सर्वे मुख्यक्रममाश्रित्याग्नेयधर्मानुष्ठानानन्तरमनुष्ठीयन्ते तदा सर्वेषामाग्नेयधर्मसान्नाय्यधर्माणामेकैकेन विजातीयेन व्यवधानं भवति, आग्नेयधर्माणां स्वप्रधानेन सह सान्नाय्यधर्मैर्व्यवधानात्, सान्नाय्यधर्माणां च स्वप्रधानेन सहाग्नेयानुष्ठानेन व्यवधानादिति न विप्रकर्षः। तस्मान्मुख्यक्रमः प्रवृत्तिक्रमाद्बलवान्।

सहप्रयुज्यमानेषु प्रधानेषु सन्निपातिनामङ्गानामावृत्त्यानुष्ठाने कर्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठितपदार्थक्रमाद्यः क्रमः स प्रवृत्तिक्रमः।

यथा प्राजापत्याङ्गेषु। प्राजापत्या हि 'वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीति वाक्येन तृतीयानिर्देशात् सेतिकर्तव्यताका एककालत्वेन विहिताः। अतस्तेषां तदङ्गानां चोपाकरणनियोजनप्रभृतीनां साहित्यं संपादनीयम्।

तत्र प्राजापत्यानां संप्रतिपन्नदेवलाकत्वेनैकस्मिन्काले ऽनुष्ठानादुपपद्यते साहित्यम्। तदङ्गानां चैकस्मिन्काले ऽनुष्ठानमशक्यम्। नह्यनेकेषां पशूनामुपाकरणमेकस्मिन्क्षे कर्तुं शक्यम्। अतस्तेषां साहित्यमव्यवधानेनानुष्ठानात्संपाद्यम्—एकस्योपाकरणं कृत्वाऽपरस्योपाकरणमिति।

अतः प्राजापत्येषु एकं पदार्थं सर्वत्रानुष्ठाय द्वितीयः पदार्थोऽनुष्ठेयः। तत्र प्रथमपदार्थानुष्ठानं कस्माच्चित्पशोरारभ्य कर्तव्यम्। द्वितीयस्तु पदार्थो येन क्रमेण प्रथमोऽनुष्ठितस्तेनैव क्रमेणानुष्ठेयः, प्रयोगविध्यवगतस्य मिथोऽङ्गसाहित्यस्योपपत्तये।

प्रयोगविधिना हि दैक्षे तदङ्गानामुपाकरणनियोजनादीनां मिथः

सहेति। असंनिपातिनां प्रयाजादीनां तन्त्रानुष्ठेयसंनिपातिनामन्वाधानादीनां च प्रवृत्तिक्रमागोचरत्वं द्योतयितुं संनिपातिनामावृत्त्येतिपदद्वयम्।

साहित्यमानन्तर्यापरपर्यायं विहितम्। तच्च साहित्यं सवनीयपशौ चोदकेन प्राप्तम्। तस्य प्राणिद्रव्यकत्वेन दैक्षविकृतित्वात्। सवनीयाच्चैकादशिनेषु प्राप्तं सुत्याकालत्वसामान्यात्। तेभ्यश्च प्राजापत्येषु प्राप्तं गणत्वसामान्यात्।

प्राजापत्येषु च प्रतिपशु यागभेदाच्चोदका भिद्यन्ते। अतश्चोदकात्तत्तत्पश्वङ्गभूतानामुपाकरणनियोजनादीनां साहित्यमानन्तर्यापरपर्यायं प्राप्तम्। अत एकस्य पशोरुपाकरणानन्तरमेव नियोजनं चोदकबलात्कर्तव्यत्वेन प्राप्तम्। तत्तु न क्रियते, प्रत्यक्षवचनावगतसर्वपश्वङ्गसाहित्यानुपपत्तेः।

अत एकस्मिन् पशावुपाकरणे कृते तदनन्तरमेव कर्तव्यत्वेन प्राप्तमपि नियोजनं न क्रियते। प्रत्यक्षवचनबलात्तु पश्वन्तरेषु षोडशसु उपाकरणमेव क्रियते। कृते तु तेषूपाकरणे प्रथमपशोर्नियोजनस्य तदीयोपाकरणेन व्यवधाने प्रमाणाभावात् प्रथमपशावेव नियोजनं कार्यम्।

अतश्च येन क्रमेणोपाकरणं कृतं तेनैव क्रमेण नियोजनं कार्यम्। एवं च तत्तत्पशूपाकरणानां स्वस्वनियोजनैस्तुल्यं षोडशक्षणैर्व्यवधानं भवति। अन्यथा केषांचिदत्यन्तव्यवधानं केषांचिच्चाव्यवधानं स्यात्। तच्च न युक्तम्।

तस्माद्येन क्रमेण प्रथमपदार्थोनुष्ठितस्तेनैव द्वितीयोऽनुष्ठेयः। तत्सिद्धं प्रथमानुष्ठितपदार्थक्रमाद्यो द्वितीयपदार्थक्रमः स प्रवृत्तिक्रम इति। तदेवं निरूपितः संक्षेपतः षड्विधक्रमनिरूपणेन प्रयोगविधिव्यापारः।

फलस्वाम्यबोधको ह्यिधिरधिकारविधिः। फलस्वाम्यं च कर्मज-

तदीयोपाकरणेनेति। सहयोगे तृतीया व्यवधान इत्यस्याधिकेत्यादिः। एवकारो भिन्नक्रमः, नियोजनमेवेति।

षड्विधेति। अनेन क्रमनियामकमानषट्कभावे क्रमानियमो यथा—प्रयाजांगभूतेषु नानाशाखापठितेषु अनुमन्त्रणेष्विति दर्शितम्।

न्यफलभोक्तृत्वम्। स च यजेत स्वर्गकाम इत्येवंरूपः। अनेन हि स्वर्गमुद्दिश्य यागं विदधता स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते। यस्याहिताग्नेरग्निर्गृहान् दहेत् सोऽग्नये क्षाम्रवतेऽष्टाकपालं पुरोडाशं निर्वपेदित्यादिभिस्तु गृहदाहादौ निमित्ते कर्म विदधद्भिर्निमित्तवतः कर्म जन्यपापक्षयरूपफलस्वाम्यं प्रतिपाद्यते।

तच्च फलस्वाम्यं तस्यैव योऽधिकारिविशेषणविशिष्टः। अधिकारिविशेषणं च तदेव यत्पुरुषविशेषणत्वेन श्रुतम्। अत एव 'राजा राजसूयेन स्वाराज्यकामो यजेत' इत्यनेन स्वाराज्यमुद्दिश्य राजसूयं विदधतापि न स्वाराज्यकाममात्रस्य तत्फलभोक्तृत्वं प्रतिपाद्यते किंतु राज्ञः सतस्तत्कामस्य।

किंचित्तु पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणं भवति। यथाध्ययनविधिसिद्धा विद्या, अग्निसाध्येषु च कर्मसु आधानसिद्धाग्निमत्ता, सामर्थ्यं च। एतेषां पुरुषविशेषणत्वेनाश्रवणेऽप्यधिकारिविशेषणत्वमस्त्येव। उत्तरक्रतुविधीनां ज्ञानाक्षेपशक्तेरभावेनाध्ययनविधिसिद्धज्ञानवन्तं प्रत्येव प्रवृत्तेः। अग्निसाध्यकर्मणां चाग्न्यपेक्षत्वेन तद्विधीनामाधानसिद्धाग्निमन्तं प्रत्येव प्रवृत्तेः।

अत एव च शूद्रस्य न यागादावधिकारः, तस्याध्ययनविधिसिद्धज्ञानाभावात्, आधानसिद्धाग्न्यभावाच्च। अध्ययनस्योपनीतस्याधिकारत्वादुपनयनस्य चाष्टवर्षं ब्राह्मणमुपनयीतेत्यादिना त्रैवर्णिकाधिकारत्वात्, आधानस्यापि 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादिना त्रैवर्णिकाधिकारत्वात्।

यद्यपि च वर्षासु रथकारोऽग्नीनादधीतेत्यनेन रथकारस्य सौधन्वनापरपर्यायस्याधानं विहितं, योगाद्रूढेर्बलीयस्त्वात्, तथापि नास्योत्तरकर्मस्वधिकारः। अध्ययनविधिसिद्धज्ञानाभावात्।

न च तदभावे आधानेऽपि कथमधिकारः, तदनुष्ठानस्य तत्साध्यत्वादिति वाच्यम्। तस्याध्ययनविधिसिद्धज्ञानाभावेऽपि 'वर्षासु रथकारोऽग्नीनादधीत' इत्यनेनैव विधिनाऽऽधानमात्रौपयिकज्ञानाक्षे-

पणात् । अन्यथा एतस्यैव विधेरनुपपत्तेः । अतश्च रथकारस्याधानमात्रेऽधिकारेऽपि नोत्तरकर्मस्वधिकारो विद्याभावात् ।

एवं च तदाधानं नाग्निसंस्कारार्थम् । संस्कृतानामग्नीनामुत्तरत्रोपयोगाभावात् ; किं तु तदाधानं लौकिकाग्निगुणकं विश्वजिन्न्यायेन स्वर्गफलं च स्वतन्त्रमेव प्रधानकर्म विधीयते । अग्नीनिति च द्वितीया सक्तून् जुहोतीतिवत्तृतीयार्था, इति ।

प्रकृतमनुसरामः । तत्सिद्धं शूद्रस्याध्ययनविधिसिद्धज्ञानाभावादार्थान्नसिद्धाग्न्यभावाच्च नोत्तरकर्मस्वधिकार इति ।

नन्वेवं स्त्रिया अधिकारो न स्यात् । तस्या अध्ययनप्रतिषेधेन तद्विधिसिद्धज्ञानाभावात् । न च नास्त्येवेति वाच्यम् । यजेत स्वर्गकाम इत्यादौ स्वर्गकामपदस्योद्देश्यसमर्पकत्वेन पुंस्त्वस्योद्देश्यविशेषणत्वाद्धैकत्ववदविवक्षितत्वेन स्त्रिया अधिकारस्य साधितत्वादिति चेत्सत्यम् ।

अधिकारः साधितो न तु स्वातन्त्र्येण, न स्त्री स्वातन्त्र्यमर्हती-

---

न स्त्री स्वातन्त्र्यमर्हतीति ।

रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्धके ।
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित्स्त्रियाः ॥

इत्यस्य सङ्ग्रहायादिशब्दः । ननु नैतच्छास्त्रं स्त्रीणां विहिते कर्मणि स्वतन्त्राधिकारनिषेधाय, स्मरन्ति हि पूर्वव्रतादौ तासां स्वतन्त्राधिकारम् । नापि धनस्वामित्वप्रतिषेधाय, पत्नीदुहितर इत्यादिना तासामपि रिक्थग्राहित्वस्मरणात् । तन्निषेधे सहाधिकारस्याप्यसंभवाच्च । अथ पुत्राणामिव पत्नीनामपि तुल्ये स्वत्वे विभागकालेऽंशग्राहित्वं स्यात् । अस्त्येव तत् ।

यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशकाः—इति ॥

अथ बहूनामविभक्तानां संसृष्टिनां वा भ्रातृणामिव तत्पत्नीनामपि तुल्ये स्वत्वे कस्याश्चिन्मृतभर्तृकायाः कथं स्वत्वनिवृत्तिः । [1]तन्निवर्तकविक्रयाद्यभावे तन्निवृत्त्ययोगात् । नच नास्त्येव सेति वाच्यम् ।

यद्विभक्ते धनं किञ्चिदाध्यादि विविधं स्मृतम् ।
तज्जाया स्थावरं मुक्त्वा लभते मृतभर्तृका ।
वृत्तस्थापि कृतेऽप्यंशे न स्त्री स्थावरमर्हति ॥ इति ।

---

१ तन्निमित्तविक्रयाद्येति पाठः ।

त्यादिना तस्य निषिद्धत्वात्। स्वातन्त्र्येण कर्तृत्वे प्रयोगद्वयस्यापि वैगुण्यापत्तेश्च। यजमानप्रयोगे पत्नीकर्तृकाज्यावेक्षणादिलोपात्, पत्नीप्रयोगे च यजमानकर्तृकाज्यावेक्षणादिलोपात्। अतो दम्पत्योः सहाधिकारः। सहाधिकारत्वेन यजमानविद्ययैव पत्न्या अपि कार्यसिद्धेर्न ज्ञानं विना तस्या अधिकारेऽनुपपत्तिः।

'पाणिग्रहणात्तु सहत्वं कर्मसु तथा पुण्यफलेषु' इति वचनेन स्त्रिया अधिकारनिर्णयाच्च, निषादस्थपतेरिवाध्ययननिमित्तसिद्धज्ञानविरहिणोऽपि 'एतया निषादस्थपतिं याजयेत्' इति वचनान्निषादेष्ट्याम्।

बृहस्पतिना विभक्ते स्थावरभिन्नं लभत इति वदता विभागाभावे तदपि न लभत इति सूचनात्, सकलनिबन्धसंमतत्वाच्च तस्याः, इति चेत्, आस्तां सा, संन्यासपातित्यादिवद्भर्तृमरणादेरपि वाचनिकस्वत्वनिवर्तकत्वाभ्युपगमसंभवात्। नच स्थावरस्वत्वनिषेधाय तच्छास्त्रमतएव बृहस्पतिना विभक्तमृतभर्तृकायाः स्थावरान्यलाभमभ्युपगम्य स्थावरलाभनिषेधः संगच्छते, ततश्च शालाया अभावे कथं कर्माधिकार इति वाच्यम्।

जङ्गमं स्थावरं हेम कुप्यं धान्यरसान्वितम्।
[1]आदापयेच्छ्राद्धकर्म कुर्यात् षाण्मासिकादिकम्॥

इति प्रजापतिना स्थावरस्वीकरणस्यापि विधानात्। नच वचसोर्विरोधः। तादृश्यां रिक्थग्रहणविधायके 'पत्नीदुहितर' इत्यादौ पत्नीपदश्रवणेन बृहस्पतिवचसो जायापदोपेतस्य पत्नीभिन्नाऽसुरादिविवाहोढाविषयत्वेन निबन्धुभिर्व्यवस्थापनात्। स्मर्यते हि--

क्रयक्रीता तु या नारी न सा पत्नी विधीयते।
न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः॥ इति।

केचित्तु दुहितृरहितपत्नीविषयत्वं बृहस्पतिवचनस्याहुस्तच्चिन्त्यम्। आस्तां चाविभक्तमृतभर्तृकाया अपुत्राया धनमात्र इव विभक्तमृतभर्तृकायाः स्थावरेऽपि स्वत्वनिर्वृत्तिर्वाचनिकोपायात्। अतोऽकार्यकरणवारणाधिकृतपित्राद्याज्ञानुल्लंघनमेव स्वातन्त्र्यनिषेधशास्त्रार्थोऽत आह—**स्वातन्त्र्येणेति**। तत्र हेतू आह—**यजमानेति पत्नीति**। यजमानपत्नीशब्दौ हि स्वामिवचनौ, यजत इत्यर्थे यजमानपदव्युत्पत्तेः।

---

१ आदद्याद्यापयेच्छ्राद्धं मासषाण्मासिकाब्दिकमिति।

निषादस्थपतिशब्दे हि निषादं स्थपतिं चेति कर्मधारयो न तु निषादानां स्थपतिरिति षष्ठीतत्पुरुषः [तदपेक्षया कर्मधारयस्य बलीयस्त्वात्।] षष्ठ्यर्थे लक्षणापत्तेः। एतावांस्तु विशेषः—निषादस्याध्ययनविधिसिद्धज्ञानाभावेन एतस्यैव विधेस्तत्कर्मोपयिकज्ञानाक्षेपकत्वम्। पत्न्यास्तु तादृशज्ञानाभावेऽपि यजमानेन सहाधिकारात्तस्य च तादृशज्ञानवत्त्वात्तेनैव च तस्याः कार्यसिद्धेर्नोत्तरक्रतुविधीनां ज्ञानाक्षेपकत्वम्।

ये तु पत्नीमात्रकर्तृकाः पदार्थाः आज्यावेक्षणादयस्ते ज्ञानं विनाशक्यानुष्ठाना इति तद्विधीनां तदाक्षेपकत्वं स्वीक्रियते इति। तत्सिद्धमध्ययनविधिसिद्धज्ञानस्याधानसिद्धाग्निमत्तायाश्चोत्तरकर्मसु अधिकारिविशेषणत्वमिति।

एवं सामर्थ्यस्यापि अधिकारिविशेषणत्वमसमर्थं प्रति विध्यप्रवृत्तेः, आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति न्यायात्। तच्च सामर्थ्यं काम्ये कर्मणि अङ्गप्रधानविषयम्। न त्वङ्गासमर्थः प्रधानमात्रसमर्थश्च काम्ये कर्मण्यधिकारी। प्रधानविधेरङ्गविध्येकवाक्यतापन्नस्य साङ्गकर्मसमर्थं प्रत्येव प्रवृत्तेः। यथाविनियोक्तमधिकारात्। यदि हि समर्थं प्रत्येव प्रवृत्तौ कयाचित् श्रुत्या विरोधः स्यात् तदाऽसमर्थस्याप्यधिकारः स्यात्। न च विरोधोऽस्ति। स्वर्गकामश्रुतेः समर्थं प्रत्येव प्रवृत्तौ विरोधाभावात्। प्रत्युतासमर्थं प्रति प्रवृत्तौ प्रधानविधेरङ्गवाक्यैकवाक्यतया प्रतिपन्नस्याङ्गसाहित्यस्य बाधापत्तेः। नित्यवत् श्रुतानामङ्गानां पाक्षिकत्वप्रसङ्गाच्च। अतः साङ्गे प्रयोगे समर्थस्यैव काम्ये कर्मण्यधिकारः।

'पत्युर्नो यज्ञसंयोगे' इति स्मरणाच्च। यस्मिंश्च प्रयोगेऽवेक्षणं विधीयते तत्प्रयोगनिरूपितस्वामित्वमेव तच्छब्दार्थः। यथा पितृभ्यो दद्यादित्यत्र यं प्रति दानविधिः तन्निरूपितपितृत्वं पितृपदार्थः। तथैवानुभवात्। तथाच नर्त्विग्वत् कर्थचिदान्नेनान्यतरेण(?)वेक्षणादपूर्वसिद्धिरित्याशयः।

निषादं चेति। षष्ठीतत्पुरुषे निषादपदार्थस्याश्रुतषष्ठ्यर्थान्वयवन्न कर्मधारयेऽन्यतरपदार्थस्याश्रुतविभक्त्यर्थान्वयः कल्प्यो येन लक्षणापद्येत, श्रुतद्वितीयाया एव पदद्वयार्थान्वयित्वादिति सूचयितुं वृत्त्युत्तरभाविन्या अपि विभक्तेर्वृत्त्यर्थकथनपरे वाक्ये निर्देशः।

नित्यकर्मणां त्वङ्गेषु यथाशक्तिन्यायः । तानि हि यावज्जीवश्रुत्या यावज्जीवं कर्तव्यत्वेन चोदितानि । न च यावज्जीवं केनापि साङ्गः प्रयोगः कर्तुं शक्यते । अतो नित्यकर्मसु प्रधानमात्रसमर्थोधिकारी, अङ्गानि तु यावन्ति कर्तुं शक्यन्ते तावन्ति कार्याणीत्यास्तां बहूक्त्या, सूरिभिः पराक्रान्तत्वात् ।

तत्सिद्धं फलस्वाम्यबोधको विधिरधिकारविधिरिति । तदेवं निरूपितं चतुर्विधभेदनिरूपणेन विधेः प्रयोजनवर्त्मपर्यवसन्नम् ।

॥ इति पूर्वार्धम् ॥

नित्यकर्मणामिति । आवश्यकर्तव्यतया विहितानामित्यर्थः । तानि हीति । आद्यं तृतीयान्तं निमित्तश्रुतिमात्रोपलक्षणार्थं, द्वितीयमवश्यकर्तव्यतायाः । यावज्जीवमिति । प्रतिनिमित्तमित्यर्थः । यथाशक्त्युपबन्धे हि अवश्यकर्तव्यताबीजं, तस्यां च निमित्तश्रुतिः । यत्राप्यकरणदोषश्रुत्यादिमाहिम्नावश्यकर्तव्यतां स्मरन्ति तत्रापि यादृशकाले यादृशकर्तुर्वा विधेयविधिस्तादृग्रूपविशेषस्यैव निमित्तत्वकल्पनान्न निमित्तश्रुतिं विना क्वचिदपि तत्सिद्धिः । निमित्तं च यथा क्वचिद्यावज्जीवशब्दात्—यथा यावज्जीवमग्निहोत्रं जुहुयादित्यादौ—तथाऽन्यत्र सम्भ्यादिनापि, यथा वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात इत्यादौ ।

इति श्रीमदापदेवसुतानन्तदेवकृतायां न्यायप्रकाशटीकायां पूर्वार्धं समाप्तम् ।

शुभमस्तु ।

पुस्तक प्राप्ति स्थानम्:—
"गुजराथी" प्रिंटींग प्रेस,
बुकसेलर्स एण्ड पब्लिशर्स.
सासुनबिल्डींग, बजारगेट स्ट्रीट,
फोर्ट मुंबई नं. १.

श्रीमद्वाल्मीकिरामायणम् टीकात्रयोपेतम् ।

(१) सर्वतन्त्रप्रतिभेन शब्देन्दुशेखरादिनानानिबन्धप्रणेत्रा श्रीमन्नागेशभट्टेन स्वशिष्यस्य सतो जीविकाप्रदातुः शृङ्गवेरपुराधीशस्य वीरमणेः श्रीरामराजस्य नाम्नाप्रणीतया रामायणतिलकाख्यया टीकया,

(२) पण्डितश्रीवंशीधर-शिवसहायाभ्यां प्रणीतया रामायणशिरोमण्याख्यया टीकया,

(३) श्रीगोविंदराजप्रणीतया भूषणाख्यया टीकया च सहितम् । सप्तधा विभज्य बद्धम् । पृ. सं. ३०८२ मू. ३१-०-०

रामायणम् (तदेव विभागशः)

बालकाण्डम् । उपरिनिर्दिष्टटीकात्रयोपेतम् ।				मू. ३-०-०
अयोध्याकाण्डम्	,,	...	...	५-०-०
अरण्यकाण्डम् ।	,,	...	...	२-१२-०
किष्किन्धाकाण्डम् ।	,,	...	...	२-१२-०
सुन्दरकाण्डम् ।	,,	...	...	३-८-०
युद्धकाण्डम् ।...	,,	...	...	८-०-०
उत्तरकाण्डम् ।	,,	...	...	६-०-०
				३१-०-०

महाभारतम्

श्रीमहाभारत-विराटपर्व—अष्टटीकोपेतम्

(१) नीलकण्ठकृतभारतभावदीप-
(२) अर्जुनमिश्रकृतदीपिका-
(३) चतुर्भुजमिश्रकृतप्रकाश-
(४) सर्वज्ञनारायणकृतभारतार्थप्रकाश-
(५) विमलबोधकृतदुर्घटार्थप्रकाशिनी—
(६) रामकृष्णकृतविरोधार्थभञ्जनी-
(७) विषमपदविवरण—
(८) वादीराजतीर्थविरचितलक्ष्माभरणेत्यष्टटीकोपेतं विपुलपाठभेदसहितं च । मूल्यम् ४-८-०

श्रीमहाभारत-उद्योगपर्व—पञ्चटीकोपेतम्

(१) नैलकण्ठीय भावदीप-
(२) अर्जुनमिश्रीयदीपिका-
(३) विमलबोधकृतदुर्घटार्थप्रकाशिनी-
(४) सर्वज्ञनारायणीय-भारतार्थ प्रकाश-
(५) वादीराजतीर्थविरचित-लक्ष्माभरणेतिपञ्चटीकोपेतम् । मूल्यम् ८-८-०

(१) संस्कारमयूखः—मीमांसकनीलकण्ठभट्टसुतशंकरभट्टकृतः। अस्य संस्काराणां स्वरूपं कालः इतिकर्तव्यता वर्णधर्मा आश्रमधर्माश्च विकृतरीत्या मूलवचनोपन्यासपुरःसरं निरूपिताः। मूलवचनानि चाप्रतिपत्तिविप्रतिपत्तिसंभावनास्थलेषु क्रमेण पर्यायशब्दप्रदर्शनेन मीमांसकाभिमतन्यायानुसरणेन च व्याख्यातानि। अन्ते कातीयसूत्रानुसारिप्रयोगाश्च दत्ताः। पूर्वं वाराणस्यादिषु मुद्रितोऽप्ययं वर्णपदवाक्यभ्रंशविपर्ययादिदोषप्रचुरतयाऽप्रविभक्तविषयतया च भृशं दुर्बोधो विपरीतबोधकश्चासीत्। अस्माभिस्तु ग्रन्थकृतैव पुनः शोधितस्य वर्धितस्य चास्य ग्रन्थस्य पुस्तकमासाद्य विषयांश्च प्रविभज्य शोधने च महान्तमायासमास्थाय मुद्रितः। मू. ६-१२-०

(२) आचारमयूखः—नीलकंठभट्टकृतः प्रातःस्मरणादिशयनान्तस्याह्निककियाकलापस्य निरूपणपरो ग्रन्थः। मू. ०-८-०

(३) समयमयूखः—नीलकंठभट्टकृतः विहितकर्मणां कालस्य निर्णायकः। मू. १-४-०

(४) श्राद्धमयूखः—नीलकंठभट्टकृतः श्राद्धभेदतद्विशेषाधिकारिद्रव्यादि निरूपणपरः। मू. १-४-०

(५) नीतिमयूखः—नीलकंठकृतः अत्र राज्याभिषेकप्रयोगोऽभिषिक्तस्य कर्तव्यं तदुपयोगितया च राज्याङ्गादि निरूपितम्। मू. १-४-०

(६) व्यवहारमयूखः—नीलकंठभट्टकृतः मू. १-१२-०

(७) दानमयूखः— मू. २-०-०

(८) उत्सर्गमयूखः— मू. ०-४-०

(९) प्रतिष्ठामयूखः— मू. ०-८-०

(१०) प्रायश्चित्तमयूखः— ...
(११) विशुद्धिमयूखः— ... } मुद्रियमाणाः
(१२) शान्तिमयूखः— ...

पुस्तकप्राप्तिस्थानम्:—

मॅनेजर—"गुजराती" प्रिंटिंग प्रेस,
सासुन बिल्डिंग,
एल्फिन्स्टन् सर्कल, फोर्ट, मुंबई नं. १.